लायनानां कालमाह॥ शौनकः॥ अप वर्त्मने वगाह्यापः कुशपाणिश्च वद्बचः॥ ब्रह्मयज्ञं प्र
कुर्वीत संध्यां माध्याह्निकीं ततः॥ स्नानं कृत्वा तु मध्याह्ने द्विजः संध्यामुपास्य तु॥ ब्रह्मयज्ञं ततः कु
३ मुदीवी र्यात्तर्पणं तु निरायकः॥ कारिका॥ आम्नात्रा चौवाग्या त्वादिस्मा दनिदिता॥ अपो वागाह्य तु स्ना
यादुपवित्रेव संन्वितः॥ ६ ॥ अधौतः शुक्लवरः कुर्यात्कर्मागाचमनं ततः॥ दर्भान्बहून्स्तु चोद
क्षो प्रागग्रानास्तृणेद्य॥ आश्वलायनः॥ सव्यस्य पाणेरंगुष्ठाप्रदेशिन्यौ स्तु मध्यमा॥ द
क्षिणस्यांगुलिभिस्पृश्य ततस्त्रांगुष्ठवर्जिता॥ तथा सव्यकरं गुष्ठं दक्षिणांगुष्ठे चेहितं॥ संबं
धमेवं कुर्वीत न्यसेद्दक्षिणसक्थिनि॥ कारिका॥ दर्भेषु पवित्रेषु कर्मण्यत्र प्रारब्धव्य एव सन्॥
हस्तोपस्थं करे सव्ये उत्ताने प्रागग्रं गुल्योबधतां व्यजकः॥ वामं संपादयेज्जंघे दक्षिणस्या
मुपन्नतं॥ पादे वामन्यसेत्पादे दक्षिणस्यादुपस्थकं॥ पवित्रे स्थापयेद्हस्ते प्रागग्रे दक्षिणेन
दं कं ग्रे

३२
तु। नाभं प्रागगुलेनेन संदध्याद्दक्षिणे करं। कुर्व्वीत निर्य्यागध्वस्ता वानेन्नते प्रदिवा दक्षिणा॥ सम्मी
क्ष्येन चात्मानं समाहितमना स्त्रवेत्॥ स्रष्यो च्यनं तम पूर्वेन्न तिसंध्यापनः च्याकिता:। पूर्वा व्या
हृतयस्तिस्रस्समस्तास्स सकृदुच्चरेत्। पदार्धशिरा: सर्वासा वित्रिंत्रि वदेत् ध॥ पूर्वा त्रिसंहि
४ ति तं यावत्र दधीत्समाहित:॥ अग्निमीळे इषेत्वाग्नेदीच्चेराश्चा पिस्वरा कितं॥ नमो ब्रह्मण इत्यंतो
न त्रिहकाप्रणवं पठेत्॥ ध्याप्रणवाद्यो तदंतस्मान्मध्यमेन स्वरेण तु॥ अधीते मन्त्रसिप्रामे
ब्रह्मयज्ञं करोति चेत्॥ सर्व्वो कारमुच्चार्य आद्यमंत्रेषु नोच्चरेत्॥ आर्षछंदांसि वै तत्र यज्ञे त
र्पणकर्म्मणि। शौनक:॥ आचम्य वह्वच:। कुर्याद् ब्रह्मयज्ञे च तर्पणं ततो निष्पीड्य वस्त्रांतमुपवी
ति समाचरेत्। समाचम्य यजु: शाखी ब्रह्मयज्ञसमाचरेत्। पुनराचम्य देवादीन् संतर्प्यापुनः
राचमेत्॥ अपां समीपमागम्य तर्पयेद्यह्वचा:। अन्वारब्धेन सव्येन दक्षिणेन तु पाणिना॥ ३२

एवं मंता नित्यं पं तु चेत्पंत: प्रतिमंत्रकं॥ धातुनैवाथ परस्मैपदैकवचनं यथा॥ दक्षा सिंचेत्प्रजापतिस्तृप
त्वि यच्चपोरेवती थेत:॥ धातु स्तृप्यति यथा लिंगमंत्रांतेषु प्रयुज्यते॥ मंत्रे प्रातर्वचनेनैस्तृप्यति तिना विंतिरत:
३ त्वि परं। प्रतिमंत्रं नवा ता तु तर्पयेत्॥ नृतां र्थत:॥ देवानास्तर्पयित्वा तु शतं वा प्रकृतिं तथा। ऋषीन् दश दशासंत
र्प्य सनकादींश्च सप्तैव। प्राचीनावीतौ यश्च द्वानि तर्पयेत् पितृतीर्थत:॥ सुमंतत्यादिनी: मंत्रै: प्रतिमंत्र पूर्व
वैव॥ ध८द॥ द्वितीयां तेषु मंत्रेषु तर्पयामि पदं वदेत्॥ पितरं चाथ शर्म्माणं गोत्रं संतर्प्पयेत् क्रमात्॥ तथा व
खिलसंहितायां। तर्पयेत् पितृत्रीनादौ ततश्चैव तु मातरं। सापत्नमातरं पश्चात् पितामह्यादिकान् क्रमात्॥
आदौ पिता तथा माता सापत्नी जननी तथा। मातामहि सपत्निका आत्मपत्निस्त्वनंतरं॥ सुतभ्रा
तृपितृव्याश्च मातुलाश्च सभार्य्यया॥ दुहिता भगिनी चैव दौहित्रो भगिनेयका:॥ प०॥ पितृस्वसा मातृ त
त्पतिश्वाश्च मातुलाश्च सभार्य्यया॥ एते स्युः पितरस्तीर्थे तर्पणे च मरालया। याज्ञवल्क्य:॥ सर्वेभ्यो नरं देयम
श्वसाश्च सुरो गुरुरर्थिन:। एते स्यु: पितरस्तीर्थे तर्पणे च मरालया। याज्ञवल्क्य:॥ सर्वेभ्यो न संदेयं म
सवर्णेभ्य एव च॥ नामगोत्रस्वधाकारे तर्पयेदनुपूर्वश:॥ स्मृत्यर्थसारे॥ वसुरुद्रादित्यस्वरूपान्

३३ श्राद्धार्थं तर्पयेत्पितॄन्॥ नामगोत्रस्वधाकारैः प्रत्यहं तर्पयेत्सुधीः॥ एकैकमंजलीन्देवान् द्वौ द्वौ
तु सनकादयः॥ अर्हन्ति पितरस्त्रीं स्त्रियश्चैकैकमंजलीन्॥ ३॥ असंस्कृतः प्रमृतानां स्थले दद्या
जलांजलीन्॥ तिलदर्भयुतं तोयं स्वधया यत्र दीयते॥ तत्तोयममृतं भूत्वा पितॄणां दत्तमक्षयं। गृहे
पस्तर्पणं कुर्यात् लोहे कांस्ये तथैव च। ताम्रे न्युगुह्य योगेन सपुत्रः पितृघातकः॥ स्थले वा पिष्ठु चोद्धृत्य
कुशास्तीर्णे तु भाजने। ताम्रादिके च पर्णे वा तर्प्पयेत्सलिलैर्यजैः। पाणिनैकगुणं प्रोक्तं दर्भे शतगुणं
ततः॥ ४॥ अहायं खड्गपात्रेण पितॄणां तर्पणं भवेत्॥ तर्पयेत्तेन तीर्थेन गृह्णीयात्तेन वै जलं॥ अप
४ रु या कुर्वीत यस्तु नरकं प्रतिपद्यते॥ अथ निजतर्पणं॥ स्मृत्यर्थसारे॥ विवाहे चोपनयने चौलेस
ति यथाक्रमं। वर्षमर्धं तदर्धं वा नेत्येकतिलतर्पणं॥ १॥ सप्तम्यां रविवारे च जन्मर्क्षे दिवसेषु चाग
हे निषिद्धं सतिलं तर्प्पणं सर्वदा तिच॥ भानुवारे भौमवारे नंदायां गुरु मघादिषु। त्रयोदश्यां तु स
प्तम्यां नरणं रुतिकासु च॥ अपत्रधौर्तयेचैव चतसृषु युगादिषु। पिंडदानं मृदा स्नानं न कुर्यात्तिलत ३३

लतर्प्पणं॥ अर्के शुक्रे त्रयोदश्यां मघायां निशि संध्ययोः॥ गृहे मताहे जन्मर्क्षे न कुर्यात्तिलतर्प्प
णं। पवित्रको श्रीके ताम्ररजतं हेममेव च॥ धार[redacted]शिल्पाणि पवित्रं चोत्तरोत्तरं॥ तिलानामप्य
भावे तु सुवर्णरजतान्वितं। तदभावे न कुर्वीत दर्भैर्मंत्रैश्च तर्प्पणं॥ २॥ इदं तु [illegible] नित्यविषयं। अप
विशेषः॥ प्रेतपक्षे व्यतिपाते संक्रांतौ तिथिपर्वसु॥ निषिद्धे पितृवारे कर्त्तव्यं तिलतर्पणं॥ नद्यां तीर्थे ती
र्थे विशेषे तु प्रेतकार्ये तथैव च। कृते दाहेपि कुर्वीत तर्पणं तिलसंयुतं। व्यतिपातेषु संक्रांतौ युगमन्व तौ ४
तरादिषु॥ तर्पयित्वा पितॄन्सम्यक् श्राद्धं कुर्यादनंतरं॥ पश्चाच्छ्राद्धे हिरण्ये च पश्चाद्दद्यात्तिलोदकं॥ न
पाके वा यज्ञकाश्राद्धे श्राद्धे चैवानुमासिके॥ ३॥ कृत्वानुमासिकं श्राद्धं सपिंडीकरणं तथा। वैश्वदेवं ततः
कुर्यात्तर्प्पणं तिलतर्प्पणं॥ दद्यात्तिलोदकं पूर्वं पश्चाद्दद्यान्महालये॥ आह्निके नापरं पूर्वं परेहनि ति
लोदकं॥ वृद्धिश्राद्धे सपिंडे च प्रेतश्राद्धे नुमासिके॥ परेहनि विमूकाखे न कुर्यात्तिलतर्प्पणं॥ अथ श्रा
वृद्धि द्धे तर्पणं॥ पित्रोः प्रत्याब्दिके प्राप्ते तर्पणी तु [redacted] दैवं देवादिकं ततः। ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तु ति
[illegible] कथं भवेत्॥ जले नैव प्रकर्त्तव्यं नित्ये पितृकर्मणि॥ श्राद्धं कृत्वा तु विधिवत्

३४ लेर्विनारह्येहरिः॥ ततःपरेह्नि कुर्वीत तर्पणं पुरुषः सुधीः॥ तद्देषे स्ति खद्दैने रूक प्रातः स्नात्वा समस्तेजं
ले॥ श्राद्धं कुर्यान्नु तु पूर्वेद्युः प्रातस्नायस्परेहनि॥ पित्र्ये श्रेवाथ संतर्प्य त्पश्चात्संध्यादिकाःक्रिया
॥२२॥ तर्पणं त्वमृतं प्रातर्द्वितीये प्रहरे पयः॥ तृतीये जलमित्याकु श्चतुर्थे रुधिरं स्मृतं॥ प्रयोगपारिजाते॥
स्नात्वा तीरं समासाद्य शुद्धपवित्रपकुशासने। संतर्पयेत्पितॄन् तत्र स्नात्वा वस्त्रं च धारयेत्। पश्चात्तर्पण
ति प्रातः कृत्वा श्राद्धं परेहनि। पितरस्तृप्तिमायांतु न च कुर्यात्तिवै ध्रुवं। पूर्वेद्युः श्राद्धकृन्मर्त्यो यो न त
र्पयते पितॄन्॥ अतएवः पितरस्तस्य ज्ञाप दत्त्वा व्रजंतिते। श्राद्धांगतर्पणं कुर्यात्सतिलं त्वपरेहनि॥
पित्रोर्विशय एतस्मान्न चान्य विषये भवेत्॥ जीवमानाः पिता यस्य माता यदि विपद्यते॥ मातुः श्राद्धं सुत
ःकुर्यान्न कुर्यात्तिलतर्पणं॥२३॥ इतः प्रसंगः कथितं॥ अयंतु ब्रह्मयज्ञस्य [illegible] जिज्ञासादानादि लक्षणं॥
कुर्यात्स्थित्वा शयानो वा ब्रह्मयज्ञसमो भवेत्॥ देशे शुचौ स्वयं वा स्या त्रानध्यायमिष्यते॥ प्रागूर्ध्व
वो न दैव्यापं वैश्वदेवाख्य कर्मणि। ऊर्ध्वं मनुष्ययज्ञस्तु सचेलो नितिपिपूजनं। स्वराजा नो तयेविप्रान ३४

वार२

नि। थान्समयागतान्॥ मनुः॥ विद्यातपः समिद्धेषु हुतं विप्रमुखाग्निषु॥ निस्तारयति दुर्गा
च्च महतश्चैव किल्बिषात्॥२४॥ इति श्रीनारायणविरचितायां धर्मप्रवृत्तौ शौचादितर्पणां
३ प तं प्रकरणं॥ अथ दिनानीतकर्माण्याह॥ अकृतानि प्रमादे स्व प्रातःकर्माणि यानि च। रात्राव
पि कर्माणि विना सौरं च तर्पणं॥ दिवो [illegible] दितानि कर्माणि प्रमादादकृतानि वै। रात्र्यर्धः प्र
थमे यामे तानि कुर्याद्यथाक्रमं॥ रात्रौ प्रहरपर्यंतं दिवाकर्माणि कारयेत्॥ अपवादे च सौरं
च ब्रह्मयज्ञं विवर्जयेत्॥ दिवोदिताः क्रिया[illegible]ः कार्याः रात्रावपि यथाक्रमं। अपवादे विना
सौरं ब्रह्मयज्ञं च तर्पणं॥२५॥ केचिद्रात्रावपि [illegible] ब्रह्मयज्ञमिच्छंति। तन्मते मनसा स्वाध्याय
मध्यापत दिवानक्तं चेत्यापस्तंब विषयं तथा च स्मृतिः॥ आचार्याः केचिदिच्छंति रात्रावपि च
तर्पणं॥ तद्धेतुः [illegible] विधीयते॥२६॥ मध्याने समतिक्रांते सायंकालोऽभि
वेद्यदि॥ सायंसंध्यामुपास्यादौ संध्यामध्याह्निकां ततः॥२७॥ सायंकाले व्यतीते [illegible] स्त्रीयातेदि

ऊ:२ खि२ व्य

३५ वाकरे ॥ कुर्याद्दिग्वर्त्तिनीं संध्यां समारभ्य यथाक्रमं ॥ ३८ ॥ ध्यानवर्त्तिनो मध्याह्नः कुर्वीत वर्त्तिनीं संध्यां
समास्ते रात्रावपि न दुष्यति । रथ्यादर्भेन्तु गायत्र्या सोमस्य क्रतु वर्जयेत् ॥ ३९ ॥ मध्याह्ने संध्यारा
त्रौ चेत्समाचरात् कुरुते यदि सोऽस्यनो त्यजेत् स्वकं सौर वैश्वानराय कं ॥ ४० ॥ अथ वै देवतार्चनं दे ३
वालयेद्दथ वा स्वर्णे प्रतिमायां जले पि वा ॥ स्वयं हि भक्तिभावेन प्रत्यहं परमेश्वरं ॥ ४१ ॥ नारायण
णं महादेवं ब्रह्मादित्यं गणनायकं । शक्तिं चैवाथ पंचैतान् प्रत्यहं पूजयेद्द्विजः ॥ ४२ ॥ देवता स्थाप
येद्विरः स्थापयेत्पांडुरवादिराद्याद्देवंगामे वापि स्थापयेत्प्र्युगानतः ॥ ४३ ॥ अनीश्वरे
वतां मध्ये स्थापयेत्तां यथाक्रमं । यस्य मध्ये न वेसंनु ईशान्यां शंकरं हरिः ॥ ४४ ॥ आग्नेयां प्रत्यये
सूर्यं नैरृत्यां गणनायकं । वायव्यां पूजयेद्देवीं निमित्तान् वैरुध्यात्रक्रमात् ॥ ४५ ॥ हरिं नो द्वैधेण गतो म ३
रान् हरस्तु ईशो हरे शंकरे भास्ये नागसुतारवौ हरगणेशानां विकास्थापिता । देव्या विष्णु
हरेर्वदेत् तरखयोर्जीवो हरजेश्वरे नार्यः शंकरभागतो विष्णुर्नदा व्यस्तास्तु नेहानिदाः ॥ ४६ ॥ प्रयाग ३५

॥ मविषये प्राचि तु उच्यते । प्रत्यक्पूजकयोर्मध्ये पूर्वमित्यभिधीयते ॥ नैशान्यपूजकापेक्षा प्रत्यापे
क्षं तु न दृश्येत । देवस्य मुखमालक्ष्य दिग्ज्ञां प्राचीं प्रकल्पयेत् । तदादि परिवाराणां मंगाद्या वर
णं क्रमात् ॥ ५० ॥ यस्मिन् विवस्वानुदिषु वत्सुरे हि प्राची त्विचां वेदविदो वदंति मध्येपुनः पूजकपू
र्वयोर्भ्यसदागमज्ञाः प्रवदंति संतः ॥ ५१ ॥ मुखपुष्पाजलीं दत्वा गणेशार्चनं भवेत् । गणेशाएव
मुखाश्च तत्रस्त्यैकमाश्ववेत् ॥ ५२ ॥ गणेशाकौ समभ्यर्च्य शिवो विष्णुं प्रपूजयेत् ॥ अर्चयेत्तु
शिवं पश्चाच्छिवमारोग्य तु वैभवः ॥ ५३ ॥ ततो विष्णुं ततो दुर्गामेवं स्यादर्चनक्रिया । अर्चयेद्दैवा
विप्रः शिर्षं चारोयथा भवेत् ॥ ५४ ॥ हेमराजतताम्राणां सर्वेषामप्यभाजनं । शिवस्त्यीपरित्यज्य
शेखोन्यत्र प्रशस्यते ॥ ५५ ॥ आवाहनासनं पाद्यमर्घमाचमनीयकं । स्नानं वस्त्रोपवीतं च गंधपुष्पे
श्च धूपकं ॥ ५६ ॥ दीपं नैवेद्यतांबोलो प्रदक्षिणं विसर्जनं । प्रत्यूचं पूजयेद्देवं स्नापयेत्पौरुषेण च ॥ ५७ ॥ शा
लग्रामे स्थावरे च नावाहनविसर्जनं । प्रत्यूचं पूजयेत् देवं स्नापयेच्छालग्रामशिलायां तु नित्यं स
न्ना । ग्रा

३६ निर्हितो हरिः॥ ५९॥ स्नापयित्वार्चयेद्देवं यदिच्छेत्तु नमामनः॥ धर्मेणैहिक आयासे पाषाणेनोपवे
शयेत्॥ ६०॥ नागुल्माच्चेयेद्देवं नष्टैः पुष्पैः समर्चयेत्॥ कार्याग्रे न क्षिपेद्वृक्षं यं वज्रपातसमं भवेत्॥ ६१॥
जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च। तुलस्यगस्त्यबिल्वं च न वर्ज्यं जाह्नवीजलं॥ ६२॥ नाक्षतैर
र्चयेद्विष्णुं न तुलस्या गणेश्वरं॥ दूर्वाभिर्नार्चयेद्दुर्गां न केतकं महेश्वरं॥ ६३॥ शालग्रामशिलामेव
नाक्षतैर्वर्जयेद्बुधः॥ अर्चयेद्यदि यो मोहात्प्रजातस्यानुनिष्फलं॥ ६४॥ मन्मये निजपात्रे च पाषा
णे लोहकाष्ठके॥ पद्मवे करमेभौ स्कनैवेद्यं तु न स्थापयेत्॥ ६५॥ सौवर्णे रजते ताम्रे कांस्यपा ला
शपत्रके नैवेद्यापात्रपत्रं तु पात्रं विष्णोरतिप्रियं॥ ६६॥ पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृ
तं॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणं चरेत्॥ ६७॥ आनाह्यस्त्रिवनिर्माल्यं पत्रं पुष्पं फलं जलं॥ शाल
ग्रामसमंपर्कात्सर्वं याति पवित्रकं॥ ६८॥ योर्चयेद्विविधद्रव्यैस्तथा परान्नितैर्म्ब साधकैः॥ स्नानाफला
द्भिर्मे वास्सनसमग्रं फलं भवेत्॥ ६९॥ येकां विनायके कृत्वा द्वे सूर्ये त्रीणि शंकरे। चतस्रः केशवे र ३६

म
धास्सूर्गणके प्रदक्षिणाः॥ ६९॥ समभ्यर्च्यापि वै देवान् यः पादसलिलं हरेः। स याति परमं स्थानं तद्वि
ष्णोः परमं पदं॥ ७०॥ विष्णुपादाभिषिक्तं यः पात्रेणैव पिबेज्जलं। सर्वपापविनिर्मुक्तः स याति परमां
गतिं॥ यः पादसलिलं विष्णोः करेणापिबते यदि। समूढो नरकं याति सपितृयज्ञ इति तथा च मनुः॥
। स्वाध्यायेनार्चयेत्तेषां होमैर्देवान्यथाविधिः। पितॄन्श्राद्धविधानेन ऽन्नैर्भूतानि कर्मणा कु
र्यादहरहः श्राद्धमन्नाद्येनोदकेन वा। पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्॥ ७१॥ एकम
प्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके। न चैवात्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजं। याज्ञवल्क्यः नैत्यश्रा
द्धे देवहीनं नियमादिविसर्जितं। दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितं॥ अर्घ्यावाहनं स्वधाकारं
पिंडाग्नौकरणादिकं॥ ब्रह्मचर्यादिनियमान्विश्वेदेवांस्तथैव च। नित्यश्राद्धे त्यजेदेतान्भोज्यमन्नं
प्रकल्पयेत्॥ दत्त्वा नावेतथैवान्नं गोत्रस्यैव निवेदयेत्॥ ७२॥ नित्यश्राद्धमदैवं स्यादर्घ्यपिंडादिवर्जि
तं॥ नाममंत्रेणनेतोमं च ना द्धानंनविसर्जनं॥ श्राद्धादि नियमो नास्ति किंचिद्दत्त्वा विसर्जयेत्॥ ॥
य

२८ णा॥ रिन्नाकुम्भमध्यास्वं वपनसपंच का॥ पद्मोदुंबरपालाश ब्रह्मपत्रेषु भिक्षैमित्रकं॥ ब्रह्मप
त्रे पलाशः स्यात् विधिपद्मपुराणे॥ यः करोति नरो नित्यं कार्त्तिके पत्रभोजनात्॥ न दुर्गतिमवाप्नोति
अ३ यावदाभूतसंप्लवं॥ भोजनं ब्रह्मपत्रेषु कथायाग्निवर्णं हरेः॥ न मापिर्दं जाति ब्रह्मपत्रेषु भोजनात्॥
ब्रह्मविष्णुश्च रुद्रश्च पत्रयो देवास्त्रिपत्रके॥ स्थिरं वक्ष्ये पत्रं ब्रह्मविष्णुरनुत्तमं॥३॥ निषिद्धानि॥ वर्टे टा
कैश्चत्यपर्णेषु कुंभीतिंदुकपर्णयो॥ कोविदारकदंबानां भुक्त्वा चांद्रायणं चरेत्॥ धा करेरवर्परकैचैव
श्रिलायां ताम्रभाजने॥ तिन्नकांसेच वस्त्रे च नतु नामान तथा पसोयाः॥ गरुकादिपुरस्त्याप्यम अन्नं
परिवेशयेत्॥ परिविष्टेच गायत्र्या घृतान्नमभिमंत्रयेत्॥ ईशानमध्ये प्रतिष्ठाप्य दक्षिणे घृतपाय
सं॥ वामकादिपुरस्त्याप्य भक्ष्यं भोज्यं च वामतः॥७॥ पात्रे घृतान्तु वामे तयावसा भोजनं हितं ताणि
ना दक्षिणेनैव पुष्पपरिषेचयेत्॥८॥ अंगुष्ठा जन्मी चैव मध्यमा च तृतीयका॥ तिस्रो ह्याकांगुलीचै
व प्रशस्ताः पात्रधारणे॥ सत्यतवर्तेन वै प्रातः वारिणा परिषिंचयेत्॥ सायंकाले तथैवस्या भोजनारौ २८

प२

६
वुदक्षिणे दत्तं चत्वारि तत्क्रमात्॥१०॥ प्रणवेनैवायुताक्तेन नमस्कारेण वैनु विनिक्षिप्य वा कृतिर्द्विधा
भोजनादौ तु दक्षिणे॥ सायणीये॥ उद्धृत्य किंचिदन्नाग्रं धर्मराजाय वै बलिं॥ दत्वाथ चित्रगुप्ता
य हस्तं प्रक्षालयेद्विजाः॥११॥ प्रक्षालितकरो भुंक्ते रौरवं नरकं व्रजेत्॥ चित्राय चित्रौ प्रेतेभ्यश्च गुप्ताय
दत्वा चरेत्॥ स्मृतिः॥ वदरीफलमात्रान्नं गुल्फानेनु विक्षिपेत्॥ यमधर्माय चित्राय प्रेतेभ्यश्च
तनोन तं॥ ३॥ मनु॥ चित्राकुतिरनुदृत्तमनुक्तियो ग्रासपंचकं॥ आद्यं स केवलं भुंक्ते ज्ञानतो ज्ञान
तो पि वा॥१२॥ चंद्रिकायां॥ भोजनादौ बलिभुक्तः सम्मुद्धृत्य हि भोजनं॥ अनुध्यता तु यो भुंक्ते प्रा
णायमाष्टकं चरेत्॥ उत्कामतोपस्तरणमसि स्वाहांतं मंत्रमुच्चरेत्॥ आपोशानमिति प्राक्
भोजनादौ पिबेज्जलं॥ आपोशानमकृत्वा तु यो भुंक्ते द्विजसत्तमः॥ अपोज्पंतद्भवेदन्नं भुक्त्वा
चांद्रायणं चरेत्॥ आपोशानं करे कृत्वा पात्रे कृत्वा निलोदकं॥ श्वानमूत्रसमं तोयं पुनः प्रय
तैद्विजः॥ आपोशानार्थं यत्तोयं घृतं चैव निःसृतं यदि॥ हस्तं प्रक्षाल्य तोयेन पुनर्धारयते जलं॥

३९

आपोशानकरो विप्रो यद्याशीर्वचनं पठेत्। अभोज्यं तद्भवेदन्नं दाता नरकं व्रति किल्बिषी॥२४॥ य
जमानकृतं पापं मन्त्रमाश्रित्य तिष्ठति। अन्नं नः प्रतिगृह्णीयात्प्राणैः कंठगतैरपि। अन्नं ब्रह्म र
सो विष्णुर्भोक्ता देवो महेश्वरः एवं ध्यात्वा द्विजो भुंक्ते अन्नदोषो न विद्यते। प्राणाहुतीः कृत्वा तु
पश्चादन्नं परिमर्दयेत्। मर्दितं भोजयेद्यस्तु भुंक्त्वा चान्द्रायणं चरेत्॥२५॥ घृतदानं तु यो भुंक्ते नरस्त्वा
४९५ ह हुतिपंचकं॥ पश्चाद्दुग्धेन यो भुंक्ते द्विजश्चान्द्रायणं चरेत्॥ अन्यत्र सर्पिषैकेको प्राणानामेव चा
हुतिं॥ संध्याविधिना मन्त्रैर्हुनेत्प्राणाहुतिं द्विजः। प्राणाहुतिनियमः॥ स्मृतिसमुच्चये। तर्जनीम
ध्यमांगुष्ठैः प्राणस्यैवाहुतिर्भवेत्। मध्यमानामिकांगुष्ठैरपाने चाहुतिं क्षिपेत्॥२६॥ कनिष्ठा
नामिकांगुष्ठैर्व्यानायाहुतिं कुर्याद्बुधः। कनिष्ठातर्जन्यंगुष्ठैरुदानाय हुनेद्बुधः। सर्वांगुलिभिरादाय
समानस्याहुतिर्भवेत्॥ अनेन विधिना विप्रो वाग्यतो भोजनं चरेत्॥ यदि भुंजीत वै तृष्णीं सर्वत्रे
व तु भोजने। स पापः पितरं हंति भ्रातरं संततिं धनं। भोजनश्राद्धिकं भुंक्त्वा कनियान्स पिनापि च। ३९

मौनं भोजनपात्रस्य धारणं परिवर्जयेत्॥३०॥ वाग्यतो भोजनं कुर्यात् ब्रह्मचारी सदैव हि। पंचप्रा
णाहुतीः कृत्वा ब्रह्मग्रन्थिं समुत्सृजेत्। प्रक्षाल्य वामहस्तं तु पश्चाद्भोजनमाचरेत्। तर्जन्यंगुष्ठे स्थि
तेरोप्य ब्रह्मग्रन्थिर्विसर्जनी॥३१॥ कनिष्ठिकाश्रितो खड्गे नैव भोजनमाचरेत्। कृत्वा प्राणाहुतिं
चान्नं गायत्र्याद्यभिमन्त्रितं॥३२॥ पुनरन्नं न गृह्णीयात् कृत्वा प्राग्यदि किल्बिषी॥ मनुः॥ मधुपर्के
च सोमे च ह्यस्य प्राणाहुतिषु च॥ आस्वहोमेषु सर्वेषु नोच्छिष्टं मनुरब्रवीत्॥३३॥ दक्षिणे तु परि
४५ त्यज्य वामे भिन्नं निधापयेत्॥ अभोज्यं तद्भवेदन्नं पानीयं च सुरासमं॥३४॥ जलपात्रं तु निधि
प्य मणिबंधे च दक्षिणे। भुंक्ते यस्तु विप्रो वै पिबेदन्यत्र पाणिना॥३५॥ एकपंक्त्युपविष्टानां क्तौ ३
विप्राणां सहभोजने। यद्येको पि त्यजेत्पात्रं शेषमन्नं न भोजयेत्॥३६॥ भुंजानेषु च विप्रेषु
यो ग्रपात्रं विमुंचति। स मूढो नरकं याति ब्रह्महा स तु जायते॥३७॥ अग्निना भस्मना चैव स्तंभेन

४

नसलिलेन वा। अंतरे वा रदेशे तु पंक्तिदोषो न विद्यते॥ ४ एकपंक्त्युपविष्टानां मन्योन्यस्य स्प
र्शे यदि। भुक्त्वा तदन्नमत्याज्यं गायत्र्याष्टशतं जपेत्॥ ४१॥ स्मृतिः॥ नवे दुच्छिष्टसंस्पर्शे नो कुर्वीत भो
जनं सदा। यदन्नं तद्भवेन्नो ज्ञेयं मत्याज्यं नोऽनेन स्थितं॥ ४२॥ पुनरन्नं न नोत्कृष्टं यश्च भुंजीत किल्बि
षी। ततश्चैव यदिदं वा शतमष्टोत्तरं सुधीः॥ ४३॥ शेषमुच्छिष्टं प्रोक्तं यश्च तत्र कारणं तत्प्रोदद्या
दन्नशेषं भुमौ दद्यु गंतिसंख्येयं। भुक्त्वा पात्रं तु यत्पात्रं रिक्तं त्यजति यो नरः। स नरः क्षुत्पिपासा
र्तो भवेज्जन्मनि जन्मनि। यत्र के च न संस्थानां स्तुत्यत्वोपहतात्मना। दुर्गतिनामयाद्दत्तमहिं
ष्यमुपतिष्ठतु। रौरवेषु न्यनिलये पद्मार्बुदनिवासिनां। अर्थिनामुदकं दत्तमक्षय्यमुपति
ष्ठतु॥ अर्धे त्यजति गंडूषमर्धं त्यजति नमिषु। प्राणं ति पितरस्तस्य ये चान्ये नमिसंस्थिता॥
यद्दुच्छिष्टदनाचांते नष्टः वा नाशमन्नानां द्विजः। स द्यस्नानं प्रकुर्वीत नान्यथा प्रयतो भवेत्॥ ४०
ष्णु।

१४

स्थानं च भक्षमुच्छिष्टं ह्यनुच्छिष्टस्तु यः स्पृशेत्॥ उपोष्य रजनीमेकं पंचगव्येन शुध्यतीति प३॥
अंगिराः॥ उच्छिष्टोच्छिष्टसंस्पृष्टः श्वा शूद्रेण वा द्विजः। स्नानं विधाय तेन तस्य पात्राणि चाल
न विना॥ स्मृतिः॥ गंडूषकरणात्पूर्वं हस्तं प्रक्षालयेद्द्विजः। हंतं देवं च पितरं च आत्मानं चो
पपातके॥ गोतमः॥ यो वै गंडूषसमये तर्जन्या वक्त्रचालिना। कुर्वीत यदि मूढात्मा रौरवं नर
कं व्रजेत्॥ अचांते पोप्येस्तु चिरता बध्याव पात्रं समुद्धरेत्। उधृते प्यस्तु चिरता वध्या वहून्ने प्रमार्जि
तं। रात्रौ भोजनकाले तु यदि दीपो विनश्यति। पात्रं धृत्वा तु पाणिभ्यां भास्करं मनसा स्मरे
त्॥ दृष्टे पतेन पुनर्दीपं न च्छेषं भोजयेन्नरः। पुनरन्नं न गृह्णीयात् यदि भुंजीत किल्बिषी॥ पतिपरपा
कनिवृत्तस्तु परपाकरतस्तु यः। तयोरन्नं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ परपाकनिवृत्तस्तु
वर्षे वर्षे इमे वता। यावये श्रोत्रियस्यान्नं तदभावे जलं पिबेत्। ह१। श्रीक्रिया चारशिष्यान्निकु

४१

ःज्ञातिश्वश्रुरमातुलाः॥ एषामन्नं न दुष्येत उपाध्यायस्य चैव हि॥ अथ निषिद्धान्नं॥ ब्रह्मोदरे त
थावोले सीमंते प्रथमार्णवे। मासिके च तथा कुंभे नैव भोजनमाचरेत्। गणान्नं गणिकान्नं च
सूतिकान्नं तथैव च। पत्यन्नं चैव शूद्रान्नं नाश्नीयाद्द्विजसत्तमः। नामश्राद्धे नवश्राद्धे सपिंडीप्रेत
कर्मसु। प्रायश्चित्ते न भुंजीत भुक्त्वा चांद्रायणं चरेत्॥ तिथिपरत्वेन वर्ज्यं॥ सप्तम्यां रविवारे च
द्विवा रात्रौ तथैव च। धात्रीफलं नरो स्त्रियाद्दलक्ष्मीको भवेद्ध्रुवं। ६६॥ कूष्मांडं तरुणी चैव मूल
कं वृहती तथा॥ श्रीफलं च कलिंगं च धात्री प्रतिपदादिषु॥ शिरः कपालमंत्राणि नखचर्म ति
लास्तथा। यच्छेद्र्ध्वमायत्वमष्टम्यादिषु वर्जयेत्॥ वर्जयेद्दुत हं तौ कंमसूरांबु वर्तुलं तथा॥
छत्राफलं शुनं चैव छुरवरं मसुरं तथा॥ ... कलिंगं बिल्वोदुंबर नासर्व ... एतानि से
वेत यस्तु तस्य दूरतरो हरिः॥७॥ पत्यन्नं तु यदा भुंक्ते पात्रक प्रहितं तथा। पर्वतान्निजपेन्मंत्रं शतवा ४१

मुं२

रं न कल्मषं॥ समानान्नमुसलमंत्रं तत्सहस्रं तु जपेद्बुधः। भुक्त्वा प्रमादादस्त्रान्नं तदा दोषात्प्र
मुच्यते। प्रमादाद्ज्ञानतो भुंक्ते गणान्नं तु यदा तदा। अपस्यैव सुजपेन्मंत्रं सहस्रेनैव किल्बिषं॥
७३॥ पत्नायज्ञावधः सूक्तं जपेद्धान्यां जलेपिबा। गणिकान्नं यदा भुंक्ते नरः पापात्प्रमुच्यते।
न्नं भुंक्ते यदा पस्तु सुवर्णास्नेयमंदिरे॥ ... नुपूषणः सूक्तं सहस्रं वै जपेज्जले। स्तोत्रमित्रो जपे
न्मंत्रं शतवारं जलेपिबा। कुष्ठान्नं वापि यो भुंक्ते विमुच्यते तस्य किल्बिषात्। ७६॥ ब्रह्मघ्नस्य गृहे
भुंक्ते किल्बिषान्मुच्यते नरः। एहि वांप्रतजी सूक्तं सहस्रं तु जलेयदा। यएनं प्रजपेत्सूक्तं सहस्रं
विष्णुमंदिरे। पापात्प्रमुच्यते सत्यं भुंक्ते गेहे सुरापिनः। भुक्तं ते प्रजपेत्सूक्तं त्रिवस्यानासहस्रकं॥
तस्य गृहे भुंक्ते नरः पापात्प्रमुच्यते।८१। नोवकापर्वगं च शतं विष्णुजपेज्जपेत्॥ भुंक्ते त्वं दोषि
णो यस्तु नरः पापात्प्रमुच्यते। पुर्वानां जपेद्वर्गशतवारं जलेनरः॥ दीर्घरोगी गृहे भुंक्ते नरः पापात्प्रमु
च्यते। कुवे वो देवावर्गं च वरर्षी वै जपेद्ध्रुवं। पिशुनस्य गृहे भुंक्ते मुच्यते सर्वकिल्बिषात्। अपापो हि

शाजपेत्सूक्तं श्राद्धे तु भुंक्ते तु षोडशे ऽहनि तदा पापात्प्रमुच्येत त्रिंशद्वारं जले स्थितः ॥ विवाहादूर्ध्वं जपेत्सूक्तं स
पिंडान्नोजनेयदा ॥ तदा स्नात्वा नैव चाप्नोति त्रिंशद्वारं न किल्बिषं । भुंक्ते तु मासिके येस्त्वन्तदा पापात्प्रमु
च्यते ॥ ऽप्रब्दावर्त्तिपेन्मंत्रं दशवारं जलेऽरुदा ॥ सत्यं नोत्तमितामंत्रं जपेदश्वत्थसन्निधौ ॥ नित्य
श्राद्धे यदा भुंक्ते मुच्यते किल्बिषात्तमेतः ॥ उत्सवेषु यदा भुंक्ते मुच्यते पातकात्तदा । केशान्तरे जपे
त्सूक्तं मेकवारं निरिरितः ॥ ऽकृतेन कृतं यत्सूक्तं मेकवारं जपेद्बुधः । भुंक्ते मन्वादिके श्राद्धे कल्म
षं नैव लिप्यते ॥ त्वेषां गणं जपेन्मंत्रं दशवैविष्णुमंदिरे ॥ भुंक्ते युगादिके श्राद्धे तदा पापात्प्रमुच्य
ते । मितानुद्योऽजपेन्मंत्रं शतवारं शिवालये । व्यतिपाते यदा भुंक्ते तदा पाप वयोन्नयो जपेन्मंत्रं श
तसंख्यां शिवालये ॥ राहुदृष्टो नो भुंक्ते चेत्स्नात्कल्मषं नैव सर्वथा । ऽप्रापप्रयो जपेन्मंत्रं शतं वैवि
ष्णुमंदिरे । हस्तदत्तं यदा भुंक्ते महापापात्प्रमुच्यते । ऽप्रवर्त्ते ह्रीं इत्यादि सर्वपापात्प्रमुच्यते ॥
इले ऽग्नि जपेन्मंत्रं दशवारं यथा तथा । पंचयज्ञविहीनस्य गृहे भुंक्ते न पातकं वह्नवृष्के क ४२
यथा

१६

पात्रे तु भुंक्तनेनैव कल्मषं ॥ ऽप्रस्तेव सो जपेन्मंत्रं दशवारं न कल्मषं । द्यूतजस्त्राणां घनो
कृत्वा पश्चाद्भुक्ते न कल्मषं ॥ ऽग्निः सप्तिजपेन्मंत्रं दशवारं विशेषतः ॥ ९८ ॥ ऽप्रत्यजानां धृ
निष्कृत्वा पश्चाद्भुक्ते न कल्मषं । ऽप्रातेमरुद्भिर्मंत्रं च किल्बिषं न शतं जपेत् ॥ एकस्यैव न भोक्त
व्यं मन्नं तु प्रत्यहं द्विजैः ॥ ऽप्रज्ञानाद्यस्तु भुंजीत तत्सवेनाप्तिनिष्कृतिः । ९९ ॥ ऽप्रथ वमनविधिः ॥
उत्तराचमनात्पूर्वं वमनं यदि जायते । स्नानं तत्र प्रकर्तव्यं गृहस्थैः सिद्धिरिष्यते । उत्तराचमनं २५
पीत्वा वमनं कुरुते यदि । तत्र स्नानेन शुद्धिः स्यादिति प्राहुर्मनीषिणः । १०० ॥ सर्वत्र वमने स्ना
ये तथाशौचानुपातने । अश्वत्थ तु स्नानपाणिश्च घातो न स्नानमाचरेत् ॥ ऽप्रथ ताम्बूलविधिः ॥
ताम्बूलचर्वणं कुर्यान्नतु स्कारात्रौ तु सर्वदा ॥ ऽप्रत्संगे चैव मार्गे च दिवा वाप्यथवा निशि ॥ प्रातःका
ले फलाधिक्यं चूर्णाधिक्यं तु मध्यतः ॥ पर्णाधिक्यं भवेद्रात्रौ लक्ष्मीवान्सन्नरो भवेत् । अपर्णमूले
भवेद्व्याधिः पर्णाग्रे पापसंभवः ॥ चूर्णपर्णे भवेदायुः शिराबुद्धिविनाशनी त्वमग्रं परित्यज्य शि

४२ रंचैवपरित्यजेत्॥ सुवर्णंखादयेत्पर्णं मायुःश्रीःपुत्रवान्भवेत्॥ अनिधायमुखेपर्णं पूगंखा
दतियोनरः। सप्तजन्मदरिद्रःस्यात्॥ पंचसप्ताष्टपर्णैर्नित्यशोबादवज्रावापिचार्द्रयान्स्वपेद्गत्वा
याविति दैवश्रितुदीरितं। तर्जन्याचूर्णमादायतांबूलंनतुखादयेत्॥ यदिखादयेन्मूढोनरकं
प्रतिपद्यते। मध्यमांगुलिनादाय चूर्णंपर्णेप्रलेपयेत्॥ अंगुष्ठेनाथवाचैवविप्राणामेवनिर्ण
५ श्रा यः। मृताहेचैवतथाश्राद्धे मातापित्रोर्मृतेऽहनि उपवासेचतांबूलंदिवारात्रौविवर्जयेत्॥ पक्षश्राद्धे ७
तथादर्शेयुगमन्वंतरादिषु। श्राद्धेनित्येपुनस्तत्रतुतांबूलंखादयेद्द्विजः॥ मोहाद्भक्षयेत्यःश्राद्धेतां
बूलंयदिखादयेत्॥ श्राद्धंहंताभवेत्तत्ररौरवंनरकंव्रजेत्॥१॥ अथसायंकर्मविधिः॥ रवेरस्तमया
न्मूर्ध्वंघटिकैकापराह्णेभवेत्॥ सायंसंध्यामुपास्याथ कुर्याद्धोमंचपूर्ववत्॥ अथदीपविधिः॥ रवौ
रस्तंसमारभ्ययदिनस्यात्प्रदीपकोनभवेत्॥ यस्यतिष्ठेद्गृहेदीपस्तस्यनास्तिदरिद्रता॥ आयुर्दःप्राङ्मुखो
दीपःधनस्यादुदङ्मुखः। स्यापितायदिचैवस्यादिदुःखदापोश्चतद्दुण्यामुखदासोनदासर्वेनदोषमाता ४३

१५

त्रकश्चन॥९॥ इतिधर्मप्रवृत्तौनित्यकर्मसमासः॥ अथशयनविधिः॥ स्वगेहेप्राक्शिरःकुर्याच्छ्व
शुरेदक्षिणामुखः॥ प्रत्यङ्मुखोप्रवासेचनकदाचिदुदङ्मुखः॥ तृणेदेवालयेचैवपाषाणेचैवपर्व
७३ तेवे। श्मशानेचाश्वदेशेचमध्येपागेगृहस्यतु। रिक्तभूमौतथागोष्ठेपार्श्वेचोच्छिष्टसन्निधौ॥ स्नाना
लयेस्मशानेचवृक्षमूलेचतुष्पथे॥ मातावाभगिनीवापितथावान्यास्त्रीयोपिवा॥ एतेषांसन्निधौ
चैवनस्वपेद्ब्राह्मणःक्वचित्॥ चंदनेनानुलिप्तांगोधृत्वापुष्पाणिदंपती॥ तांबूलंचर्वणंकृत्वाप्रदामैथु
नंचरेत्॥ दीपेनष्टेतुयःसंगंकरोतिमनुजोयदि॥ यावज्जन्मदरिद्रत्वंलभतेनात्रसंशयः॥ पादल
४ धु ग्नंतनुच्छेवबुद्धिंछिद्रंताडनंतथा॥ कोपरोषंचनिर्लज्जंसंयोगेचैवदोषभाक्॥२३॥ अथकश्चिद्विशेषो
लिख्यते। ऋतुमत्यांतुभार्यायांमंत्रसंगादिकंचरेत्॥ अनृतुमत्यांभार्यायांनसंगमितिकेचन॥
गर्भाधानांगसंभूतंयत्कर्मकुर्याद्दिवैवहि। रात्रौकुर्याद्विधानेनगर्भबीजसमर्पणं॥ स्नानादिकंततः
कृत्वायोनिंप्रक्षालयेज्जलैः। पूर्वरात्रव्यतीतोतुप्रविशेत्शयनमंदिरं॥२४॥ पादौप्रक्षालयेत्पूर्वंपश्चा

४४

शय्यां समाचरेत् । पूर्णेंदौ प्युपस्थितः शोतेरितं शय्यां परिस्यजेत् । उपानत्कुं वेणुदंडं मंबुपात्रं तथैव चातां
बूलादिना शय्याधः समीपे स्थापयेत् कृती ॥ कुंकुमं चांजनं चैव अपात्यद्रव्यं च सिंदूरं । धौतवस्त्रं सतां
बूलं संयोगे वस्तु नावहं ॥ नत्वेन्तरेशानमस्कृत्य पश्चाच्छय्यां समाविशेत् । स्नानारिसुखमाप्नोति नत
वेदुखनाशिनी ॥ स्वपेत्स्त्री प्राक्शिरः कृत्वा प्रत्यक्पादो प्रसारयेत् ॥ तांबूलचर्वणं कुर्यात् सकामो ना
यिया सह ॥ तांबूलेन मुखं पूर्णं कुंकुमादिसमन्वितं ॥ प्रातिमः कादसंयुक्तं कृत्वा योगं समाचरेत् ॥ वि
नातांबोलवहनं न गच्छामाक्रोनरोहनं ॥ स्त्रीमुखं चस्तु थायुक्तं संयोगे परिवर्जयेत् ॥ नुत्कानुत्त्वे पति
स्तलशय्यायाम निसन्मुखः संस्मृत्य परमात्मानं पत्न्या जंघोपसारयेत् ॥ अलोमश्चांच सघृष्टांमनिस्त्री ६५
सुमनोहरां ॥ यो निस्पृष्ठा जपेन्मंत्रं विष्णुर्योनिं प्रजापते ॥ योनिप स्पेजुपेन्मंत्रं वसुनिते पुनः । स्त्रियाः ॥ ह्री
मा दृष्ट्वा स्त्र नवेत्पुत्र इति मत्वा समाचरेद्धरिं अपृष्ठौ विवर्जयेद्वाग्मिन्योन्यम विलोकयेत् । सनोध त्वात्तुपा
णिभ्यां मन्योन्यं चुंबयेन्मुखं । बलं देहि इति मंत्रेण योन्यां शिश्नं प्रवेशयेत् ॥ यो नेस्त्र किंचिदाधिको ४४
नवेल्लिंगो बलान्वितः ॥ मनु ॥ संतुष्टो भार्यया भर्ता भर्त्रा भार्या स्त्रथैव च । यस्मिन्नेव कुले नित्यं कल्या १६

हे
णं तत्र वै ध्रुवं ॥ संयोगे चैव नार्यायास्तु ह्रं स्पर्श्व्यीर्यवान् । स्कंधो वाथ करिं धृत्वा यथेष्टं मैथुनं चरेत् ॥
॥ ५ ॥ इच्छापूर्वं भवेद्यावद्युवयोः कामयुक्तयोः । रेतः सिंचेत्ततो योन्यां ततः स्यादंगविनिर्गता ॥ ऋतुकाले तु
गमात्तु प्राप्नोति परमां गतिं । सत्कुलः स्नं वेत्पुत्रः पितृणां स्वर्गदो भवेत् । ऋतुस्नानां तु यो नारीं समीपे नैवो
भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां पितृभिः सह मज्जति ॥ ३ ॥ ऋतुस्नातां तु या नारी पति
नैवोपविंदति । शुना वृका सृगाली स्याच्छूकरी च पुनः पुनः ॥ कामयज्ञविधिः प्रोक्तो रहस्यमेव सर्वे
दा । अनेन जायते पुत्रं संसारार्णवतारणं । ताम्बूलैर्नावस्तुचि स्यात् नादं प्रीति मैथुनं गतौ शयने दुष्टि
ता नारी शुचिस्त्रिरेष्टुचि पुमान् । कृतौ तु गर्ने शंकित्वा स्नानं मैथुनिन स्मृतं । अपत्यौ तु यदा गच्छेद्धे
च मूत्रपुरीषवत् ॥ ६ ॥ इति गर्भाधानं । पुंसवनादिक्रियां अपि लिख्यते । तत्रैव ग्रह्ये उपनिषद्गौमीलंजनं
पुंसवनमनवलोभनं च यदिनादिपात्तृतीये गर्भे मास इति । तथा च कारिकायां । तृतीये गर्भसंस्कारं मा
से पुंसवनं तु वेत् । आद्ये गर्भेन विज्ञातः स्यात् तृतीये मासि वैयदि । चतुर्थे गर्भमासे सि मतो न्वयनं षष्ठाष्टमे
नं

तिस्त्रः॥ कारिका। चतुर्थे गर्भमासे तु सीमंतोन्नयनं भवेत्। पूर्वस्यासंभवे षष्ठमासे यद्वाष्टमे भवेत्॥५ जत
पाचस्मृतिः॥ आधानादष्टमे मासि सीमंतोन्नयनं भवेत्। नवमे मासि वा कुर्याद्यावद्गर्भविमोचनं। प्रयोग
पारिजाते। सीमंतोन्नयनं सोक्तं तिथिवारर्क्षराशिषु। पुंसवं कारयेद्विद्वान् सहैवैकदिने पिवा॥ अन्नप्राशनं।
नासर्वागर्भाधानादिका क्रिया॥ उक्तकाले भवेत्पीतो दोषो नाषाढपुष्ययोः॥५ आमासप्रवृत्तकार्येषु मूढ
त्वं गुरुशुक्रयोः। न दोष इति तद्रामासो लक्षणोक्तवचनानि त्रि। एवं स्मिन् दिवसे पत्नीहविष्ये का ग्रनाद
वेद। हविः श्राद्धपतिः कुर्याद् ब्रह्मचारि भवत्तदा। नयावत्समर्पयेत। पुंसवने च सीमंते तथा चौलोपनाय
ने॥५६॥ अथ गर्भिणीधर्माः। नद्याश्चैवोल्लंघनं यायायाव्रननाव्ररोहणं। नदीप्रतरणं चैव शकटारोहणं त
था। उग्रौषधं तथा क्षारं मैथुनं भारवाहनं। कल्यपुंसवनेचैव गर्भिणी परिवर्जयेत्॥ अथ गर्भिणीपति
धर्माः। ग्रंथे सोनाया गर्भिणी यस्य चासौ सतो नास्त्यो ले दौर कर्मा म नश्यागेहारं न संतनसंस्थापनं च वा
र्धिस्नानं दूरयात्रां न कुर्यात्॥ वाहनं दहनं चैव वपनं सिंधुदर्शनं। पर्वतारोहणं चैव न कुर्याद्गर्भिणी
पतिः॥ मासात्सकपंचमादूर्ध्वं निंदितानि कुरोषकृत्। पंचमासात्परात्यज्याः कुर्वंति मृत्युमेव हि पतरक्षः॥ ५५
ॐ५ गोदाने स्नानमुद्वाहे नांदीश्राद्धं पुरो दिने॥५६॥

कृतुत्रयव्यतीते तु न कुर्यान्मौंजीबंधनं॥ आज्ञाधानं गयाश्राद्धं वपनं तु विवर्जयेत्॥ ६ गर्भिणी
मात्मनः पत्नीं वपनं परिवर्जयेत्। कारयेद्यदि यो मोहात्सर्वेवन्नाण होन भवेत्। गर्भिण्या अपि नार्या
यां सूनोश्चौलं न कारयेत्। गीतं नार्या सुतस्याहं न दोषश्चौलकर्मणि। यस्मादानां गर्भिणी नार्या
४ दो पंचमासात्परं हि पिवा। इत्युक्तं पंचमादूर्ध्वं षष्ठमासाद्युक्त प्रदं सुनोर्मातरि गर्भिण्यां चूडाकर्म च न
सर्वेवे। ऊर्ध्वं तु पंचमान्मासान्न कुर्यान्मौंजिबंधनं। ६॥ षष्ठमासात्परश्चैव न कुर्यात् क्षौरकर्मणि॥ छा ५
स्मश्रुकर्म तथा चैव केचिन्नाकुर्म ब्रूषिणः॥ अथ जातकर्म। कुमारं जातपुरानौ नालच्छेदितात
याच जाते सूते पिता कुर्यान्नांदीश्राद्धविधानतः॥ जातकर्म ततः कुर्याद् नैरालं तु जातपुरा। जात भ ५
पुत्रस्य वारेति श्रुत्वा तत्सो प्रदापयेत्। परितोषकर्मत्यर्थं भूषणं वादनादिकं। देवाश्च पितरश्चैव
पुत्रे जाते द्विजन्मना। आयांति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा॥१०॥ जाते पुत्रे वागाद्याथ श्राद्धं कु
र्याद्विधानतः। जातकर्म विधानेन कुर्यादानादिकं ततः। तत्र दद्यात्सुवर्णं च भूमिं गोतुरगान्रथान्॥
छत्रं छागं चमालं च शयनं वासनं गृहं यावन्नःछेद्यते नालं तावद्द्यात्सूतकं न तु॥ अपरे शौचे मांस

पित्रकर्तव्यं गृहे ऽपि यथाविधि। अग्रतो चरति शुद्धो सोचे जातके पिता। सत्यपिता न कर्म प्रकर्तव्यमेवेत्य
र्थः। ऊर्ध्वं स्नानं विमुक्त्यर्थं स्याज्जातसुतः पिता। अलसन्त्र घ[illegible]नाले तेनावेष्ट्य निकृन्तयेत्। स्वध
तेन अलसन्त्रेण नालमावेष्ट्य छिंद्यादित्यर्थः। जातसूतके कर्तव्यता। निशि स्वयं [illegible] जागरि[illegible]
मे षष्ठे निश्यथ बलिमाहरेत्॥ अर्चयेद्दण्डिकां [illegible] गात्वा[illegible] सर्वसूतके। कृत्वा जागरणं रा
त्रौ दीपे प्रज्वालितपावके। द्वारे वितीयनागेन्तु पुत्रलेख्यापि कज्जले। प्रथमे दिवसे षष्ठे दशमे
मे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। दद्यात्तु प्रथमे दानं षष्ठे वा पंचमे पिता।
दशमे बलिदानं स्यादन्नदानं तथैव च। ७॥ अथ नामकरणं। तत्र कारिका। द्व्यक्षरं नामकरणं
५ श्रा नांहि[illegible] कृते न भवेत्। पुंसां युग्माक्षराणि स्युर्विपरीतानि योषितां। यथा[illegible]नि[illegible]नाति लिख्यते॥
मनुः। नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत्। पुण्ये नक्षत्रे दिवसे मुहूर्ते वा गुणान्विते विशिष्टः।
द्वादशे षोडशे विंशे द्वात्रिंशे दिवसे पिता। नामकर्म द्विजातीनां कर्तव्यं [illegible] द्वात्रिंशाद्दि ४९
वसादूर्ध्वं यावद्वर्षं [illegible] न भवेत्॥ नामकर्मे द्विजैः कार्यमिति [illegible]। आ वर्षात् [illegible] न दोषो स्मृ ५
ष्टो गुरुशुक्रयोः। मलमासे पि [illegible] कालेन दोषभाक्॥ ८॥ अथ पत्नीकुमारोपवेशनं प्रयोगः। १०

रिजाते। संस्कार्यपुरुषो वापि स्त्री वा दक्षिणतो भवेत्। संस्कारकस्तु सर्वत्र तिष्ठेदुत्तरतस्तथा। तथा चाश्व
संतरे। जातके सूतके चैव ह्यन्नप्राशनकर्मणि। निष्क्रमणे च चौले च पत्नी पुत्रस्तु दक्षिणे। गर्भाधाने
पुंसवने सीमन्तोन्नयने तथा। वधूप्रवेशने चैव पुनः संधान एव च। पूजने मधुपर्के च कन्यादाने तथैव च।
कर्मस्वेतेषु वै नार्या दक्षिणे तु प्रवेशयेत्॥ कन्यापुत्रविवाहे च गोदाने व्रतबंधने। आशीर्वादेभिषेके
च पत्नी तूत्तरतो भवेत्। ९। वापिकूपतडागानां प्रतिष्ठायां महोत्सवे। व्रतादौ शांतिके चैव पत्नी स्यादुत्त स५
रतः सदा। शांतिके चैव सर्वेषु प्रतिष्ठोद्यापनादिषु। वामे स्यात्[illegible] पत्नी व्याघ्रस्य वचनं यथा। १०। अथ नि ७
ष्क्रमणं। चतुर्थे मासि निष्क्रमणं पूर्वपक्षाद्वा परपक्षाद्वा[illegible]ति सूत्रं। कारिका। चतुर्थे मासि
निष्क्र४ पुन्ना[illegible] भवेत्। स्नानं स्वलंकृतं बालं निर्हितं स्वस्त्ययनं स्मृतं॥ तथा [illegible] गृहान्निष्क्रमणं सुतो
चतुर्थे मासि कारयेत्॥ यात्रोक्ते समये मासि तृतीये प्रथमे पिता। अथ प्रथममासि कर्तव्यता। पंचमे मासि
कर्तव्यं शिशोश्चैवोपवेशनं। संपूज्य [illegible] कुमारं चोपवेशयेत्। [illegible] व्रीहिश्यामाकगोधूममाषमु
१ उद्गतिलायवा। एषामुपक्रियार्थानां [illegible] अथान्नप्राशनं। षष्ठे मासेन्नप्राशनमिति सूत्रं

कारिका॥ अथ पुत्रेक्षिः षष्ठे तु मासे अन्नप्राशनं भवेत्। कृत्वाभ्युदयिकं श्राद्धं दधिमधुघृतान्नसंयुतं तथा चस्म-
र्तिः। षष्ठाष्टद्वादशे मासि कार्यं चोवान्नमाचरेत्। अयुग्मे मासि वै स्त्रीणां मातिके श्राद्धदुरितं। अथ चौलं।
तृतीये वर्षे चौलं यथा कुलधर्मं चेति सूत्रं। कारिका॥ तृतीये वर्षे चौलं कुर्वीत स्यात्तरायणे शुक्लपक्षे शुभ-
दिने तु कृत्वाभ्युदयिकं ततः॥ तथा च यत्तु केशान्विदुपनीत्या सिद्ध्यते। स्वस्त्यादि वाचयेत् पूर्वं वृद्धि पू-
र्वेषु कर्मसु। मनुः। चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदितं। तृ-
तीये प्रथमे वाब्दे पंचमे सप्तमे तथा। चौलकर्म द्विजः कुर्यात्कुलधर्मानुसारतः॥ अथ चौलवतो नियमः॥
मरणं पाक्षिकं। नग्नः स्नानं चतुर्थं च वृषमारोहणं तथा। त्रिरात्रमशुचि र्भवेत्तु त्रिभिः पक्षो व्येपो
हृति। शवान्ते तथा पेयेवाच्यं वाच्यं गच्छान्ते। अस्मिन्काले न दोषः स्यात् सपावन्नोपनियते॥
अनुपनस्य ये वीर विप्रो मद्यं मोहात् पिबेद्यदि॥ तस्य कृच्छ्रत्रयं पित्रा माता वाप्य
प वा तथा॥ ६॥ तथा॥ अथ चूडाकरणे निषेधः॥ ॥ ॥ ॥ ॥ ५ ४७

अथ चूडाकरणे निषेधः॥ चूडाकर्म शिशोर्माता गर्भिणी यदि वा भवेत्। सा
वा विपत्तिमाप्नोति पत्या वा शिशोरपि॥ शिशोर्मातरि गर्भिण्यां चूडाकर्म न कार-
येत्॥ ~~गर्भक शिशोर्मातरि गर्भिण्यां न चौलोपनायन~~॥ पंचाब्दात्प्रागतोर्ध्वं तु
गर्भिण्यामपि कारयेत्॥ गर्गः॥ शिशोर्मातरि गर्भिण्यां न चौलं नोपनायनं॥ ७
पंचमासात्प्राङ्निषेधो वर्षाद्वूर्ध्वं न दुष्यति॥ १०॥ अथ कुमारलक्षणं॥ ॥
शिशुस्त्वन्नप्राशनात्प्राक् चौलं बालकः स्मृतः॥ कुमारकस्तु विज्ञेयः श्रौतजादा
मौंजीबंधनं॥ शिशोरक्षणं प्रोक्तं बालस्याचमनं स्मृतं॥ रजस्वलादि
संस्पर्शे स्नानं चैव कुमारके॥ अथ कर्मलोपप्रायश्चित्तं॥ आरभ्याधानमा
चौलात्कर्मातीतं तु कर्मिणां॥ आज्यं व्याहृतिभिर्हुत्वा प्रायश्चित्तं समाचरेत्॥ ४८

एतेष्वेकैकलोपेतु पदकष्टं समाचरेत्॥ चौलकर्मण्यतिक्रांते पादकृच्छ्रद्वयं चरे
त्॥ अथाक्षरस्वीकारविधिः॥ द्वितीयजन्मनः पूर्वमक्षराभ्यासमाचरेत्॥
मौंजीबंधेन तपश्चाद्वेदारंभो विधीयते॥ पंचमे सप्तमे वाब्दे पूर्वं स्यान्मौंजी
बंधनात्॥ तत्रचैवाक्षराभ्यासः कर्त्तव्यः सूदगायने॥ बृहस्पतिमतं चैतन्न
दमावेधुनोच्यते॥ सौम्यायनप्रदोषादि चिंतयेन्मौंजीबंधनात्॥ अथ
नक्षत्राणि॥ मृगादिपंचस्वपि तेषु मूले हस्तादिते चित्रितयोश्विनीषु। पूर्वा
त्रयेच श्रवणत्रयेच विद्यासमारंभमुशंतिसिद्धैः॥ हस्तत्रिके श्रोत्रत्रिके
पूर्वासु मृगपंचके॥ मूलाश्विमैत्रपौष्णेषु मुख्यः संस्कार इष्यते॥ आदि
त्यादिषु वारेषु विद्यारंभफलं क्रमात्॥ आयुर्जाड्यं मतिर्मेधा सुधीः प्रज्ञातनु
क्षयः॥२०॥ अनाध्यायः॥ प्रदोषश्च षष्ठी रिक्तास्तथैव च। वर्जनीयाः प्रयत्नेन ५८

विद्यारंभेषु सर्वदा॥ विद्यारंभेशुभाः प्रोक्ता जीवज्ञासितवासराः॥ मध्यमौ सोम
सूर्यौ च निंद्यश्चैव शनिः कुजः॥ उदगते भास्वति पंचमेब्दे प्राप्तेक्षरस्वीक
रणं पशूनां। सरस्वतीं विघ्नविनायकं च गुरुं डोदनाद्यैरभिपूज्य कुर्यात्॥२२॥
एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्॥ पूजयित्वा हरिं लक्ष्मीं देवीं चै
व सरस्वतीं॥ एतेषामेव देवानां नाम्नानुक्रमयाहुतं॥ प्राङ्मुखो गुरुरासीनः
पश्चिमाभिमुखः शिशुः। कुर्यादक्षरसंस्कारं पंचमेब्दे शुभे दिने। कृत्वा
सौमंगलस्नानं नमस्कृत्येष्टदेवता। संपूजयेद्गणाधीशं तथा चैव सरस्वतीं॥
नारायणं महालक्ष्मीं गंधधूपादिभिस्तथा॥ एतेषामेव देवानां तन्मंत्रेण प्र
पूजनं। कृत्वा होमस्वशाखोक्तमाघारांतं समाचरेत्॥ देवतानां च मंत्रेण ना
म्ना च जुहुयाहुतं॥ एकैकां चाहुतिं हुत्वा होमशेषं समापयेत्॥ पाटिकायां सु
वर्णस्य प्रसार्य कुंकुमादिकं। तदभावे कुरोप्य स्य कृत्वा वित्तानुसारतः॥ श्री॥

सुवर्णलेखनीकेन लिखेत्त्वाक्षराणि च ।ॐ नमः शिवायेत्यादौ सिद्धिनामेत्य
नुक्रमात् ॥ अक्षराणि च संपूज्य स्वयमुत्थाप्य वासयेत् ॥ प्राङ्मुखो सौ समासी
नः कुमारस्तानि लेखयेत् ॥ पूजयित्वानु गंधाद्यैः पुनस्त्रीन्वाचयेद्ध्रुव ॥ आ
चार्यं पूजयेद्भक्त्या वस्त्रालंकरणभूषणैः ॥ ३३ ॥ त्रिःप्रदक्षिणमावृत्य देवताश्चा
पि वा गुरुं ॥ स्वविद्यासूत्रकारांश्च स्वविद्यांश्च विशेषतः ॥ ब्राह्मणान्पूजये
द्भक्त्या गंधपुष्पाक्षतादिभिः ॥ तोषयेद्दक्षिणाभिस्तान्यथावित्तानुसारतः ॥ ॥
अथोपनयनं ॥ तत्र देवलः ॥ अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वा ॥ तथा च
मनुः ॥ गर्भाष्टमेब्दे कुर्वीत ब्राह्मणस्योपनायनं ॥ गर्भादेकादशे राज्ञो गर्भात्तु द्वा
दशे विशः ॥ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे ॥ राज्ञो बलार्थिनः षष्ठे वैश्य
स्येहार्थिनोष्टमे ॥ तथा च याज्ञवल्क्यः ॥ आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्स
रात् ॥ ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥ अत ऊर्ध्वं पतंत्येते सर्वधर्म

बहिष्कृताः ॥ सावित्रीपतिता ह्याव्रात्या व्रात्यस्तोमादृते क्रतोः ॥ अथोपनयनकर्तरि ॥ आ
चार्यः ॥ पितैवोपनयेत्पूर्वं तदभावे पितुः पिता ॥ तदभावे पितुर्भ्राता सकुल्यो गोत्र
जो गुरुः ॥ ४० ॥ उपनीयेधिकारी स्यात्पूर्वाभावे परः परः ॥ व्रतबंधं कुमारस्य वि
ना पितुरनुज्ञया ॥ यः करोति द्विजो मोहान्नरकं प्रतिपद्यते ॥ इदं तु दूरस्य
पितृविषयं ॥ तत्र संस्कारस्तत्त्वार्थसारे ॥ औरसः पुत्रिकापुत्रः क्षेत्रजो गूढज
स्तथा ॥ कानीनश्च पुनर्भूतो दत्तः क्रीतश्च सप्तम ॥ दत्तोन्याश्च सहोढिश्च जस्तपवि
द्धसुतस्ततः ॥ एते द्वादश पुत्राश्च संस्कार्याः स्युर्द्विजातयः ॥ केचिदाहुः सुतौ जातौ संस्का
र्यौ कुंडगोलकौ ॥ अमृते च मृते पत्यौ जारजौ कुंडगोलकौ ॥ कलौ दश निषिद्धाः स्युः
दौहित्रं चौरसं विना ॥ संस्कारेण नवं त्वहरिति केचिदुदीरितं ॥ ४५ ॥ तथा च मनुः ॥
य एतेभिहिताः पुत्राः प्रसंगादन्यबीजजाः ॥ यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ॥
अथोपनयने बृहस्पतिबलं ॥ शिरोमणौ ॥ द्विपंचसप्तनंदेशस्थितो जीवश्च

नप्रदः॥ द्विजानां मेखलाबंधे कन्यानां च करग्रहे ॥ जन्मत्रिदशमारिस्थः पूजयाशु
भदो गुरुः॥ चतुर्थो ष्टमस्थश्च द्वादशोपि मतः प्रदाः॥ चतुर्थे द्वादशे जीवे द्विगुणां
पूजयेद्गुरुं ॥ नाष्टमो ष्टमराशिस्थो न तु पूजाशतैरपि ॥ धनुमीनकुलीरस्थो जी
वो जन्मात्यमृत्युदः॥ विवाह मेखलादीनामबलोपि बलप्रदः॥ कर्कमीनधनस्था
पि बटोश्चेद्दष्टमो यदि ॥ अत्याचोक्तं विना वर्षं न कुर्याद्व्रतबंधनं ॥ वृद्धवसिष्टः॥
आचार्यस्य बलं श्रेष्टं बटोरं त्योष्टमो यदि ॥ न विचार्यबलं तत्र कारयेदुपनाय
नं॥ ५२॥ आचार्यस्य बलेहीने बटोर्गर्भाष्टमे यदि॥ न विचार्यबलं तत्र कारयेदु
पनायनं ॥ ऋतु क वर्षेन बलं गुरुश्चेत्तु शांत्या प्रशस्तं व्रतबंधकर्म॥ अप्युक्तव
र्षस्तु बलप्रदो पि नैव तयोर्ल ब्धबलो बली स्यात्॥ अथाचार्यो विशेषमाह॥ ॥
मुख्यकालस्तु बलवान्व्रते गोचरवृद्धतः॥ कालातिक्रमणे चैव व्रतस्थ्शुद्धिं न चिंतये
त्॥ ५३॥ अथोपनयने व्रतबंधः॥ नांदी श्राद्धे कृते पश्चादुल्कापातो ग्नि दृष्टिषु॥

सूतकादिनिमित्तेषु न कुर्यान्मौंजिबंधनं ॥ अथ मातरि रजस्वालायां निर्णयः॥ प्रचेताः॥ ॥
यस्य मांगलिकं कार्यं तस्य माता रजस्वला ॥ तदा न तत्प्रकर्त्तव्यमायुःक्षयकरं हि तत्॥
ज्योतिसारे ॥ उद्वाहं व्रत चूडासु माता यदि रजस्वला ॥ तदा न मंगलं कार्यं शुद्धौ का
र्यं शुभे प्सुभिः॥ प्रारंभो प्राक् विवाहस्य माता यदि रजस्वला॥ निवृत्तिस्तेन कर्तव्या
सहंलंक्रति नो द्दरात्॥ नांदी श्राद्धे कृते पश्चान्माता यदि रजस्वला ॥ मौंजी बंधन कुर्वी
त गार्ग्यस्य वचनं यथा ॥ प्रयोगसारावल्यां गर्गः॥ मातृणां भोजनात्पूर्वं यस्य माता तास्प
शा यदि । तदा कर्म न कुर्वीत यदि कुर्यान्निरर्थकः॥ शौनकः॥ वृद्धिश्राद्धे कृते पश्चात्
बटोर्माता रजस्वला ॥ तदा कर्म न कुर्वीत यावद्भोजनसंयुता ॥ ५२ ॥ षट्त्रिंशन्म
ते ॥ माता स हैव कुंजीतउ र्ध्वं माता रजस्वला ॥ व्रतबंधः प्रशास्तस्यादित्याह भग
वान्मनः॥ नांदी श्राद्धे कृते पश्चात्कन्यामाता रजस्वला ॥ कंन्यादानं पिता कुर्यादितां
गिरस नाषितं ॥ ५५॥ नांदी श्राद्धे कृते यस्य नार्यास्याद्रजस्वला॥ विशोनेव
हे

दोषस्या दोषसान्मौजीबंधने ॥ ६६ ॥ धर्मार्थं कुरुते विप्रो मौजीबंधनमेव च ॥ न दोषो गर्भ
रजसो रित्याह स्मृतिसंग्रहः ॥ अथोपनयनाहस्यानमुहूर्ते भोजनादयः ॥ मात्रा स
हैव कुर्जीयाद्विवाहेनार्ययासह ॥ मात्रा सहैव कुर्जीया भोजमाने कभाजने । शिखांहित्वा
वपत्केशान्स्थापिताकुलधर्मतः ॥ ६९ ॥ शिखास्थानं भवेत्तत्र मध्ये शिरसि वर्तुलं ॥
प्रमाणं तस्य वेदोक्तं नाचार्येणं गुरुत्रयं ॥ ७० ॥ मध्ये शिरसि चूडास्तु वासीष्टानां तु द
क्षिणे । उभयोपार्श्वयोरत्रिकाश्यपानां तु शिखा मता ॥ तथा च स्मृतिः ॥ समाप्य मा
त्रा सह भोजनं च । वहिर्निष्क्रमणं दसनाभिषेकः ॥ अलंकृतिर्जन्मपरिग्रहस्यान्मुखं प
रिक्षेत परस्परं च ॥ कारिका ॥ ब्राह्मणस्योपनयनं मुक्तकाले यदा भवेत् ॥ कृत्वा
तु दयिकं श्राद्धं पूर्वेद्युरपने हनि ॥ कृतस्नानमलंकुर्यादाशिषो वाचयेदथ ॥ कृत
भोजस्य शिरसो वपनं स्नानमेव च ॥ एवं कृतं कुमारं तं मवस्थाप्यांतिके ततः ॥ ज्यो
तिःशास्त्रविदुक्ते तु मुहूर्ते शोभने तथा ॥ इत्यादि स्वशाखोक्तविधिना कर्म कर्त

व्यमित्यर्थः ॥ अथ स्वशाखविषये वसिष्ठः ॥ स्वशाखाविधिमुत्सृज्य अन्यस्य विधिना
चरेत् ॥ अप्रमाणमृषिं कृत्वा स्वं धत्ते मासि मज्जति ॥ स्वकर्म च परित्यज्य यदन्यत
कुरुते नरः ॥ अज्ञानादथवा लोभात्तेन पतितो भवेत् ॥ एकशाखानैव कुर्वीत स्व
कीयं परशाखया ॥ अप्रमादाद्यदि कुर्वीत पुनः संस्कारमर्हति ॥ यत्र नास्ति स्वशाखा
चेदेकशाखा समाचरेत् । पुनर्नार्हति संस्कार मन्यथार्हति चेत्पुनः ॥ यजुःशाखा
विधानेन यदि बह्वृचकर्म च । कृतं चापि हि तत्कर्म पुनः कुर्याद्यथाविधि ॥ ८० ॥ एक
शाखाविधिना कर्म यदि स्यादन्यशाखिनां । न तत्कर्म पुनः कुर्यादिति यज्ञविदां मतं ॥
अथानुप्रवचनं ॥ तिष्टेदहःशेष मस्तूनिति ब्रह्मौदनमिति सूत्रं ॥ कारिका ॥ अहः
शेषं ततस्तिष्टेत्सायंसंध्यामुपास्य च । पूर्णपात्रविधानं तं मुपलेपादि पूर्ववत् ॥ ८३ ॥
अथान्यपक्षः ॥ उपनीतो हि कुर्वीत सायंसंध्यामुपाक्रमात् ॥ अग्निकार्यं ततः कुर्याद्दो
पनायनिकानले ॥ अनुप्रवचनीयं च तस्मिन्नेव हुताशने ॥ समावार ब्ध आचार्यं

५२ काऽऽकृती श्चत्रयं कुनेत् ॥ उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञकं ॥ संध्यामध्याह्निकी कुर्या
न्नाप्यकारो ब्रवीष्यदृष ॥ ८६ ॥ मौंजीबंधनलेकुर्यादनुप्रवचनीयकं ॥ केचिदेवं वदं
त्यग्नौ लौकिके चापरे विदुः ॥ सायं संध्यामुपाक्रम्य ब्रह्मचारी समाचरेत् ॥ ८७ ॥ अ
४ २ पं धुः कृतः स्नानः प्रातः संध्यामुपासयेत् ॥ अग्निकार्यं ततो नी त्वां सायं प्रातस्यपू
र्ववत् ॥ ब्रह्मयज्ञेहि गायत्र्या मध्याह्ने तु समापयेत् ॥ उपाकरणं ॥ संध्यामध्या
ह्निकी कुर्यान्नाप्यकारो ब्रवीदृष ॥ उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञकं ॥ ८८ ॥
अथ ब्रह्मचारिनियमाः ॥ क्षारादी वर्ज्यमिश्री याद्ब्रह्मचारी दिनत्रयं ॥ अधःशा
यी चतुर्थेह्निं मेधाजननमाचरेत् ॥ आचार्यो वाचयेन्मंत्रं सुश्रवः सुश्रवा इति ॥
४ व तत्रैमे खलादीनि विहस्यान्याच धारयेत् ॥ ८९ ॥ नियमेन ब्रह्मचर्यं मदं वापि
समाचरेत् ॥ अन्यथा कर्महानिस्या दिति वेदविदांमतं ॥ वाससी ते गुरवे मेधा
जननकर्मणि ॥ तदातावत् प्रन्चत्लेव कौपीनेन प्रवर्त्तते ॥ स्मृत्यर्थसारे ॥ सदाधा
र्यं द्विजैश्च स्त्रणां कौपीनं कटिसूत्रकं ॥ कौपीनमहतं धार्यं खंडवाचस्त्रपार्श्व ५२

पुक् ॥ ८६ ॥ कौपीनं कटिसूत्रं च यतिस्या ब्रह्मचारिणा ॥ ग्राह्यं नैव गृहस्थस्य श्रौ
ते स्मार्त्ते च कर्मणि ॥ अथ महानाम्निव्रतानि ॥ कारिका ॥ महानाम्न्यादि कुर्वीत तत
काले व्रतत्रयं ॥ उक्तकाले व हाम्येत यत्र न्या ऽउपनीतवत् ॥ नवा मौंजीनवं दंडं द
त्वा स्विष्टकृतं यथा ॥ संवत्सरं चरेद्देत तु तूर्णे हे तु त्तरायणे ॥ अथोपाकर्मंत
त्रैदंस्यद्यं ॥ अथातो ध्यायोपाकरणं मौषधीनां प्रादुर्भावे श्रावणे श्रवण स्यपंचम्यां ह
स्तेन वेति ॥ तथाच कारिका ॥ अनाध्यायानामुपाकर्म श्रावण्यां श्रवणेन तत् ॥
तन्मासहस्तयुक्तायां पंचम्यां च तदिष्यते ॥ ९० ॥ अपवृष्टो बधयस्त स्मान्मासे तु
नन्न वंतिचेत् ॥ तदा भाद्रपदे मासि श्रवणेन करोति तत् ॥ साकलकशाखकः ॥
मासद्वये स्युपाकर्म न नवेद्य दिवै तदा ॥ आषाढे कु श्रवणे कुर्या द्धस्ते वा कर्क
टे रवौ ॥ तदभावे प्यन्यस्मिन्मासे श्रावणं कुर्यान्नो गयन इति ॥ आचार्यः ॥ कु
र्यान्न वोपनीतस्य श्रावणे ध्ययनं नवं ॥ तदूर्ध्वं वाप्रकुर्वीवीत तैर्वा वा कुर्याद्दधः क

चेत्॥ यदि चेद्धनुर्द्वयाव्यापी विष्णुर्क्षं घटिकाद्वयं॥ तत्कर्म सफलं ज्ञेयमुपाकर
णसंज्ञकं॥१॥ पर्वण्यो यदि केकुर्युः श्रावणी तैत्तिरीयकाः॥ बह्वृचाः श्रवणे कुर्युः
हस्ते सामवेदिनां॥२॥ छंदोगानां सिंहार्क एकावोक्तः॥ सिंहार्क एव कर्त
व्यं न कन्यार्के कदाचन इति वचनात्॥ धनिष्ठासंयुतं कुर्यात् श्रावणं कर्म यद्भ
वेत्॥ तत्कर्म सफलं चेति स्यादुपाकरणसंज्ञकं॥३॥ संक्रांतौ ग्रहणे चैव म
७० त्ययोर्गुरुशुक्रयोः॥ उपाकर्म न कर्तव्यं मृतके सूतकेपि च॥ गर्गः॥ अर्धरा
त्रादधस्ताच्चेत् संक्रांतेर्ग्रहणं न वेत्॥ उपाकर्म न कर्तव्यं परतश्चेन्न दोषभाक्॥
गुरुभार्गवयोर्मूढे बाल्ये वा वार्द्धकेपि वा॥ तथाधिमासे संसर्पे मलमासा
दिषु द्विजैः॥६॥ प्रथमोपाकृतिर्नस्यात् कृतं कर्म विनाशकृत्॥ प्रत्यब्दिकं तु यत्क
र्म क्रियमाणं न दुष्यति॥७॥ अथोत्सर्जनं॥ ततोत्सर्गं षण्मासान्नधीयतेति
सूत्रं॥ कारिका॥ अनध्यायोत्सर्जनं माघ्यां पौर्णिमास्यां विधीयते॥ ॥ ५२

६

ग्रामाद्बहिर्विविक्ते स्यादुपले पादि पूर्ववत्॥ मनुः॥ पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्जनं
भवेत्॥ माघे शुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि॥ उत्सर्जनं भवेत्तच्चेदुक्तकाले तु
वै यदि॥ उपाकरणकाले तु कुर्यादुत्सर्जनं बुधैः॥१२॥ कार्ष्णाजिनि॥ उपाकर्मणि
चोत्सर्गे गौतमादिश्व सप्तवे॥ ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः॥ अनध्या
या# स्मृतो सिद्धापरिहृत्यैव धीयते। यस्त्वपूर्वमधीते सौ प्रारब्धे तु शुभेहनि॥ अ
थानध्यायानाह॥ पक्षद्वये चतुर्दश्यामष्टमी द्वितयं तथा॥ प्रतिपद्दोद्दर्शी पौर्णी ७१
चानध्यायाः प्रकीर्तिताः॥ चातुर्मास्यद्वितीयासु युगमन्वंतरादिषु॥ अष्टकासु च
सर्वासु --------- ॥१६॥ अयने विषुवे चैव श्रवणद्वादशी तथा॥ शयनीबोधि
नी चैव द्वादशी परिकीर्तिताः॥ द्वितीया प्रेतपक्षस्य भरसवेत् प्रेतसंज्ञिका॥ आ
श्विनस्य तु या शुक्ला द्वितीया प्रेतसंज्ञिका॥ भरणी प्रेतपक्षस्य ~~[illegible]~~ द्वितिया
पि तथैव च॥ अनध्यायास्त्विमे प्रोक्ता इति निश्चित्य महर्षिभिः॥ अथ नैमित्तिका

नाह ग्रामदाहादिकानपि ॥ राकाचतुर्दशीचैवतथासंख्याचतुर्दशी ॥ २९ ॥ निर्घातोन्न
मिचलने ज्योतिषां चोपमार्जने ॥ एतानाकालिकान्विंद्यादनध्यायानृतावपि ॥ चातुर्मा
स्यद्वितीयास ह ॥ शुचावूर्जे तपस्ये च या द्वितीया विधूदये ॥ चातुर्मास्यद्वितीयास्ता ।
प्रवदंति महर्षयः ॥ अथ युगाद्यः ॥ माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी ॥ तृती
या माधवे शुक्ले नवम्यूर्जे युगाद्यः ॥ २४ ॥ अथ मन्वाद्यः ॥ अश्वयुक्शुक्ल नवमी द्वा
दशी कार्त्तिकी सिता ॥ तृतीया चैत्र मासस्य सिता भाद्रपदस्य च ॥ श्रावणस्याष्टमी कृ
ष्णा पौषस्यैकादशी सिता ॥ सिताषाढस्य दशमी माघमासस्य सप्तमी ॥ श्रावणे चा
प्यमावास्या ज्येष्ठे पंचदशी सिता ॥ आषाढी कार्त्तिकी माघी चैत्री मन्वाद्यः स्मृताः ।
अथाष्टकाः ॥ मार्गे पौषे तथा माघे नभस्ये फाल्गुने तथा ॥ कृष्णपक्षेष्टकास्तिस्रः
स सम्पादिय थाक्रमं ॥ अथ सोपपदा ॥ ज्येष्ठ शुक्ल द्वितीया च ह्याश्विने दशमी सि
ता ॥ चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥ मृगकर्कटसंक्रांति द्वे उद

गदक्षिणायने ॥ अथ चैव तुलामेषौ विषुवौ तौ प्रकीर्त्तिताः ॥ २२ ॥ चतुर्दश्यां यदा दायप्रा
गस्ता द्दश्पतेरवे ॥ अनध्यायं प्रकुर्वीत त्रयोदश्यां तु सर्वदा ॥ अपसायं प्रातरादस
त्रयोदश्यानुवर्त्तते ॥ अनध्यायो न वै तत्र भूतेदर्शी न वेद्यदि ॥ वेदविद्भिः समाख्या
तासैव संध्या चतुर्दशी ॥ अनाध्यायेष्वधीयानां हदेवेंद्रः महरे ध्रुवं ॥ २२ ॥ हताद्द
डेन च जोहान्म तास्वर्गं न यांति हि ॥ नामनूनस्त्वनध्याये होममंत्रेषु चैव हि ॥ वे
दोपाकरणे चैव स्वाध्याये चैव नित्यके ॥ अथ प्रदोषः ॥ षष्ठी च द्वादशी चस्यादर्ध
रात्रादधो यदि ॥ न च नाड्यस्तृतीया चेत् प्रदोषो मुनिभिः स्मृतः ॥ युगः सप्त त्रयो
दश्यावर्त्तते स्तमयोदधः ॥ प्रदोषं तत्र कुर्वीत द्वे काष्ठ घटिकास्तु च ॥ युगश्चतुर्थी
सितसप्तमी ॥ अथ गोदानं ॥ गोदानं स्नातकं चैव समावर्त्तनकं तथा ॥ चौलोपन
यनं चैव न कुर्याद्दक्षिणायने ॥ २३ ॥ मरिचीः ॥ गोदानमकृतस्येह विवाहश्चेत्युप
स्थितः ॥ याम्यायनेपि कुर्वीत गोदानं स्नातकं च वै ॥ चकारात्समावर्त्तकं ॥ ॥

एतेनगोदानंषोडशेवर्षेकेशान्दितुश्मश्रूशाश्चान्कारयेदितिसूत्रं॥तथाचकारि
का॥गोदानंचौलवत्कार्यंषोडशेब्देतदुच्यते॥अंकोपवेशनंनास्तिश्मश्रूणांमुंड
नंभवेत्॥ ॥अथसमावर्त्तनं॥अधेतान्नुपकल्पयीतसमावर्त्तमानइतिसूत्रं॥
कारिका॥वेदव्रतानिवापारंनीत्वाह्युभयमेववा॥व्रतेपरस्तुशाचार्यंनास्ययाध्य
यनेकृते॥४०॥विद्यांतेगुरुमर्घेनकर्मार्थिकरवाणिते॥यमर्घमहतंकृत्वाततो
नुज्ञामवाप्यच॥कुर्वीतस्वयमेवैतत्समावर्त्तनसंज्ञकं॥प्राप्योदगयनाद्युक्तमुक्तः
स्वस्त्ययनःस्वयं॥अथस्नातकः॥विद्यांतेगुरुमर्घेननिमंत्र्यकृत्वानुज्ञांतस्यवास्ना
नंतस्येवव्रतानिभवंतीतिसूत्रं॥कारिका॥अथशिष्यःसमावर्त्तानमोपाभुर्गुरो
र्वदेत्।उक्षेरूर्ध्वंवदेस्थानमिदमस्येष्टनाश्रमं॥हिदैवदत्तगार्हस्थ्यवस्यामोनो
इतिलक्ष॥यथाचारंयथाकुर्यादेकस्मिन्नपिवादिना॥४६॥गोदानादीनिकर्माणि
विवाहात्पूर्ववासरे॥एकतंत्रेणवाकुर्यादितिवेदविदोविदुः॥४७॥अथमधु

पर्कादिविवाहः॥स्नातिजोढ़ुतामधुपर्कमाहरेत्स्नातकायोपस्थितायेत्यादिमधुपर्को
भवतीत्यंतः॥मनुः॥गुरुणानुमतःस्नात्वासमावृत्तोयथाविधि।उद्वहेतद्विजोभार्यां
सवर्णांलक्षणान्वितां॥यस्यास्तुनभवेद्भ्रातानविज्ञायेतवापिता।नोपयच्छेततां
प्राज्ञःपुत्रिकाधर्मशंकया॥५०॥समानप्रवरांकन्यांसपिंडांचैवगोत्रजां॥नैवतांवर
येत्प्राज्ञोमातृतःपरिकीर्त्तिता॥वाग्दानंचप्रदानंचवरणंपाणिपीडनं॥सप्तपदीति
पंचविवाहःपरिकीर्त्तिताः॥तत्रवाग्दानं॥कुर्याद्वैवाहिकेमासिवाग्दानंद्विजसत्तमः॥
कलशेनसमायुक्तंसंपूज्यगणनायकं॥संपूज्यद्विजदेवानांकर्मणामेसुतायवै।त
यास्त्रीक्रियतामद्यसुरूपादीयतामया॥कायेनमनसावाचासंप्रीत्याधर्मवृद्धये॥
पुत्रमित्रसुहृद्वर्गैःसमवेतेननिश्चितं।कन्यातेमनुपुत्रायस्वीकृतायमयाद्यवै॥
एतेषांसन्निधावेवंममवंशानुवृद्धये॥५१॥समंधगोत्रमुच्चार्यदत्तावरायतां
पिता॥हस्तेपितुर्वरस्यापितांबुलंसाक्षतंफलं॥दासेहंतवविप्रायसुरूपांमम

कन्यकां ॥ आसाद्य विवाहार्थं द्रव्यमंगलकानि च ॥ स्वीकृताय मम पुत्राय मयाद्यं त
व कन्यका ॥ सफलं चाक्षतं दद्याद्यथाचारः परस्परं ॥ अथ प्रदानं ॥ कन्यायावरणा
त्पूर्वं प्रदानं चैव कारयेत् ॥ संपूज्य कन्यकां दद्याद्वस्त्रालंकारभूषणं ॥ लब्ध्वाशिषो
यतेभ्यश्च दद्यात्सुकानि च ॥ ६० ॥ अथ वरणं ॥ प्रार्थयेद्दद्यसंपूर्णं मधुपर्केण पूजि
तः ॥ मद्दर्थं वृणीध्वं कन्यामिति दद्याच दक्षिणा ॥ गोत्रोद्भवस्य गोत्रस्य संबंधस्यानु
कस्य च ॥ नप्त्रे पौत्राय पुत्राय ह्यमुकाय वराय वै । कन्यायां अपि गोत्रस्य यथापूर्वं व ५९
दच्चरेत् ॥ नप्त्रीमथ च पौत्रीं च पुत्रिकन्यां यथाविधि ॥ ६१ ॥ कन्यासमीपमागत्य ब्रा
ह्मणैः सह वै पिता ॥ इत्युक्त्वा नौ द्विजा यूयं वृणीध्वं कन्यकामिमां ॥ प्रत्युक्तो द्विजाः
सर्वे वयं चेमां वृणीमहे ॥ ६२ ॥ त्रस्तूक्तं ते तिस्त्रक्तं वेजपेद्युब्राह्मणा सह ॥ अ[illegible]थोवाथ
वच्चलारो ब्राह्मणा वेदपारगाः ॥ कन्यायावरणे चैव योज्याकर्म विदोहिये ॥ गच्छ
न्नश्रणोति वाक्यानि पक्षिणामप्रियाणि च ॥ ६३ ॥ जपेत्कनिक्रदत्सूक्तं देवीवाच

मचंतया ॥ अथ पाणिपीडनं ॥ गृभ्णामि ते सौभगत्वाय हस्तमितं दृष्टमेव च ॥ गृह्णी
यादितीके पाणिपीडनमाह ॥ वृत्तिकारः ॥ अथ सप्तपदी ॥ अथ सुक्रामयई शान्याव
र्धं सप्तपदानि तु ॥ सान्युक्रामयेत्पूर्वं दक्षिणं पादमात्मनः ॥ इति प्रसंगतः ॥ पंचां
गो विवाहो दर्शितः ॥ अथ मधुपर्कः ॥ द्विराचम्य समासीनः कर्ता पश्चान्मुखो वरं ॥
प्राङ्मुखं तं समासीनं मधुपर्केण पूजयेत् ॥ ६८ ॥ कुलमग्रे परीक्षेत ये मातृतः
६सा पितृतश्चेति यथोक्तं पुरस्ताद्बुद्धिमते कन्यां प्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरो
गामुपयच्छेतिसूत्रं ॥ कारिका ॥ यथोक्तलक्षणां कन्यां मुक्तकाले समुद्वरेत् ॥
साहस्युदयिकं श्राद्धं पूर्ववद्दायवासरे ॥ अपरेद्युः कृतस्नानो हृतवस्त्रधरो वरः ॥
स्वलंकृतः सितः श्वत्रः पदातीर्यातिबांधवैः ॥ इतो वधूर्वहं गत्वा मधुपर्केण
पूजितः ॥ स्वगृह्योक्तेन विधिना कृत्वा कन्यां स्वलंकृतां ॥ ७२ ॥ वरो प प्रति
गृह्णीयास्त्वशेषोक्तविधानतः ॥ देशाचारानुधर्मेण विवाहः कार्यमेव तु ॥

तथा च सूत्रं ॥ यथ खलु उच्चावच जनपद धर्मा ग्राम धर्माश्च तान्विवाहे प्रति
यादिति ॥ अलंकृतकन्यामुदकपूर्वां दद्यादेष ब्रह्मो विवाह इत्यादि ॥ रुदंति
रुदंतीं हरेत्स राक्षस । इत्यंतमष्टधा विवाहः ॥ तथा च मनुः ॥ ब्राह्मो दैवस्तथा
वार्षः प्राजापत्यस्तथासुरः ॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो धमः ॥ २१ ॥
चत्वारो ब्राह्मणस्याद्याः प्रशस्ताः कवयो विदुः ॥ राक्षसः क्षत्रियस्यैक मासुरं वै
श्यशूद्रयोः ॥ आच्छाद्य चार्हइत्वा च श्रुतिशीलवते स्वयं । आहूय दानं कन्या
याः ब्राह्मो धर्मः प्रकीर्तितः ॥ यज्ञे तु वितते सम्यकृत्विजे कर्म कुर्वते ॥ अ
लंकृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥ एकं गोमिथुनं द्वे वा वराहादाय धर्म
तः ॥ कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ सहोभौ चरतां धर्ममिति वाचानु
भाष्य तु ॥ कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधीः स्मृतः ॥ ज्ञातिभ्यो द्रविणं दत्वा कन्या
यै चैव शक्तितः ॥ ८ ॥ कन्याप्रदानं योदद्याद्दासुरो धर्म उच्यते ॥ इच्छयान्योन्यसंयो

गः कन्यायाश्च वरस्य च ॥ गांधर्वः स तु विज्ञेयो मैथुन्यः कामसंभव ॥ हत्वा छित्वा च भि
त्वा च क्रोशंतीं रुदतीं गृहात् ॥ सप्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ सुप्तां
मत्तां प्रमत्तां वा रहो यत्रोपगच्छति । स पापिष्ठो विवाहानां पैशाचः प्रथितो
ष्टमः ॥ संतिष्ठेत प्राङ्मुखी कन्यां तिष्ठेत्प्रत्यङ्मुखो वरः ॥ मुहूर्ते शोभने काले वै
तर्धायां वरं तयोः ॥ स्वक्षतान्कुसुमं तैस्तु क्षिपेतां शिरसो मिथः ॥ ८५ ॥ ॥
क्षिपेत्कन्याक्षतान्पूर्वं पश्चात्तेन क्षिपेद्वरः ॥ ऋचवेत्यादि निर्मंत्रैः क्षिपे
युरक्षतां द्विजाः ॥ आशिषो वाचयित्वाथ यथाचारं यथाचरेत् ॥ ततांश्च प्रा
ङ्मुखस्तिष्ठेत्सन्नार्यः कन्यकापिता ॥ प्राङ्मुखः स्वस्थितायाथ कान्याद्दद्या
द्वरायवै ॥ अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते । इतरेषां तु वर्णानामि
तरेतरकन्यया ॥ ईप्सतोरक्षणार्थाय बध्नीयात् कंकणं तयोः ॥ करयोरेकने

कस्य बध्नीयात्तानु दंपती ॥ अनादेशे दक्षिणं प्रतीयादिति भाष्यकारः ॥ ९५ ॥ शौ
नकः ॥ द्विगुणेनैव सूत्रेण पंच धा वेष्टनं तयोः ॥ ततोप्यधोधचोर्ध्वाधः प्रको
ष्ठे बंधनं तयोः ॥ तथा च स्मृतिः ॥ रक्षार्थं दक्षिणे हस्ते बध्नीयात्कंकणं तयोः ॥ बं
धनं कन्यका पूर्वं वरपूर्वं विमोचयेत् ॥ सूत्रं चतुर्गुणं कृत्वा दंपत्योर्वेष्टनं च
येत् । रक्षार्थं कंकणं प्राकुराविकेन समन्वितं ॥ विश्वे नात्ते त्वचं पुंसां बध्नी
याद्दक्षिणे करे ॥ पादौ वामकरे स्त्रीणां हस्तामेत्वचैव तु ॥ इत्यनेन केचन कं
न्याया वामकरे बध्नंति ॥ सकश्चिद्देशाचारः ॥ देशधर्मानुसारेत इति व्यवस्था
ज्ञातव्या ॥ कन्यायै वाससी दत्वा बध्नीयाद्वाससी तयोः ॥ बध्नीयान्मंगलं सूत्रं
कुंकुमोक्तसुशोभनं ॥ इत्यादिकं प्रकुर्वीत देशधर्मानुसारतः ॥ उक्तौ वे
देव्रते यान्यां होमस्तत्र विधीयते ॥ ९६ ॥ अथ वेदीलक्षणं ॥ हस्तोच्छ्रितां च
तुर्हस्तां चतुरस्रां समंततः ॥ स्तंभैश्चतुर्भिः संयुक्तां विवाहे वेदिका स्मृतं ॥ ५८

विस्ताविता हस्तं चतुष्टयेन हस्तोच्छ्रितं मंदिर वामभागे ॥ स्तंभैश्चतुर्भिः कृतनि
र्मितां जीवेद्दीविवाहे प्रवदंति संतः ॥ १०० ॥ अन्यपक्षः ॥ कंन्याहस्तैः पंचभिः सप्तभि
र्वा देवीं कुर्यात्कुर्मपृष्ठे च्छ्रितां गीरम्यां हर्म्यकारये वामभागे ज्यायापत्योराशिषो
वाचयित्वा ॥ अथ व्रतबंधवेदिका ॥ प्राक्पश्चिमा धर्वपदषट्कयुक्ता तु दीच्य
याम्यानि पदानि पंच एवंविधा ज्योतिषरत्ने निर्मिता बटोः प्रशस्ता भवती
ह वेदिका ॥ अन्यपक्षः ॥ आचार्यस्य पदैः षड्भिश्चतुर्भिरथवा करैः ॥ विस्तीर्णां
ता चतुरस्रा च बटोर्वेदी करोन्नता ॥ ३ ॥ अंवाभित्ति द्विहस्ता स्यादुन्नतात्रिंश
दंगुला ॥ प्रत्यग्वेद्या विवाहे च विस्तृता द्वादशांगुला ॥ अथावेष्टो प्रकुर्वीत
सोपानानयपार्श्वयोः ॥ नंद्यग्रे चकशाकारमिति यज्ञविदां मतं ॥ अथ पीठं ॥
अष्टत्रिंशांगुलं दीर्घमुन्नतस्यात्षडंगुलं ॥ अथ अंगुलं च विस्तारं कुर्या

६९
५८ दौदुंबरादिकं ॥ अथ होमः ॥ कारिका ॥ होमदेशं व्रजेयातं परिगृह्य करेऽर्थिय ॥
आत्मनो दक्षिणे पार्श्वे वधूनां मुपवेशयेत् ॥ ६ ॥ विवाहस्याह्नि यस्मिन् दिवा वा
यदि वा निशि ॥ होमं तत्रैव कुर्वीत यथानुक्रमेण तु ॥ होम इति विवाहहोमः ॥
इत्यर्थः ॥ तावद्विवाहो नैव स्याद्यावत्सप्तपदी भवेत् ॥ तस्मात्सप्तपदी कार्या विवाहेषु
निश्चिःकृता ॥ इद्यमन्त्रः ॥ एकत्वं संगता भर्तुः पिंडगोत्रे च सूतके ॥ स्वगोत्राद्
भ्रश्यते नारी विवाहात्सप्तमे पदे ॥ गृहप्रवेशहोमं तु होमं वैवाहिकं च हि ॥ एकतन्त्रेण
वा कुर्यादेकस्मिन् नक्षत्रेऽपि च ॥ स्ववामे सामगः पत्नीं जाजा... ...लोपवेशयेत् ॥ य
... सप्तपदादूर्ध्वं होमान्ते चैव बह्वृचः ॥ सायमौपासनं कुर्यादस्तं याते दिवाकरे ॥
समार्येविधिनाचैव तस्मिन्नवकृताशने ॥ १२ ॥ कारिका ॥ अथ यस्मिन् विवाहाग्नि
हन्यन्नोहनितस्यतु ॥ तत्सायं तानि मारभ्य वह्निं परिचरेत्स्वयं ॥ रात्राव तीतः काले
श्वेतू श्वः सायं तदुपक्रमः ॥ आत्मनो संनवेत्पाग्निपुत्रादय इति स्थितिः ॥ अथ परा ५६
७२

६२ त्रिनागः ॥ रात्रौ विनागं कुर्वीत द्वौ नागौ पूर्ववासरे ॥ परस्मिन् तृतीयो भोगोऽपि विवा
हे सूतके सति ॥ मध्येऽपग्नौ नष्टे सति ॥ चतुर्थमध्ये धनजे विजग्ने संधानमग्नेस्त्वप
जो किकाग्नौ ॥ औपासनात्पूर्वमथापि नष्टे विवाहहोमं विधिवच्च कुर्यात् ॥ १६ ॥ विवाह
मासनात्पूर्वमजने शांतिमागते ॥ परिणीयादिकं कृत्वा होमशेषं समापयेत् ॥ अथ
कन्यार्तुमती चेत् ॥ प्रयोगपारिजाते ॥ ॥ विवाहहोमे त्वतिक्रांते कन्या यदि रजस्वला ॥
त्रिरात्रं दंपती स्यातां पृथक्शय्यासमाशने ॥ चतुर्थेऽह्नि सुस्नाता तस्मिन् ग्नौ यथा
विधि ॥ विवाहहोमं कुर्यात्तं कन्यादानादिकं तथा ॥ चतुर्थमध्ये कन्या चेद्भवे
द्यदि रजस्वला ॥ त्रिरात्रमाशुचिस्सैका चतुर्थेऽहनि शुध्यति ॥ २० ॥ युञ्जानहो
मं कुर्वीत प्रायश्चित्तं विधीयते ॥ श्रियं संपूजयेत्कन्यां पुनर्होमो विधीयते ॥
अथ रात्रौ दानं ॥ कन्यादानं निशीथे चेद्दिवा भोजनमाचरेत् ॥ पुनः स्नात्वा
... जपेद्देवीं पिता कन्यां प्रयच्छति ॥ नुत्का समुद्वहेत् कन्यां सावित्रीग्रहणं यथा ॥

गंधर्वासुरयोरेवविधिरेषउदाहृतः॥२३॥अथकन्यादानः॥पितापिताम
होभ्रातापितृव्योगोत्रिणोगुरुः॥मातामहोमातुलोवाकन्यायाबांधवाःक
मात्॥पित्राद्यभावेतुकन्याकुर्यात्स्वयंवरं॥इत्येवंकेचिदाचार्याःप्राहुर्मह
तिसंकटे॥अथान्यशाखिनेदानं॥स्वशाखांचेद्वरोनस्यात्कस्मैदेयाचकन्य
का॥स्वगृह्योक्तविधानेनदद्यात्तांपरशाखिने॥२६॥पूजयेन्मधुपर्केणस्वशा
खाविधिनावरं॥अपकन्यादानपर्यंतंपिताकुर्यात्स्वशाखतः॥२७॥अथदंपति
नियमः॥तत्रैवसूत्रे॥अतऊर्ध्वमक्षारालवणाशिनौब्रह्मचारिणौवलंकुर्वा
णौअधःशयानौस्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंचैकर्षिरिति॥अत्रस्मृतिः॥
विवाहेदंपतीस्यातांत्रिरात्रंब्रह्मचारिणौ॥अलंकृतावधश्चैवसहशय्यासना
शिनौ॥कारिका॥वध्वासहैवकुर्वीतनिवासंश्वशुरालये॥चतुर्थमत्रैवके ६०

चिदहंति॥अथचतुर्थी॥उत्थायापररात्रेतुचतुर्थ्यांकन्यकापिता॥कुर्वीतमंगलं
स्नानंनार्याचैवहितस्सतु॥३१॥दंपतीमंगलस्नानंकृत्वावस्त्रेचधारयेत्॥ताभ्यां
चवाससीदद्याद्देशीणीहृजयेद्ध्य॥चतुर्थीमध्यजायंतेदोषायदिवरस्यचेत्॥
दत्तामपिपुनर्दद्यात्पितान्यस्मैविदुर्बुधाः॥आचार्यः॥प्रवरैक्यादिदोषास्युःप
तिसंगादधोयदि॥दत्तामपिहरेद्दद्यादन्यस्मैइतिकेचन॥३३॥हेमाद्रौ।कलौतु
पुनरुद्वाहंवर्जयेदितिगालवः॥कस्मिंश्चिद्देशइच्छंतिनतुसर्वत्रकेचन॥इति
पुनरुद्वाहं॥वरस्यपितृमात्रेचदद्याद्वस्त्राणिवैततः॥वरःमातुःकरेदद्याद्वं
शपात्रंसपूजितं॥३६॥बलिदानंततःकुर्याच्चतुर्दिक्षुयथाक्रमं॥अनेनबलि
दानेनप्रियतामितिदेवता॥वंशदानमिदंपुण्यंवंशानांवंशवर्द्धनं॥वंशस्स
दीयमातेदानमतःशांतिंप्रयच्छमे॥अस्मद्दादिषुरुंधुसुत्रायांतिभव

६१

५१ कृदं ॥ मातः पाजयमावेन कन्याकृपणवृक्षसर्जां । कन्यासंपालितास्मानिःकृष्णमे
तच्च जन्मनः ॥ दीयते ते सुता याद्य प्रीयेते पार्वतीपतेः ॥ ४० ॥ कन्यासंपालिता वान्या
मतिस्नेहेन पुत्र[?]वत् ॥ इदानीं तव पुत्राय दत्ता स्नेहेन पाल्यतां ॥ इति चतुर्थी
कर्म ॥ अथ गृहप्रवेशः ॥ तत्रेदं सूत्रं ॥ प्रयाणउपपद्यमाने पूषा त्वेतो नयतु
हस्तगृह्येति यानमारोहयेदिति सूत्रं ॥ कारिका । विवाहानंतरं गच्छेत्स
भार्यः स्वस्य मंदिरं ॥ यदि ग्रामांतरे तस्मात्तत्र यामेन गम्यते ॥ विवाहमारभ्य वधू
प्रवेशो मध्ये शुभः षोडशवासरस्य ॥ निषिद्धवारातिथियोगदोषा न यत्र चैवं मुन
यो वदंति ॥ आषोडशादिनाद्वर्ण्यं वधूप्रवेशने ॥ तिथिवासरताराणां दोष ६०
स्तत्र विधीयते ॥ तथाचारस्तथैव कार्यः ॥ विवाहमारभ्य वधूप्रवेशो युग्मे दिने
षोडशवासरावधि ॥ न चासमाने यदि पंचमेह्निः शस्तस्तदूर्ध्वं न दिवा प्रशस्तः ॥ ६१

॥ वधूप्रवेशनं कार्यं पंचमे सप्तमेपि वा ॥ नवमे वा शुभे वारे शुभलग्ने शशिनो बले ॥ ॥
उद्वाहे चतुरष्टषड्दशादिने शुभं वधूप्रवेशनं ॥ मासे तु द्विचतुःषष्टदशासु अोपं
चआयुःप्रदं ॥ वर्षेषु द्विचतुःषडष्टमशुभं पंचादिमुख्या परैः ॥ पूर्वाह्णे प्रमनोर
थाविप्नव होव धाप्रवेशो भवेत् ॥ ५१ ॥ वधूप्रवेशो न दिवा प्रशस्तो नृपप्रवेशो न
निशि प्रशस्तः ॥ दिवाचरात्रौ च गृहप्रवेशः सकीर्तितस्त्रिविधः प्रवेशः ॥ अ
थ देवकोत्थापनं ॥ समे च दिवसे कुर्याद्देवकोत्थापनं बुधः ॥ षष्ठे च विषमे नेष्टस्त्य
क्त्वा पंचमसप्तमौ ॥ प्रतिष्ठादिनमारभ्य षोडशाहा च मध्यतः ॥ मंडपोद्वासनं कुर्या
दुद्वाहे च व्रते दश ॥ ५२ ॥ व्रत इति उपनयने दशाहान्मध्य इति अर्थः ॥ विवा
हात्प्रथमे पौषे आषाढे चाधिमासके ॥ न चरेत् गृहे वासो चैत्रे तातगृहे तथा ॥ ॥
वंशपात्रविनायक मंडपोद्वासनं यदि ॥ अज्ञानात्कुरुते मूढो दंपत्योः क्षयमापु
षः ॥ ज्योतिर्निबंधसारे ॥ वरे देशांतरगते त्रीन्ऋतून्संप्रतीक्ष्य वै ॥ कन्यामन्यस्मै प्रदा

तव्यावाग्दाने च कृते सति ॥ पंचत्वं चेद्वरो गच्छेद्वाग्दाने यदि वै कृते ॥ कन्या मन्त्रेण प्रदा
तव्या तथा सप्तपदान्तुरा ॥ कृते सप्तपदे भर्तुः वियोगो यदि जायते ॥ न दोषः पुन
रन्यस्मै कलौ कन्या मनीषिभिः ॥ अथ प्रातिकूल्यं ॥ स्मृतिचंद्रिकायां ॥ कृते वाङ्नि
श्चये पिस्यान्मृत्युर्भर्तृस्य गोत्रिणां ॥ तदा न मंगलं कार्यं नारी वैधव्यदं ध्रुवं ॥
गुरुः ॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः ॥ तदोद्वाहे नैव कार्यः स्वपक्ष
क्षय दोषतः ॥ वृद्धशौनकः ॥ वरवध्वोः पिता माता पितृव्यश्च सहोदरः ॥ एतेषां प्र
तिकूलं चेन्महाविघ्नप्रदं ध्रुवं ॥ पितापि महश्चैव माता चैव पितामही ॥ पितृव्य
स्त्री सुतो भ्राता भगिनी चाविवाहिता ॥ ६२ ॥ एभिरेव विपन्नैश्च प्रतिकूलं बुधैः
स्मृतं ॥ अन्यैरपि विपन्नैस्तु केचिदूचुर्न तद्भवेत् ॥ ६३ ॥ मांडव्यः ॥ दंपत्योः पित
रो भ्राता उपनीतस्तु सोदरः ॥ पितृव्यता दृशी श्चैव पितामह पितामही ॥ एषा ६२

मन्यतमः कश्चिन्मृतो भवति मानुषः ॥ कृते वाङ्निश्चये त्वेषां प्रतीकूलं न विद्यते ॥ प्रति
कूले तु संप्राप्ते संक्रांते विवाहं नैव कारयेत् ॥ प्रतिकूलेपि केप्याहुः कर्तव्यं शांति
पूर्वकं ॥ ६७ ॥ प्रतिकूले कालमाह ॥ पितृमातुश्च पत्न्याश्च वर्षमर्धं तदर्धकं ॥
स सुतभ्रात्रोः सार्धमासे मन्येषां मासं मितं ॥ तदंते शांतिकं कृत्वा यथोक्तेन वि
धानतः ॥ पुनश्चैवाथ वाग्दानं कृत्वा लग्नं विधीयते ॥ ६८ ॥ प्रतिकूले सपिंडानां मा
समेकं विवर्जयेत् ॥ शांतिकं कृत्वा विधानेन ततो लग्नं विधीयते ॥ संकटे समनु
प्राप्ते याज्ञवल्क्योति योगिनां ॥ शांतिरुक्ता गणेशस्य पूजां कृत्वा समाचरेत् ॥ श्रियं
गौरीं तथा विष्णुं मृत्युं जयमतः परं ॥ मृत्युं संप्रार्थयेद्भक्त्या तत्तन्मंत्रेण वैक्रमा
त् ॥ सहस्रनामयं चापि ब्राह्मणैः कारितं जपं ॥ एतेषां प्रतिमा पूज्य[illegible]मादित्यादि
ग्रहांस्तथा ॥ शांत्युक्तविधिना कुर्यात्कलशस्थापनादिकं ॥ समिद्भिश्चरुणा चैव
होमः कार्यो यथाविधि ॥ ततो व्याहृतिभिर्होमं शतमष्टोत्तरं हुनेत् ॥ ततः स्विष्ट

कृतं कृत्वा होमशेषं समापयेत् ॥ कलशस्योदकेनैव सिंचयुर्दंपती च तौ ॥ आचार्यं
पूजयेद्भक्त्या वस्त्रालंकारभूषणैः ॥ ऋत्विग्भ्यो दक्षिणां दत्वा ब्राह्मणान्भोजयेद्बुधः ॥
प्रतिकूल विधिः प्रोक्त इत्येवं पूर्वसूरिभिः ॥ एवं कृत्वा शांतिकं यस्तु निषेधे सति दारु
णे ॥ यः करोति शुभं मोहाद्विघ्नं तस्य पदे पदे ॥ अथ पितरि मृते शुभकर्मनिषेधः ॥ ॥
मृते जनन्या जनके वर्षं वर्षार्धमेव च ॥ न कुर्याच्छुभकर्माणि कुलधर्मस्थिपे व च ॥ पि
तुरब्दं मासौ चंस्या षण्मासं मातुरेव च ॥ मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥८॥
अन्येषां तु सपिंडानां मासमेकं तु धारुतं ॥ उक्तकालावधीर्यावत्तावन्नैव शुभाः क्रियाः ॥ दश
हानंतरं प्रोक्तं मासौ चंयद्विजन्मनां ॥ शुभार्थमेव जानीयात्कृते पि हि सपिंडने ॥ यावदा
शौचमारभ्य सपिंडीकरणं भवेत् ॥ विवाहादीनि सर्वाणि शुभकर्माणि वर्जयेत् ॥९॥
मृते पितरि यस्याथ मृतायां वापि मातरि ॥ न कुर्याच्छुभकर्माणि वर्षं वर्षार्धमेव च ॥
व्रतबंधं न कुर्याच्च दंशो जननं सुतः ॥ वर्षं वर्षार्धकं चैव कृते पि हि सपिंडने ॥ विवाहा
दि प्रकुर्वीत यहोमं हातिसंकटे ॥ सपिंडिकरणादूर्ध्वं मासिकान्यपकर्ष्य च ॥६॥ ६४

२ न कुर्या

कन्यायां श्वातिकाले च वरस्यापि भवेद्यदि ॥ तस्माद्वाहे न दोषोस्ति तथा चैवोपनायने ॥
शुभकर्माणि कार्याणि निवृत्ते सूतके हि तत् ॥ इत्युक्तत्वात्सपिंडानां केचिन्नेच्छति मान
वः ॥ व्याघ्रः ॥ प्रेतक्रियामनिर्वर्त्य न कुर्याच्छोभनक्रियां ॥ विधिर्नैवं सपिंडानां ना
परेषामयं विधिः ॥ अथ विवाहादि सूतकोत्पत्तिः ॥ चौले चैवोपनयने विवाहे
च महामखे । - त्रिषट्दशैकविंशात्मारंभो नास्ति सूतकं ॥ तथा च ॥ एक
विंशत्यहर्यज्ञे विवाहे दशवासरे ॥ त्रिषट्चौलोपनयने नांदीश्राद्धं पुरोदि
ने ॥८५॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः ॥ नांदीश्राद्धं विवाहादौ श्राद्धे
पाकपरिक्रिया ॥ व्रतयज्ञविवाहेषु श्राद्धे होमे जपार्चने ॥ प्रारब्धे सूतकं न स्या
दनारब्धे तु सूतकं ॥ ब्र ॥ प्रारंभो दूर्ध्वं मासौ चं विवाहः कार्य एव तु ॥ व्रतादौ
पूजयेच्चैव प्रारंभो नास्ति सूतकं ॥ वृद्धशौनकः ॥ ऋत्विजादीक्षितानां च यज्ञि
यं कर्म कुर्वतां ॥ कर्मणि क्रियमाणे तु मध्ये चेत्सूतकं भवेत् ॥ यावत्कर्म समाप्ति

स्नात्वा वन्नाप्नोति सूतकं ॥ विनान्येते कमन्येषु कर्म स्वाशौचमिष्यते ॥ ९६ ॥ वि-
श्वरूपो विवाहादिषु मध्ये चेत्सूतके सति चांतरा ॥ पूर्वसंकल्पितं द्रव्यं दीयमानं
न दुष्यति ॥ विवाहोत्सव यज्ञेषु त्वंतरा मृतसूतके ॥ शेषमन्नं परैर्देयं दातॄन्
मातृंश्च न स्पृशेत् ॥ सूतकेपि ग्राह्याणि ॥ विवाहादि भागर्गः ॥ नांदीश्राद्धे
कृते नैव यावन्मात्रं विसर्जनं ॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च ॥ अ-
पसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ॥ ब्रह्मयज्ञं चाध्ययनं न दीसीमाति पा-
तनं ॥ ११० ॥ उपवासव्रतं चैव श्राद्धभोजनमेव च ॥ नैव कुर्युः सपिंडाश्च मंड-
पोद्वासनावधि ॥ मंडपोद्वासनात्पूर्वं नांदीश्राद्धे कृते यदि ॥ ॥ ये कुर्वंति न
रास्तत्र नपम्न तु व्रजंति च ॥ नांदीश्राद्धे कृते चैव पित्रोश्राद्धे कृते पि च ॥ महाद्
पवरेद्यस्तु नरकं प्रतिपद्यते ॥ २ ॥ पित्रोः प्रत्याब्दिके प्राप्ते नांदीश्राद्धं न कारये-
त् ॥ यदि मोहाद्द्विजः कुर्यान्मांगल्यं मश्रुतं न भवेत् ॥ निवर्त्तयति मांगल्यं स्व-

धायां मंद बुधयः ॥ मांगल्यं विमुखाः शश्वद्दपम्न तु व्रजंति ते ॥ मुहूर्त्तं निजवेद-
न्यकं यं वैवाहिकं तदा ॥ समाप्याब्दिकमस्पन्यकृत्वाभ्युदयिकं ततः ॥ ६ ॥ देशकाल-
जनयाद्वापि समाहितमनाभवेत् ॥ वैवाहिकं ततः कुर्यात्संकटे मुनयो विदुः ॥
सपिंडी नैव कुर्वीत रलेयामेग्रहेपि च ॥ नैव देशांतरे दोषः स्वहाकारो भवे-
द्यदि ॥ ॥ अथ विवाहादिद्दूर्ध्वं वर्ज्यानाह ॥ स्नानं सचेलं तिलमिश्रकर्म प्रेता-
नुयानं करकप्रदानं ॥ ॥ अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मंगलमब्दमेकं ॥
मासेषु षट्सु विवाहादिव्रतप्रारंभणं च च ॥ जीर्णभाजन नत्वा ज्यं गृहसंमार्जनं
तथा ॥ १० ॥ ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबंधनात् ॥ ॥ पालनो मुंडनं चैव
३ ना वर्षं वर्षार्धमेव च ॥ विवाहोपनयादूर्ध्वं वर्षं निर्षार्धमेव च ॥ न दद्यात्करणं कं
पिंडान्नतिलैरर्चयेत्पितॄन् ॥ वृद्धेर पि च कर्त्तव्या माता पित्रोर्मृते ह नि ॥
पिंडनिर्वपनं कार्यं पिब्व्या देर पिंडनं ॥ माता पितृणामब्दे तु विवाहादिषु

सर्वदा॥ तिलपिंडैः सुतः कर्त्तव्यमन्यश्राद्धं विवर्जयेत्॥ स्मृत्यंतरे॥ महालये गयाश्राद्धे मा
 तापित्रोर्मृतेहनि॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपनं सुतः॥ सत्यव्रतः॥ पिंडदानं
परित्यज्य संकल्पं कुरुते यदि॥ ततस्तेषु विनाशः स्यात्सपदो हरणं भवेत्॥ १९॥ पि
त्रोरेवमृताहे च गयायां च महालये॥ पिंडनिर्वपणं कुर्यात्कृतोद्वाहोपि यः सुतः॥ ॥प
येकोदरविवाहादि॥ प्रत्यूद्वाहे नैव कार्यश्चैकस्मिन्दुहितृद्वयोः॥ न चैकजन्मयोः
पुंसो विवाहं चोपनायनं॥ १८॥ एकजन्मे तु कन्ये द्वे पुत्रयोर्नैकजन्मयोः॥ नन्येद्वे
तु न चैकस्मै प्रदद्यात्तु कदाचन॥ एकमातृकसूतानामेकस्मिन्वत्सरे यदि॥
विवाहं नैव कुर्वीत वदंति मुनयोन्यथा॥ २०॥ विवाहस्त्वेकजन्यानां नैकस्मिन्नु
द्वयेकुले॥ नाशं करोत्येकवर्षे स्यादेका विधवा भवेत्॥ एकोदर्ययोः करतल
हरणं यदि स्यादेकोदरयोर्वरयोः कुलनाशनं च॥ एकाहे तु विधवा भवती
तिकन्यानद्यंतरेपिस्तुन्नदंष्टषुशैलरोधने॥ नमंडपान्मुंडनमूर्ध्वमिष्टं नपुं

त्रयोर्मंडिनमेकवर्षे॥ ॥ नपुंविवाहोर्ध्वमृतत्र येपि विवाहकार्यं दुहितुश्च कुर्यात्॥
२३॥ ज्योतिः॥ ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दुहितुः समार्धं॥ ॥प्रा
प्यकन्याश्वशुरालयं तु वधूप्रवेशस्य गृहेन चादौ॥ एकोदरप्रसूतानामेकस्मिंश्चै
व वत्सरे॥ न कुर्यान्मंगलं त्रीणि विवाहं चोपनायनं॥ चकाराच्चौलं॥ एकोदरप्रसू
तानां विवाहं चोपनायनं॥ चौलकर्म तथा चेति मंगलत्रयमुच्यते॥ २६॥ एक
स्मिन्मंडपेप्येको मंगलत्रयमाकुरु॥ यदि भिन्नोदराणां स्यात्समाप्येकं पुन
र्भवेत्॥ भिन्नोदराणामेकस्मिन्न कुर्यान्मंडपेपि ता॥ समानमंगलं चैकं पुनः कु
र्याच्चनादिकं॥ स्मृत्यंतरे॥ उद्वाह्य पुत्रीं न पिता विदध्यात्पुत्रांतरस्योद्वहनं क
दाचित्॥ यावच्चतुर्थी दिनमंगलस्य समापनं तावदसौ विदध्यात्॥ पुत्रिणी
परिणयादूर्ध्वं नयादिनचतुष्टयं॥ पुत्रांतरस्य कुर्वीत नोद्वाममिति सूरयः॥ २०॥
पुत्रस्याप्युपलक्षणं॥ ॥पद्ययमले॥ ज्योतिः॥ एकस्मिन्वत्सरे चैव वासरे मंडपे

पिच । कर्त्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ अथ संकटप्रवृत्तिमाह ॥ ज्योतिः ॥
५५ एकोदर्योर्वरयोरेकदिनोद्वहतो भवेन्नाशः । न घंतर एकवर्षे केप्याहुः संकटे
शुभं ॥ न प्रतिषिद्धमलं संप्राप्ते महति संकटे ॥ एकोदरसंभवयोरेकाहमंडपे
काले ॥ २२ ॥ संकटे ॥ तथा स्मृत्यंतरे ॥ न चैकजन्मयोः पुंसोर्विवाहस्त्वेकवासरे ॥
षष्ठदिने देशुभं केचित्प्राहुर्महति संकटे ॥ कृते चौलोपनयने भवेद्यावद्दिनत्रयं ॥
कन्यादानं च न कर्त्तव्यं पित्राद्यैरिति सूरयः ॥ व्रतबंधनमेकस्य तस्यैकस्य विवा
हिकं ॥ एकस्मिन्नपि वान्यस्मिन्नपि वान्यदिने कुर्यात्तु वै पिता ॥ २६ ॥ मध्ये चेद्व्र
तबंधस्य विवाहो यदि वा भवेत् ॥ अपनिलाषीमू[illegible]र्त्तस्य कन्यया वा व्रतस्य च ॥ ५५
कन्याविवाहमध्ये चेद्विवाहस्यात्सुतस्य तु ॥ पितृवत्कृतदाकुर्यादिति कै
श्चिदुदीरितं ॥ स्थं भवधरा तत्र कथं स्यान्मातृपूजनं ॥ नांदीश्राद्धं भवेद्देवके
होममंत्राः पृथक्पृथक् ॥ मंडनोपरि मुंडनं ॥ संहितासारावल्यां ॥ चौलो मुंडं

न मेवौ कं वर्जयेद्वरणात्परं ॥ ऋतुत्रयं पुनर्यावन्न कुर्याल्लघुमंगलं ॥ कुले ऋतुत्र
यादर्वाक् मंडनान्न तु मुंडनं ॥ प्रवेशो निर्गमः पश्चान्न कुर्यान्मंगलत्रयं ॥ न पुंवि
वाहोर्ध्वमब्दं तत्रयेपि विवाहकार्ये दुहितुश्च कुर्यात् ॥ न मंडनाच्चापि हि मुंडनं
च गोत्रैकतायां यदि नाब्दभेदः ॥ अ ॥ कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनं ॥
अब्दभेदे प्रकुर्वीत मंडनान्मुंडनं भवेत् ॥ पुत्रोद्वाहे नैव पुत्रीविवाहस्याद्दृतुत्रये ॥
अश्लांतः अब्दभेदेन दोषस्यादित्याचार्ये ब्रवीदथ ॥ ४६ ॥ गर्गः ॥ दोषस्यादू[illegible]
र्ध्वमुद्वाहात्कुले च डपनायनने ॥ न दोषः पुरुषद्वाहादूर्ध्वं कन्याविवाहि
के ॥ व्याघ्रः ॥ पुत्रोद्वाहात्परं दोषादुहितुः स्याद्विवाहिके ॥ नैव दोषः सपिंडेषु
न दोषो भिन्नमातृके ॥ भृगुः ॥ [illegible] ॥ फाल्गुने चेद्विवाहस्याच्चैत्रे चोपनायनं ॥
अब्दभेदाच्च कुर्वीत न र्तुत्रयविलंघनं ॥ अथ परिवेत्रादि ॥ स्मृत्यर्थसारे ॥
दाराग्निहोत्रादीनां च कुरुते योग्रजोस्थिते ॥ परिवेत्ता स विज्ञेयः परि

वित्तिस्तु पूर्वजः॥ ५०॥ पितृव्यपुत्रे सापत्ने परदारसुतादिषु॥ विवाहाधानयज्ञा
दौ परिवेत्ता द्यदूषणं॥ षण्ढांधबधिरस्तब्धजडगद्गदपंगुषु॥ कुब्जवामन
रोगार्त्तशुष्कांगविकलांगिषु॥ स्तब्धे पुंस्त्वे च मत्ते च त्रायनस्थे निरिद्रि
ये॥ मूकोन्मत्तेषु सर्वेषु न दोषः परिवेदने॥ ५२॥ कन्याविषये॥ प्रयोगपारि
जाते॥ एकमातृकसूतानां पुत्रीणां परिवेदने॥ दोषस्यात्सर्ववर्णेषु न दोषो भिन्न
मातृषु॥ विवाहानधीकारस्या ज्येष्ठकन्याय दा स्थिता॥ तदनु ज्ञाविनापि कनि
ष्ठामुद्वहेत्तदा॥ कालप्रतीक्षणं नस्याद्‌ज्जो दृष्टं न दोषभाक्‌॥ परिवेत्तो भवेद्य
स्तु पतितः कन्यकापि॥ ५६॥ अथ असंस्कृतकन्यायारजोदोषः॥ स्मृत्यंतरे॥ असं
३ व स्कृता तु या कन्या रजसा तु परिप्लुता॥ भ्रातरः पितरस्तस्याः पतिता स्युर्नसंश
यः॥ तथा चेतिहासे॥ पितृगृहे तु या कन्या रजः पश्यत्यसंस्कृता॥ सा कन्या वृषल
ज्ञेया तत्पतिर्वृषलीपतिः॥ अथ स्त्रीणां रजोदोषः॥ प्रसंगात्कथ्यते॥ रागजं

रोगजं चैव कालजं द्रव्यजं तथा॥ स्त्रीणां चैव रजः प्रोक्तं कालजं दोषकृद्भवेत्‌॥
अकाले यदि चेत्स्त्रीणां तद्रजो नैव दुष्यति॥ पंचाशद्वर्षादूर्ध्वं नैव दोषः॥ यास्तव र्षा र
ण्याः रजस्रावे तु नारीणां रजोदोषो दिनत्रयं। चतुर्थे दिवसे स्नाता स्पर्शा
ना देवनिंदिताः॥ ६॥ शुद्धा भर्त्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वला॥ दैवे कर्म
णि पित्र्ये च पंचमेहनि शुध्यति॥ स्मृत्यंतरे॥ रजस्वलायाः पुनरेव चेद्रजः प्राग्दृश्य
ते ष्टादशवासराशुचिः॥ अष्टादशाहे यदि चेद्दिनद्वयादेकोनविंशो त्रिदिना
त तःपरं॥ रजोप्लुताष्टादशकावसरात्पुनः प्राग्गण्यायोनशा॥ लिनीवध्रः अ
ह्नेण साशुध्यति देवपित्र्ययोरजोनियुक्तं शुचिमाप्नुवेसति। ६२॥ रजस्व
ला यदि स्नाता पुनरेव रजस्वला॥ अष्टादशदिनादर्वाग शुचित्वं न विद्यते॥
ऋतुकालेव्यतीते तु यदि नारी रजस्वला॥ तत्र स्नाने न शुद्धिस्याद्दष्टाद

शद्दिनात्परा ॥ दिनाद्वषोडशोद्‌र्वाक् नारियाचार्त्त्यौवनात् ॥ पुनः रजस्वलापि
सा शुद्धा स्नानेन न केचन ॥ रात्रेः कुर्यात्त्रिभागे तु द्वौ भागौ पूर्ववासरे ॥ ऋतौ सु
ते मृते चैव वर्जयेत्तां श्च रा:परे हनि ॥ अन्यपक्षः रात्रावेव समुत्पन्ने मृते रज
सि सूतके ॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥ इति कश्चिद्दर्शांतरः ॥ न तु
सर्वत्रः ॥ अथ द्वितियविवाहनिमित्तं ॥ स्मृत्यर्थसारे ॥ अप्रजां दशमे वर्षे ।
स्त्रीप्रजां द्वादशे त्यजेत् ॥ मृतःप्रजां पंचदशे सद्यस्त्वप्रियवादिनीं ॥ स्मृत्यर्थ
सारे ॥ व्याधिता स्त्रीप्रजां वंध्या श्च्युन्मत्ता विगतार्त्तवा ॥ अदुष्टा लभते
त्यागं तीर्थतो न तु धर्मतः ॥ ७० ॥ अग्निस्विष्टादि शुश्रूषां बहु भार्यः सवर्णया ॥
कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हिता न चेत् ॥ सुरूपां सुप्रजां चैव सुभगामा
त्मनः प्रियां ॥ धर्मानुचारिणीं भार्यां नित्यजेद्द्विजसत्तमः ॥ अग्निसंयोगः ॥ जी ६८

वत्यां ज्येष्ठपुत्रां च कथं स्त्रीपुनरुद्वहेत् ॥ कृत्वा मंगलस्नात्रां तं मधुपर्कादि पू
र्ववत् ॥ सर्वं कनिष्ठ भार्याया हवनं तत्र चैव हि ॥ कनिष्ठ भार्यया सर्वं वैवा
हिकं हवनं च ज्येष्ठ भार्याग्नौ कुर्यादित्यन्वयः ॥ विधिवज्ज्येष्ठ भार्याग्नौ कुर्या
द्वैवाहिकं च यत् ॥ तदभावे तु लौकाग्नौ सर्वं वैवाहिकं भवेत् । केचिदेवं ह म ।
ग्निसंयोगं घतो ज्येष्ठ कनिष्ठयोः ॥ निदध्याज्ज्येष्ठ भार्याग्निं स्थंडिले दक्षिणे
चतं । तदुत्तरे कनिष्ठाग्निं स्थंडिले तं निधाय च ॥ पृथक्स्थंडिलयोर
ग्निं समाधाय यथाविधि ॥ तत्र स्वैकृत्वाज्यभागांतमन्वाधानादिकं ततः ॥
जुहुयाज्ज्येष्ठ भार्याग्नौ समन्वारब्ध आहुतीः ॥ अग्निमीळ इति ऋग्भिर्न
व भिश्च यथाक्रमं ॥ ततः स्विष्टकृतं कृत्वा होमशेषं समापयेत् ॥ समिधे
नं समारोप्य अयं ते योनिरित्यृचा । प्रत्यवरोहेत्यनया कनिष्ठाग्नौ निधाय १०२
तां ॥ आज्यभागांत मंत्रादि कृत्वा स्यत ह हितः ॥ अग्नावग्निश्च प्रविष्टिश्च ॥

६७ रतिरुषीणां पुत्रो ॥ अधिराज एषः ॥ तस्मै जुहोति हविषा घृतेन मा देवा
५९ नामो मुग्ध हे भागधेयं ॥ अस्माकं मो मुग्धं भागधेयं । तस्मान्वारब्ध एता
म्पत्नी स्वाजुहुयाद्घृतं । अग्निनाग्निश्चावग्निस्त्वग्ने अग्निनेति
च । पाहि नो अग्न एकया पाहीति तिस्रः जिश्चततः परं ॥ अस्त्वीड्मीह
मंथनेतिनम्नग्निश्चततस्त्वग्निः परं ॥ ततः स्विष्टकृतं कुर्याद्धोमशेषं समा
पयेत् ॥ तत्रैणोपासनं कुर्यात्सायमादि यथाक्रमं ॥ ९ ॥ अथोपासनाग्नेः
संयोगः ॥ संयोगो जायते चाग्नेरग्नेरूपासनस्य तु ॥ निजधाम्नि विज्ञ-
म्प्राप्याग्निं पूर्वपश्चिमयोर्दिशोः ॥ आद्यस्तु पूर्वभागाग्नौ प्रायश्चित्ताहुति
हुनेत् ॥ विद्या हि वेद इत्येकाद्या देवानामपीत्यथ ॥ द्वितीयः पश्चिमस्या ६५
ग्नावाहुतीर्द्वे हुनेदथ ॥ स्वर्णविस्तरेकचर्चा अयं ते इद्ग्निं अयो धायधा नरि
त्वे त्वाधत्तामग्ने मानुषीरिति ॥ गृहदाहाग्निसंसर्गे गृह्याग्नावाजायते य ६७

२३

था ॥ कृत्वा चाद्यार्धपर्यंतं [illegible] ज्याहुतिर्हुनेत् ॥ ग्रामदाहाग्निसंयोगो गृह्या
ग्नेर्यस्य चेद्भवेत् ॥ जुहुयात्पूर्ववत्कृत्वा सवर्गीयाहुतीर्द्वयं ॥ १० ॥ अग्निको
यंकितं चेत्स्याद्गृह्याग्नौ ब्रह्मचारिणः ॥ प्रायश्चित्तं गृही कुर्यात्तस्मिन्नेव हु
ताशने । पाहि नो अग्न इत्येका यत्र वेत्थ वनस्पते ॥ अग्ना जातं यदेत्येका जुहु
याद्धुतीत्रयं ॥ अथ अपोपासनातीतदिनप्रायश्चित्तं ॥ तत्र कारिका ॥ ॥
नित्यहोमे त्वतिक्रांते संस्कृत्याग्निं च पूर्ववत् ॥ चतुष्कृत्वा गृहीताग्निं मनस्व
त्या जुहोति च ॥ अर्वाक् त्रिरात्राज्जुहुयादयाश्चेत्या सप्तरात्राच्च मन
स्वतीयः ॥ एकाद्याहे समुत्तमत्तास्याद्वादशाहे ध्रुव वमाग्निनाशः ॥ सूतकां
तरितेव सोमनोयान्हूर्जुवः स्वरो ॥ मध्ये पर्वणि संप्राप्ते पुनः संधं विधीयते ॥
श्राद्धादशाहिनादर्वाक् प्रायश्चित्तं कथं भवेत् ॥ तत्रं कृत्वाज्यभागांतम ।

७० यामश्चेत्यादि सप्तमं ॥ कृत्वा स्विष्टकृदादि स्याद्धोमशेषं समापयेत् ॥ दिव
सद्वादशाहूर्ध्वं कुर्याद्धोमो विवाहवत् ॥ गृह्याग्नावेव कुर्वीत प्रायश्चि
त्तनिमित्तकं ॥ तदग्नावेव च कुर्वीत लौकिकाग्नौ यथाविधि ॥ प्रातर्होमो
पवासो मे प्रमादाद्यन्न कृतो यदि ॥ कृत्वा व्याहृतिभिश्चाज्यमाहुतिं तेषां कृती
कुर्नेत् ॥१२००॥ प्रायश्चित्तविशेषस्य यत्र नोक्तो विधिर्भवेत् ॥ कुर्नेदाज्याहुती स्त
स्रश्चतस्र इति कुर्नेत् ॥ पुनराधानं ॥ श्वोदक्यापतितः शूद्रो रक्तं मूत्रं पुरीषकं ॥
स्पृष्टो दग्निसमिस्थं चेत्पुनराधानमिष्यते ॥ समिधश्चेत्प्रतप्तायानां दंसा
कंगएव च ॥ पुनराधानमिछंति केचिद्यज्ञविदो जनाः ॥३॥ समित्प्रतपना
त्पूर्वमग्निश्चेदुपशाम्यति ॥ पुनराधानवत्कुर्याद्यामश्चेत्यादि सप्तकं ॥ अथ
विधुरोपासनं ॥ तत्रेयं स्मृतिः ॥ तदाकृवाचापत्नीको ग्निहोत्रं कथमेवकृ ६०

होष्यतीति ॥ तथा च स्मृतिः ॥ मृतायामपि भार्यायां वैदिकं न त्यजेद्बुधः ॥ उपाधि
नापि सत्कर्म यावज्जीवं समाचरेत् ॥ अपत्नीकु रामयीपत्नीं कृत्वा कुग्रहमेधिनः ॥
अग्निहोत्रमुपासंते यावज्जीवमनुव्रताः ॥७॥ अथ विधिमाह ॥ उद्धृत्य माहो
प्रणवेनत्वाहो प्रत्यग्निरूषसाग्नित्रं चंहरेत् ॥ निधाय पृष्टोदि विमंत्रकेनतं
ततस्तु होमं स्विस्त निःसमिद्भिः जेरवादयो नैव च तत्सवितुर्विश्वानि नोद्या
न इमे च मंत्राः ॥ अपारोपणं चाप्यवरोपणं च ह्युत्पत्तिरेवं विधुरानलस्य ॥
इत्थं कृत्वा ततो होमं सायं प्रातर्यथाविधिः ॥१॥ प्रतपेत्समिधं वापि पाणिना
युगपत्तये प्रत्यवरोहणे नैव न चैवारोपणं तथा ॥ विधुरस्य विधिः कश्चिदु
क्तोयमिति सूरिभिः ॥ अथ मृतभार्यस्य पुनर्विवाहविषये संग्रहः ॥ प्रमा
दान्मृतिवत्सरादितः पुनरुद्वाहविधिर्यदा भवेत् ॥ विषमे परिवत्सरे तु

६९ नः समवर्षेतु मृत्युप्रदा न वेत् ॥१३॥ तन्वी वियोगे प्रथमे च वर्षे नो चेद्द्विवर्षेषु
न रूढ हेत्सः ॥ अयुग्ममासे तु शुभप्रदं स्याद्वसिष्ठवर्गादि पराशराद्याः ॥ भा
र्यांतरं विवाहः स्यादयुग्मे वत्सरे शुभः ॥ युग्मे तु भर्तृविनाशः स्याद्गार्ग्यस्य व
चनं यथा ॥ अपुत्रिणी मृता भार्या तस्यां तु भर्तृविवाहिकं ॥ युग्मादयुग्ममा
से वा विवाहः शुभदो मतः ॥ प्रजावतां कुमार्यां मृतायां ब्राह्मणस्य तु ॥ प्र
थमे हायने कर्तव्यो विवाहः शुभदो भवेत् ॥१७॥ तथा च गर्गः ॥ मृतो जनन्यां
जनके गतानां द्वितीयवर्षे प्रकरोति ~~[illegible]~~ शोभनं ॥ करोति मोहा
त्करोति हानिं वदंति गर्गात्रिपराशराद्याः ॥ इति मृतभार्यस्य विधिः ॥
अथार्कविवाहः ॥ अकृत्वार्कविवाहं तु तृतीयां यदि चोद्वहेत् ॥ विधवा सा
भवेत्कन्या तस्मात्कुर्याद्विचक्षणः ॥ अर्कसन्निधिमागत्य कुर्यात्स्वस्त्यादि ६९

२४

वाचनं ॥ नांदीश्राद्धं हिरण्येन ह्यष्टवर्गान्प्रपूजयेत् ॥ पूजयेन्मधुपर्केण
वरमाचार्यहस्ततः ॥ अर्कस्य पुरतस्तिष्ठेत्प्रार्थयेत्तं द्विजोत्तमः ॥ त्रिलो
कवासिन्सप्ताश्वः छायया सप्रीतो रवेः ॥ तृतीयोद्वाहजं दोषं निवारय सुखं
कुरु ॥ अर्कं गौरत्रिषिंच्याथ श्वेतवस्त्रेण वेष्टयेत् ॥ कार्पासतंतुभिश्चैव गंध
पुष्पैः समर्चयेत् ॥२३॥ गुडौदनं च नैवेद्यं तांबूलं विनिवेदयेत् ॥ अर्कप्रदक्षि
णं कुर्याज्जपेन्मंत्रमिमं बुधः ॥ मम प्रीतिकरा चेयं मया सृष्टा पुरातनी ॥ अर्कजो
ब्रह्मणा सृष्टा सर्वप्राणिहिताय च ॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनी ॥
तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशनं ॥२६॥ इति संप्रार्थितो विप्रः कन्यावर
णमाचरेत् ॥ गोत्रं स्वस्य तु संबंधमुद्धार्य पित्रिपूरुषं ॥ आदित्यस्याथ ~~स~~
सवितुरर्कस्य च यथाक्रमं ॥ पुत्रीं पौत्रीं तथा नप्तीं गोत्रं काश्यपमित्यथ ॥ अ

चार्यमुखतः कुर्यात्स मुहूर्तादिकं चयत् ॥ मंत्रमुच्चार्य तां दद्यादाचार्योथ व
रायच ॥ अर्क कन्यामिमां विप्रो यथाशक्त्या विभूषितां ॥ गोत्राय शर्मणे तुभ्यं द
त्ता विप्र समाश्रया ॥ ३१ ॥ इत्थं कृत्वा च विद्वद्भि ब्राह्मणैश्चात्मजैः सह ॥ कंकणं चा
थ बध्नीयाद्धस्ते मंगल सूत्रकं ॥ स्वशाखोक्तेन विधिना तत्र मंत्रेण कारयेत् ॥
गायत्र्या चाथ कुर्वीत केचिद्देवं वदंति हि ॥ निक्षिपेच्चतुरः कुंभानर्कस्य प
रितो वरः ॥ ध्रुषत्ति वेत्येतयर्चा वाग्नेयादि चतुष्टये ॥ ३३ ॥ सवस्त्रं प्रतिकुंभं
च त्रिसूत्रेणैव वेष्टयेत् ॥ हारिद्रगंधसंयुक्तं पूरयेच्छीतलं जलं ॥ प्रति
कुंभे महाविष्णुमतो देवेन पूजयेत् ॥ अर्कं च पूजयेद्भक्त्या गायत्र्या च प्रती
ति च ॥ अर्कस्योत्तरदिग्भागे स्थंडिलं कारयेद्बुधः ॥ वनस्तत्रैव चाज्येन जु
हुयादाहुतीरथ ॥ ३६ ॥ ३८ ॥ षडाहुतीस्तु वेणैं यागे निरिति चैकया ॥ यस्मै ७२
वं।

त्वा काम कामाय वयं सम्राज्य जामहे ॥ यस्मै त्वं काम कामाय त्येचैकया ततः
परं ॥ व्याहृतिश्चैव जुहुयात्कुर्यात्स्विष्टकृतादिकं ॥ आचार्याय च गां
दद्याद्दक्षिणां चैव शक्तितः ॥ पुनरर्कं च संपूज्य प्रार्थयेत्स्वस्थमानसः ॥
आयुर्देहि प्रजां देहि पशूनपि । देहि मेर्क दिनं पुष्टिं स्वस्थाने त्वास्थि
रो भव ॥ इत्यर्क विवाह विधिः ॥ अथ पुण्याहवाचन विधिः ॥ द्वात्रिं
शद् गुलं दीर्घं समं ताच्चतुरस्रकं ॥ रेखे द्वे रेखतः कोणे यादृक् कुर्वीत पार्श्व ॥
योः ॥ कोणानि कारयेत्तत्र द्वात्रिंश संख्ययानि तु ॥ पद्वत्पार्श्वयोस्तत्र पुर
तो गच्छ शुंडवत् ॥ ४३ ॥ पश्चिमे कलशाकारं निर्मितं ब्राह्मणैः पुरा ॥ तद्देव
स्वस्तिकं चेति प्रवदंति महर्षयः ॥ तंडुलैः संलिखेद्भूमौ वा हौत्रे तु कर्मणां ॥ त
न्मध्ये स्थापयेद्वा रूपाः सजलं कलशद्वयं ॥ सौवर्णं राजतं वापि कांस्यं वा रत्नपु
रितं ॥ पात्रे द्वे विन्यसेत्तत्र सौवर्णं राजतेपि वा ॥ सफले कांस्यपात्रे वान्यसेत्तं

७३ दुःखहरितं ॥ सुवर्णपत्रपुष्पैश्च पंचरत्नैः समन्वितैः ॥ पत्नीपुत्रसमायुक्तो भुक्ता
७३ र्घिब्राह्मणैः सह ॥ पुण्याहवाचनं कुर्यात् सर्वेष्वेव कर्मसु ॥ नांदीश्राद्धं समुद्दि
श्य स्वस्तिवाचनमाचरेत् ॥ स्वस्तिवाचनमंत्रेण सर्वेषामृद्धिकर्मणां ॥ आदा
वंते प्रकर्त्तव्यमिति वेदविदां मतं ॥ अथ षोडशकर्माण्याह ॥ भाष्यकारः ॥ ॥
गर्भाधानं पुंसवनं सीमंतो जातकर्म च ॥ नामनिष्क्रमणं चान्नप्राशनं चौलोप
नयनं चैव महानाम्नि महाव्रतं ॥ उपनिषच्च गोदानं समावर्त्तनकं ततः ॥
विवाहांत्येष्टिकं चेति संस्काराः षोडशैव तु ॥ ५५ ॥ एते वै मुनिभिः प्रोक्ताः क
र्त्तव्या हि द्विजन्मना ॥ अथ नांदीश्राद्धं । स्मृत्यर्थसारे । स्वपितृभिः पिता दद्या
सुतसंस्कारकर्मसु ॥ यावद्विवाहं पुत्रस्य तावदेव हितं सुतः ॥ नांदीश्राद्धं ७२
पिता कुर्यादाद्ये पाणिग्रहे बुधः ॥ अत ऊर्ध्वं सुतः कुर्यात् पितृणां तद्द्वि वै पितुः ॥ ७४

नांदीमुखे कर्मणि संप्रवृत्ते पितुर्यथो जीवति यस्य पुंसः ॥ येषां कुर्यात् स्वपिता
स्वयं च तेषां च कुर्यादिति शास्त्रसिद्धिः ॥ यदा जीवत्पिता नांदीश्राद्धं कुर्याद्वि
धानतः ॥ पितुर्मातामहानां दीमेष धर्मः सनातनः ॥ मनुः ॥ श्राद्धं तु मातृपू
र्वं स्यात् पितृणां तदनंतरं ॥ ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं ॥ ५६ ॥
एकैकस्मिन्नहनि श्राद्धमेकैकं वृद्धिसंज्ञकं ॥ अनाथे विधिवत्कुर्यादे
कस्मिन्नपि वा दिने ॥ हेमाद्रौ ॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं ॥
अथ पादप्रक्षालनविधिः ॥ अथ वाहोदके स्नानं विप्रपादाभिषेचनं ॥ रवेर
भिमुखं कुर्यात् संध्यावंदनकर्म च ॥ अत्र विशेषः ॥ नांदीश्राद्धे कृते चैव द्वादशा
मपि सर्वदा ॥ विप्राणां क्षालयेत्पादौ प्राङ्मुखस्तु प्रविश्य च ॥ १२६ ॥ विप्राणा
मुपविष्टानां प्राङ्मुखानां तु सर्वदा ॥ पादौ प्रक्षालयेच्छ्राद्धे सविष्टः प्रत्यगाननः ॥

नग्नश्राद्धे नवश्राद्धे सपिंडीप्रेतकर्मसु ॥ तिष्टतः क्षालनं कुर्याद्न्यत्रोपविशे
द्भुवि ॥ श्राद्धे यज्ञे विवाहे च दीक्षायामागते गुरौ । तिष्टतः क्षालनं कुर्यान्निराशाः
पितरो गताः ॥ विवाहोत्सवयज्ञे तु श्राद्धे चैव तु सर्वदा ॥ विप्राणां तु प्रतिष्टानां
पादौ प्रक्षालयेद्विधिः ॥ अथ विवाहमासानाह ॥ माघफाल्गुनवैशाषज्येष्ट
मासाः शुभावहाः ॥ विवाहो मार्गशीर्षेपि हैवल्लसमतेन तु ॥ ६६ ॥ पौषेपि म
करस्थेर्के चैत्रे मीनगते रवौ ॥ आषाढे मिथुनादित्ये केप्याहुः करपीडनं ॥
मीनराशिस्थिते सूर्ये विंशतिर्वासरे यदि ॥ विवाहः शुभदः [illegible] चैत्रे न तु मे
षेकदाचन ॥ यदि रविगतमीने विंशतिर्वासरे वा न भवतु खलु दोषः
चैत्रमासे विवाहः ॥ यदि रविगतमेषे चैत्रमासे विवाहः सकलशुभवि
नाशः सर्वदा वर्जनीयाः ॥ मार्गमासि तथा ज्येष्ठे विवाहं चोपनायनं ॥ ज्ये
ष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् ॥ १२० ॥ न जन्मधिष्ण्ये न च जन्ममा ६४

सि न जन्मकाले यदि ने विदध्यात् ॥ ज्येष्ठे न मासि प्रथमस्य सूनोस्तथा सुता
याः पि मंगलानि ॥ तथा ज्योतिःसारे ॥ जन्ममासि न च जन्मभे तथा नैव जन्म
दिवसेपि कारयेत् ॥ आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न च जातु मंग
लं ॥ अथ ज्येष्ठत्रयं ॥ न ज्येष्ठे ज्येष्ठयोः कार्यं नरनार्योः पाणिपीडनं । तयोरेक
तरे ज्येष्ठे ज्येष्ठे श्रेष्ठे शुभान्यथा ॥ ज्येष्ठपंचकमाचार्यस्तज्ज्ञे ज्येष्ठचतुष्टयं ॥
ज्येष्ठत्रयं निषिद्धस्याज्ज्येष्ठद्वंद्वं तु मध्यमं ॥ ज्योतिरार्णवे ॥ कन्यारवौ
यदि स्यातां याद्यगर्भसमुद्भवौ ॥ तयोरेकनवे ज्येष्ठा न कृत्रं चापि चैव हि ॥
ज्येष्ठमासे न वै क्वापि ज्येष्ठपंचकमित्यथ ॥ कुर्याद्यस्तु नरो मोहादशुभं
तु भवेत्तयोः ॥ ९६ ॥ ज्येष्ठा चतुष्टये चैव ज्येष्ठात्रयमथापि वा ॥ निषिद्धं स्या
दथ ज्येष्ठे द्वितीये पंचमासयोः पूर्वकन्यामुद्वहने यदि ॥ स्वसारं मातरं वा
पि द्विजस्याद्भुतस्य गौ ॥ तस्य गोत्रे न गं भवेत् ॥ अथ वरगुणानाह ॥ आ

तिःसारे ॥ कुलं शीलं वपुर्विद्या वयो वित्तं सनातनः ॥ गुणा सप्त वरे यस्तु तस्मिं
कन्या प्रदीयते ॥ अपधो मूकः क्रियाहीनस्त्वपस्मारिनपुंसकः ॥ दूरस्थः पतितः
कुष्ठी दीर्घरोगी वरो न सतां मूकांधो बधिरस्त्वधः पुंगुकुब्जो नपुंसकः ॥
कुष्ठी रोगी ह्यपस्मारी दृश दोषाः प्रकीर्त्तिताः ॥ ८ ॥ अथ कन्यागुणानाह ॥ रूपं
शीलं कुलं कांति वयो वित्तं सनातनः ॥ यस्यां सप्त गुणां वध्वां दृश्यंते तां वबु
द्धिमान् ॥ ९ ॥ इति नारायणभट्टविरचितायां धर्मप्रवृत्तौ गर्भाधानादिपंच
दशप्रकरणं ॥ ॥ अथ सप्तमपंचमयोः सापिंड्यं वर्ण्यते ॥ पिंडेन सह
वर्त्तत इति सपिंडः ॥ सपिंडस्येदं सापिंड्यं ॥ तद्विधं ॥ स्वगोत्रे चान्यगो
त्रे वा तत्र सगोत्रे मनुराह ॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागि
नः ॥ पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति ॥ यन्मनुनोक्तं तज्ज्ञा

ति विषय एव ज्ञेयं ॥ नान्यत्रेति ज्ञातिव्यतिरिक्ते पि सापिंड्यमन्यथोक्त
वान्न्याष्यकारः ॥ संतानं भिद्यते यस्मात्कन्यायाश्च सुतस्य च ॥ तत्रैवा
सप्तमाद्वाग्न्यगोत्रापि जायते ॥ संततिः पुरुषस्यापि स्त्रियाः अपि च
वा यदि ॥ सापिंड्यं तद्विजानीयाद्दूरवद्वा विवाहिके ॥ पितृतः सप्तमाद्
कूमातृतः पंचमाद्ध ॥ सपिंडनानुभावेन नोद्वहेत्तत्र कन्यकां ॥ सं
तानं भिद्यते यस्मात्पूर्वजाडभयत्रतः ॥ तन्मर्यादं गुप्ये द्धीमान् वरं या
वत्कन्यकां ॥ असपिंडां च वरयेत्पितृतः सप्तमात्परं ॥ मातृतः पंच
मादूर्ध्वमसमानार्षगोत्रजं ॥ याज्ञवल्क्यः ॥ मूलागोत्रादन्यगोत्रामु
द्वहेद्दृष्टमोष्टमीं ॥ अन्यगोत्रादन्यगोत्रां षष्ठः षष्ठीं समुद्वहेत् ॥ पंच
मां सप्तमात्पूर्वं कन्यामुद्वहते यदि ॥ स्वसारं मातरं चापि द्विजसा

७५

गुरूतल्पगः ॥ ९३ ॥ आचार्यः ॥ सापिंड्यं मुनिभिः प्रोक्तं मातृतः पितृतः क्र-
मात् ॥ तत्सापिंड्यं विजानीयान्नर्मदोत्तरवासिनां ॥ सापिंड्यं प्राहुराचार्याः
संकोचादपि सपिंडता ॥ ज्ञातव्यं तच्च धर्मज्ञैर्नर्मदायाश्च दक्षिणे । पं-
चमं सप्तमं चैव मातृतः पितृतः स्तथा । त्रीणि चातीत्य मातृतः पंचाती-
त्य हि वै पितुः ॥ संग्रहे ॥ चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमीमपि ॥
पाराशर्यमतात्षष्टि पंचमो न तु पंचमी ॥ शंकरः ॥ गणानामार्ष-
जोपह्नौ पंचमः पंचमी यदि ॥ विवाहो नैव कुर्वीत अन्योन्यस्य कश्च-
नावहः ॥ तृतीयां वा चतुर्थी वा पक्षयोरुभयोरपि । विवाहेत्तां मनुः ७६
प्राह पाराशर्ययमौ गिरः ॥ सप्तमी पंचमी चैव चतुर्थी तृतीयामपि ।
षष्ठि समुद्वहेत्कन्यां पंचमो न तु पंचमी ॥ ९३ ॥ भवेत्तां पूर्वजा सु- ७७

त्रो तयोरपि च संततिः । पंचमः पंचमी कन्यां न तत्र वरयेद्द्विजः ॥ कन्येद्वे पू-
र्वजा स्यात्तां संततिः स्यात्त्रयोरपि । पंचमः पंचमी तत्र वरः कन्या समुद्वहे-
त् ॥ कन्या पुत्रौ च संजातौ पूर्वजा संततिस्तयोः । यदि स्याद्वरये तत्र पंचमः
पंचमीमपि ॥ आचार्यः ॥ कन्या वरस्य सापिंड्य मातृसंज्ञा भवेद्यदि ॥ स्वसृ-
संज्ञा पवा पुत्री नैव तां वरयेद्बुधः ॥ हेमाद्रौ ॥ चतुर्थी पंचमी वापि ष-
ष्ठी वा मातृसंज्ञकं ॥ स्वसृसंज्ञा चवै पुत्रीसंज्ञा तां परिवर्जयेत् ॥ ४ तथा
च हेमाद्रौ ॥ यत्रोक्त सापिंड्य निवृत्ति पूर्वतैत्रैव कन्यां पितृमातृसंज्ञकां ॥
पुत्री यदि स्याद्भगिनी यदि स्यात्तदा विवाहो न कदाचिदेव ॥ ६ ॥ पुत्री वि-
षये केचिदाहुः ॥ पुत्रीकामुद्वहेद्द्विजः केचिदेवं वदंति हि ॥ भगिनी मातरं
चैव यदि चेत्प्रतिभाग्भवेत् ॥ आचार्यः ॥ धात्रीपुत्री स्वसारं च नैव तां वरये

६७ द्विजः॥ केचिदाहुः कचिद्देशे पुत्रिकामुद्वहेदिति॥ तृतीयां वा चतुर्थीं वा
२त पंचमीं पितृमातृतः। दक्षिणे तु द्वहेत्कन्यां स्वारं मातरं विना॥ जननीभगि
नीचैव पुत्रिसंज्ञा च कन्यकां॥ नैव तां वरयेद्विप्रो गाजवोमुरब्रवीत्॥१॥ नि३
तथा च व्याघ्रपादः॥ उद्वहेद्दक्षिणे विद्वान्मातुलस्य च वै सुतां। उत्तरे नो
द्वहेद्विप्रो ह्येष धर्मः सनातनः॥ ॥ अपाचार्यः॥ मातुलस्य तु तां विप्रो दक्षि
णे तां समुद्वहेत्॥ वर्जनीयां प्रयत्नेन सैव वाजसनेयिभिः॥१३१२॥ तथा
च स्मृतिः॥ मातुलस्य सुतां केचित्केचित्पैतृ सुताः सुतां॥ विवाहे त्वां
केचिद्देशे संकोच्यापि सापिंडता॥ ॥ अपसापिंडे पिके केचिद्विशेष माहुः॥
पितृव्यभार्या भगिनी तत्पुत्री च परित्यजेत्॥ सापत्न्य भार्याभगिनी तत्पु
त्रीं परित्यजेत्॥ तथा च॥ पितृव्य पत्नी भगिनी सुता वा सापत्न्य मातुर्भ

गिनी सुता वा। स्वगोत्रजा वा वरयेत्प्रमादात्तदा वरत्वं भगिनीपतित्वं॥
वाक्संबंधकृतानां तु स्नेहसंबंधभागिनां॥ न तयोरुद्वहेत्कन्यां सा
कन्या भगिनी भवेत्॥१६॥ सावित्री यस्य योद्दद्यात्तत्कन्यां न विवाहयेत्॥
तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत्॥ शाखांतर विषे माह वाजस
नेयी॥ समान प्रवरो भिन्नो मातृगोत्रे वरस्य हि॥ विवाहो नैव कर्तव्यो
सा कन्या भगिनी भवेत्॥ पैत्रे प्रवर भिन्नत्वं चिंतनीयं न मातृके॥ केव
लं मातृगोत्रं च वर्ज्यं कात्यायनोऽब्रवीत्॥ गोत्रं मातुल पुत्राय वर्जयेत्प्र
वरान्न तु॥ स्वपुत्राया सुते गोत्रं प्रवरांश्च न चिंतयेत्॥ २॥ अथ गोत्र
निर्णयः॥ भृग्वंगिरः कश्यपो त्रि र्वसिष्ठागस्त्य गोधिजाः॥ सप्त ब्रह्मर्ष
यस्तेभ्यो गणाः पश्चाद्दशाभवत्॥ भृग्वाः पंच गणास्तद्वदष्टावंगिरसो

७ब गणाः ॥ अन्ये त्वेकैकगणिन इत्यष्टादशात ऊर्णाः ॥ जामदग्न्या वितह
व्यास्तथा ग्रत्समदाभिधः ॥ यार्धश्च वैद इत्येते भृगोः पंच गणाः स्मृताः ॥
७८ प्राग्जामदग्न्य वत्सश्च श्रीवत्सो वत्स इत्यपि ॥ ततो मांडव्यमंडूके मा
ण्डू इत्यन्नायिनः ॥ वैरोहितश्च वाल्मीकिः पाणिनी जमदग्निकः ॥ ऋष्टि
षेणार्ष्टिषेणौ चानूपो विंडुघटाः अपि ॥ प्राचीनयोग्य वैदाधा जामदग्न्य
गणार्षयः ॥ अत्र्यादिस्तोहन्सानां च पंचत्रिप्रवराः अपि ॥ २६ ॥ भार्गवच्य
वरांप्रवरौ च जामदग्न्य इति पंचप्रवराः ॥ शुद्धजामदग्न्यस्य त्रिःप्रवराः ॥
भार्गवच्यवनाप्नवानिति ॥ ऋष्टिषेणार्ष्टिषेणयोः पंचप्रवराः ॥ भार्गवना
र्ष्टिषेणानूपा इति ॥ विंद्वादीनां पंचप्रवराः ॥ भार्गवच्यवनाप्नवरौर्ववै
दा इति एवं चतुर्धाप्रवरेर्नीलोप्येप्येको गणो ह्ययं ॥ प्रवरऋषिसाम्येन
मिथो मीनविवाहिनः ॥ ३ ॥ इति जामदग्न्यगणाः ॥ वीतहव्यश्च यस्कश्च ७ब

वाधूलो मौनमौकसौ ॥ शार्कराक्षिश्च सार्ष्टिश्च जशोजकायनजैमिनि ॥
जीवंत्यायन जाबाली सावर्णिश्चा गणार्षयः ॥ वीतहव्यादयस्त्वन्ये त्रिः
प्रवरका अपि ॥ ३२ ॥ भार्गवो वीतहव्यसौ वेसा इति ॥ एतदेवंप्रवरक
मिथो मिन विवाहितः ॥ उन्नौ गार्त्समदस्येतो तृतीयो गण इष्यते ॥ अ
नयोः प्रवराः ॥ भार्गवो गार्त्समदशौनका इति ॥ एवं प्रवरसाम्येन मि
थो मीनविवाहिनः ॥ वाधश्चा मित्रयुक् चौनौ चतुर्थो गण इष्यते ॥ भा
र्गवप्रवराः भार्गवदैवोदासवाध्यश्वा इति ॥ एतत्प्रवरसाम्येन मिथो
मीन विवाहितः ॥ अथ वैन्यश्च पार्थश्च पंचमो गण इष्यते ॥ प्रवराः भार्ग
वो च वैन्यः पार्थ इत्येवतेत्रयः ॥ एतेप्येवं प्रवरका मिथो मीनविवाहिनः ॥
मिथो विवाह्याः पंचैते त्वन्यैस्ता भार्गवमादिमं ॥ जामदग्न्यादयः पंच

५९
५८

मिथो ग्राह्या विवाना दिमं ॥ अथांगिरसो गणाः ॥ गौतमोथ भरद्वाजः कपिः कण्वाथ मुद्गलः ॥ विरूपो हरितो विष्णुवृद्धश्चैवाष्टमो तमः ॥ तत्र अयास्यो शिजौ तथ्यो कक्षीवद्दीर्घतमसाः ॥ वामदेवो बाहदुक्थो गोतमस्य गणार्षयः ॥ आषष्टं त्रिः प्रवराः पंचप्रवरोंगिरसोत्तमः ॥ तथाहि आंगिरसायाश्च गोतमा इति ॥ आंगिरसो गोतमो तथ्या इति ॥ आंगिरस गोतम कांक्षीवता इति ॥ आंगिरस गोतमो दीर्घतमसा इति ॥ आंगिरस गोतम वारघ्या इति ॥ आंगिरस गोतमो चिध्यो शिवबार्हकथ्या इति ॥ प्रवरऋर्षी साम्ये न मिथो मीन विवाहितः ॥ अथ भरद्वाजगणाः ॥ भरद्वाजोथ कुसोग्निवैश्यो सौजावनिस्तंधा ॥ स वसं च सं वराद्व सं वेश्वापि कतस्तथा ॥

॥१३४५॥ शौंगशै शिरी हक्तिलरुद्रोवादनइत्यपि ॥ म तथा मातृवसा गार्ग्यः

५९

कपिः कलय इत्यपि ॥ एते सप्तदशाख्याता भरद्वाजगणार्षयः ॥ अत्रा द्रितः कतां तानां प्रवराः स्त्रीप्रकीर्त्तिताः ॥ अंगिरस बार्हस्पत्य भरद्वाजा इति ॥ शौंगशै शिरस्त्रीलाः पंचप्रवराः ॥ अंगिरस बार्हस्पत्य भाद्वाजा इति ॥ कत्य किला इति ॥ रूद्रादीनां पंचप्रवराः ॥ अंगिरस बार्हस्पत्य भारद्वाज सैन्य गर्ग्या इति ॥ प्रवर ऋर्षि साम्ये न मिथो मीन विवाहितः ॥ ५ ॥ अथ कपिलगणाः ॥ गोतमादि वद्वायं गणाः पुत्राष्टकान्वितः ॥ एतो ग्या र्ग्य कपेर्नेर्तुं स्वतंत्रेण विशेषितः ॥ भरद्वाजैः सहातोस्य विवाहों गिरूतो खिलैः ॥ गेयं स्वं स्वं विहायाथ विवाह स्तुनदो नवेत् ॥ ५२ ॥ तथा चोक्तं स्मृत्यर्थसारे ॥ कपि प्रसि

८०

द्वविहताविवद्धोस्वतंत्रएकोप्यपरोस्वतंत्रः॥ तत्रस्वतंत्रस्यकपिर्विवा
हंमिथोनरद्वाजकुलेनचाहुरिति॥ ग्रंथांतरेप्ययमर्थः॥ ॥ प्रकारां
तरेणदर्शितः॥ तत्रकतिचिन्नरद्वाजानभिधायोक्तं॥ नातःपरेणौ
दरितानधस्तान्मिथोविवाहस्तुकपिनपास्यतः॥ अविवाह्येन्यःपर्युदस्ता
नांकपिनांविवाहोस्तीत्युक्तंभवति॥ आश्वलायनगृह्यपरिशिष्टेतुस्प
ष्टंतेष्टकानरद्वाजेषुकपीनांविवाहसद्भावइत्यन्नापिनरद्वाजकुले
केषांचिद्विवाहमभिधायोक्तं॥ एतेषांतुविशेषोयमाचार्याहाभिधा
वनैः॥ अपरत्वदेयैश्चकपिलैर्विवाहस्त्विनिरिष्यते॥ ५७॥ अयंकपि
स्त्रिप्रवरकः॥ आंगिरसमरीचयोरुक्ताइति॥ अत्रकपिनामितिबहु
वचनं॥ तत्पुत्रानिप्रायेणतेचाप्युक्ताः॥ वरस्यिलंतिरश्चापिविंदुरा ८०

शंकुकपिंजलिः॥ नूयसिकर्णिविणीकिश्चैवजलंधरेतिचाष्टधा॥ कपिपुत्राः
समाख्याताःतेषांकपिवदिष्यते॥ कपिवदित्यनेनएतेषांनरद्वाजकुले
विवाहसिद्धिरित्युक्तं॥ कपिपुत्रेत्वोक्तामीनविवाहिनः॥ ६३॥ अत्रप्र
योगपारिजाते॥ नरद्वाजगणस्यापितथाकपिगणाथवा॥ विवाहोनवि
धेयंस्याद्न्योन्यंनकदाचनेति॥ अथकण्वगणः॥ आंगिरसाःतजमीढाः
कण्वाश्चपित्रयोद्यमी॥ मिथोविवाहंनार्हंतिसमानप्रवरायतः॥ केचि
त्प्रवरानन्यानेवाहुः॥ आंगिरसाघोरकण्वाइति॥ अथमुद्गलः॥ मु
द्गलश्चित्रवेदीचताक्ष्योभार्गश्चएवच॥ मौद्गलश्चेतिपंचैतेमुद्गल
स्यगणार्षयः॥ एतेषांत्रिःप्रवराः॥ आंगिरसभार्ग्यश्वमौद्गल्याइति॥
प्रवरैस्यैनपंचामिथोमीनविवाहितः॥ अथहारितः॥ हारितश्चांबरी

८१

षश्च मांधाता यौवनाश्वकाः॥ कौत्सेपक्षः शंखदन्तौ तोहेमवगवाग्निधाः॥ कौ
मारश्च दशाब्वेतेहा हारीतस्य गणर्षयः॥ एतेषां त्रिःप्रवराः॥ आंगिरसां
बरीषहारिता इति॥ आंगिरसांबरीषयौवनाश्वा इति द्विधा॥ तु
ल्यैकप्रवरत्वेन मीथो मीः न विवाहितः॥ अथ विष्णुवृद्धे॥ विष्णुवृद्धः क
गमठं शठणाश्च पदन्नणाः॥ शैपवित्यश्चोपविन्द्र डेणो बादरायणः॥ नि
तुंदिर्मद्रणः कात्यारुणिः सात्यकिरित्यपि॥ चतुर्दशैते विख्याता वि
ष्णुवृद्धगणर्षयः॥ एतेषां त्रयः प्रवराः॥ आंगिरसविष्णुवृद्धबादराय
णा इति॥ आंगिरसयौरकुसत्रासदस्वा इति॥ तुल्यैकप्रवरत्वेन मि
थो मीन विवाहितः॥ इत्यांगिरसप्रकरणं॥ अथ विशेषमाह॥ पंचा
नां त्रिषु मासान्या द्विवाहस्त्रिषु च द्वयोः॥ अंगिरोगणे चैकं शेषेषे

८१

कोपि वारयेत्॥ शेषेष्विति कश्यपादिष्वित्यर्थः॥ अथ कश्यपाः॥ कश्यपः का
श्यपावत्सारासितौ नैध्रुवस्तथा॥ वैशंपायनन्नूताश्च स्सुमेधो नैध्रु
वा अपमि॥ रेभो रैभ्यः शांडिलश्च सोजापिर्नागुरिस्तथा॥ धन्वंतरिश्च
शांडिल्यो देवलः कश्यपा अमी॥ कश्यपादीनां त्रिःप्रवराः॥ कश्यपावत्सा
रासिता इति॥ निध्रुवादीनां त्रिःप्रवराः॥ काश्यपावत्सारानैध्रुवा इ
ति॥ रेभादीनां त्रिप्रवराः॥ काश्यपावत्साररैभ्या इति॥ शांडिल्यादी
नां त्रियः प्रवराः॥ कश्यपाशांडिल्यदेवला इति॥ प्रवरत्र्यर्षिसामान्ये
न मिथो मीनविवाहिनः॥ ७६॥ अथात्रिगणाः॥ अथात्रिः प्रथमस्वस्ति
कृष्णचंद्रपदादिमाः॥ आत्रेया वामरथ्याश्च गविष्ठिरसमाकयः॥ पौ

र्चातिष्यातिथिश्चापिवहूतकधनंजयो॥ सुमंगलो बीजवापि सोमंगलोत्रि
वंशजाः॥ ऽपात्रावामनष्यादितानां त्रिःप्रवराः॥ ऽपात्रेयाश्वर्चनश्याश्वाइ
ति॥ गविष्टादिनांद्वित्रयांत्रयःप्रवराः॥ ऽपात्रेयगाविष्ठिरयोर्वातिष्याइ
ति॥ वाकुतकानांत्रयः ऽपात्रेयार्चनश्यावाश्वाइति॥ ऽपात्रिवाकुतगण
योः प्रवरैक्ये पि भिन्नशाखाध्ययनाद्भेद इत्युक्तिः॥ सुमंगलानांत्रिः
प्रवराः॥ ऽपात्रेयासुमंगलश्यावाश्वाइति॥ ऽपाघर्षैरविभेदेन मिथो
मीःन विवाहिनः॥ ८३॥ ऽपथवसिष्टगणाः॥ ऽपाद्यो वसिष्टो वासि
ष्टो उपमन्युरतः परं॥ ऽपानरद्वसुरप्येंद्र प्रथमश्च पाराशरः॥ पारा
शर्य्येव्यासशक्तिः कुंडिनो गणइत्यपि॥ सांख्यायनो जातूकर्ण्यकौं
डिण्यश्च ततः परं॥ मैत्रावरुणिरित्येते वसिष्टस्य गणर्षयः॥ ऽपाद्य

स्यप्रवरैक्यस्यात्तत्र स्युः प्रवरास्त्रयः॥ ऽपत्र वसिष्टस्त्वनामैकप्रवरः॥ ॥
वसिष्टभरद्वस्वेंद्र प्रमदाइति॥ पाराशरादीनां त्रिःप्रवराः॥ वसिष्टादी
नां त्रिःप्रवराः॥ वासिष्टशक्तिपाराशर्यीइति॥ कुंडलिनादीनां त्रिःप्रव
राः॥ वसिष्टमैत्रावरुणिकौडिण्याइति॥ प्रवरघार्षिसाम्येन मिथो मी
न विवाहिनः॥ ऽपथागस्त्यगणः॥ ऽपगस्तिश्च तथागस्त्योदाढर्यच्युति
---इधध्मताहः॥ सोमवाहःसारवाहस्त्रयोप्यमी॥ प्रवरांतविकल्पे
न मीथो मी न विवाहितः॥ ऽपत्र केचिदाह्निपतिं॥ एकगर्भसमुत्पत्याए
कनामत्वसंभव॥ मैत्रावरूण्योरनयोगणभेद। गणभेदकथंनवेदि
ति॥ १३८८॥ उच्यते॥ द्वयोरेकद्रूणोत्पत्तिनैकजातस्यसाधनं॥ स
मानसमयोत्पत्तेर्नामैक्यविचारतः॥ मित्रावरुणयोस्त्वेकोभेदादे
कंकथंनवेत॥ इति ग्रहवल्कुंनः प्राण्यश्न्योनकारणं॥ पतिहानागे

भेदेन नतयोरेतत्सोढयोः ॥ पृथगेव समुत्पत्तेर्भिन्नाविति समंजसं ॥ ॥
८३ ॥अथ विश्वामित्रगणः ॥ विश्वामित्रो देवरातिश्चिकितो गालवो मनुः ॥
तत्तेलिकिर्वलिरविप्पो याज्ञवल्क्यश्च कौशिकः ॥ उलोकोष्टरुदग्निश्च
धूम्रः शाकाविनिस्तथा ॥ शालंकायनिशालाग्नितथा शावनोद
लौ ॥ श्रीमतो देवतरसः कामाकापनसंज्ञकः ॥ देवश्रवाश्चाथ ध
नंजयधानंजयावुभौ ॥ मधुछंदाःप्रजाश्वाज्यो रोहिणो रोहिणा
ष्टकः ॥ रोहितःपूरणःपारिदश्वायश्च तथोरणो ॥ कतोरोदककाईपो
तौ ह्यालिलश्चाघमर्षणः ॥ स्तनुःपनस धूम्रौ च ववगैपीजगरस्त
था ॥ एक एवाग्निवैश्यपश्च शालंकायनसंज्ञितः ॥ शालाहौ लोहिता
हृश्च जह्नुश्चापिंडकौशिकः ॥ घृतकौशिक इत्येते विश्वामित्रगणर्ष ८३

यः ॥ प्रवरास्त्रय एवोक्ता विश्वामित्रगणस्य तु ॥ १४० ॥ विश्वामित्रो देव
रातानां त्रिःप्रवराः ॥ विश्वामित्रो देवरातोद्दालाइति ॥ श्रीमतादिचतु
र्णां त्रिःप्रवराः ॥ विश्वामित्रदेवरातदेवश्रवसाइति ॥ धनंज
याज्यादिचतुर्णां तास्त्रिःप्रवराः ॥ विश्वामित्रमधुछंदसाइति ॥ अ
जाइपयोस्त्रिप्रवराः ॥ मधुं विश्वामित्रमधुछंदसाइति ॥ रोहिणादी
नां त्रिःप्रवराः ॥ विश्वामित्ररोहिणाष्टकाइति ॥ अष्टकादीनां त्रिः
प्रवराः ॥ विश्वामित्रकात्याह्निलइति ॥ अघमर्षणं त्रिःप्रवराः ॥ वि
श्वामित्राघमर्षणाग्निदेश्वाइति ॥ शालंकायनादिषण्णां त्रिःप्रवराः ॥
विश्वामित्रशालंकायनकौशिकाइति ॥ प्रवरेष्वृषिसामान्ये मिथो मी
नविवाहिनः ॥ इति विश्वामित्रप्रकरणं ॥ एक एव ऋषिर्यत्र प्रवरेषु

न्नुवर्त्तते ॥ तावत्समानगोत्रत्वं रेतेन्न रवंगिरोगणात् ॥ एवमुक्तेषु भेदेषु
गणेष्वष्टादशस्वपि ॥ सामान्ये नोद्वहे प्राप्ते विशेषनिगद्यते ॥ १२ ॥ भार्ग
वांगिरसादीनां स्वगणादनुवर्त्तितः ॥ स्वगोत्रत्वमतस्तेषां नोद्वाहस्तेषु
विद्यते ॥ ऽन्ये स्वस्वंगणहित्वा विवहेयुर्गणांतरे ॥ गणांतरेपि केष्वा
नोद्वहेयुः परस्परं ॥ प्रदर्शयामस्तेष्वात्मान्गण भेद व्यवस्थितान् ॥
स्वतंत्राश्चास्वतंत्रश्च द्वौ कपिगणभेदतः ॥ १३ ॥ कवाद्यो जो नरद्वाजो वि
श्वामित्रगणद्वये ॥ विश्वामित्रो वीतहव्यो शालंकायन इष्यते ॥ वि
श्वामित्रात्रिगणयो विद्यंते च धनंजयः ॥ विश्वामित्रेण शृंगेण नर
द्वाजस्य वैशिरेः ॥ ह्यत्र जातो द्विगोत्रर्षि रुच्यते शौंगशैशिरि ॥ ऽतो
यं विप्रवचनो नोद्वहेतद्गणद्वये ॥ संकृतिः पूतिमाषाश्च रांकुः शै ८५

वगवस्तथा ॥ ऽपपरोगौरवीतश्च सांकृत्यश्च ततः परं ॥ १६ ॥ गंडिवैर्व्याघ्र
पादश्च नरद्वाजकुलोद्भवा ॥ क्रयक्रीता वसिष्ठेन नमोद्वास्वास्तद्गणद्वये ॥
जामदंद्द्यो देवरातो विश्वामित्रे कुले र्पितः ॥ दत्तपुत्रतया नैषवि
रास्वस्त्वत्कुलेद्वये ॥ काश्यपेन वसिष्ठेन कृता ता गौतमवंशजाः ॥
ऽपानष्टिरफुजिस्त्राति राजचारिस्तथैवच ॥ सेरजः ह्रीरजो वाकुसे
रं ध्रीराजसेवकाः ॥ स्वाशुचिः स्वाप्तुलिंगश्च लोगाद्रीशरदंवकाः ॥ २० ॥
त्रयोदशैते मुनयः समस्वाम्यात्स्वकृतीकृताः ॥ रात्रौ मम तवाक्षिति त
थैवेते व्यवस्थिता ॥ ऽतो गणत्रयोप्येते न विवाह्याः कथंचन ॥ ए
वं निर्णितमुद्वाहं परित्यज्यप्रमादिति ॥ तथा च स्मृत्यंतरे ॥ जमद
ग्नि गणस्यापि विश्वामित्रगणस्य च ॥ नदेवरातान गोत्रेण वि

८६
८५ विवाहस्यात्परस्परं ॥ भरद्वाजगणस्यापि विश्वामित्रगणस्य च ॥ कतशै
शिरश्शृंगैश्च नान्येषां पाणिपीडनं ॥ कश्यपस्यगणस्यापि वसिष्ठगणस्य च ॥
संकृतिं पूतिमाख्याभ्यां विवाहो न परस्परं ॥ पात्रेयस्यगणस्यापि वि
श्वामित्रगणस्य च ॥ जनजयाख्यगोत्रेण नान्येनं पाणिपीडनं ॥ २६ ॥ ॥
भरद्वाजगणस्यापि तथा कपिगणस्य च ॥ विवाहो न विधेयः स्यादित्येवं मुन
यो ब्रवीत् ॥ मौञ्जस्यगणस्यापि विरूपस्य च गणस्य च ॥ परस्परं न कु
र्वीत पाणिपीडनसत्क्रियां ॥ द्व्यामुष्यायणकाः सर्वे दत्तविक्रितकादयः ॥
गोत्रद्वयेपि नोद्वाहः शृङ्गशैशिरयोर्यथा ॥ प्रचार्यः ॥ द्व्यामुष्यायणक
स्यैव नोद्वाहो गोत्रयोर्द्वयोः ॥ तस्यापत्यस्य तज्जन्यगोत्रमेव विदुर्बुधाः ॥ २७ ॥
गुरौ सगोत्रप्रवरा नोद्वाह्याः इति योर्द्वयोः ॥ सगोत्रो ह्यननिर्देशोश्च
८६

विप्रैराचार्यगोत्रजां ॥ असंप्रज्ञातबंधूनामाचार्यप्रवराः स्मृताः ॥ पक्षे चा
स्मिन्विवाहेपि सगोत्रैः सह नेष्यते ॥ अप्रज्ञानाद्यथवाज्ञानाद्यस्तु वैय
द्विचोद्वहेत् ॥ समानप्रवरां कन्यां मातृतः परिपालयेत् ॥ तथा च समा
नप्रवरां कन्यां सपिंडां चैकगोत्रजां ॥ नैव तां वरयेत्प्राज्ञो मातृवत्परिपा
लयेत् ॥ समानप्रवरे भिन्ने मातृगोत्रे वरस्य च ॥ विवाहो नैव कुर्वीक
र्तव्यो इति केचिद्वदंति च ॥ ३६ ॥ इति नारायणभट्टविरचितायां धर्म
प्रवृत्तौ गोत्रनिर्णयप्रकरणं ॥ ॥ ॥ ॥ अथ जीवत्पितृकश्राद्ध
विधिः ॥ आमश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं ॥ न जीवत्पितृकः कुर्या
त्मुंडनं तीर्थिकं च यत् ॥ न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं ॥
~~नेत्रीन~~

८६

नजीवत्पितृकः कुर्यान्मुंडनं तैर्थिकं च यत् ॥ महालयं गयाश्राद्धं श्राद्धं चपि
तृतर्प्पणं ॥ श्राद्धादिकं यदा कर्त्तुं न शक्तश्चेत्पिता यदि ॥ तदा पुत्रेण कर्त्तव्यम
वश्यं पितुराज्ञया ॥ पाराशरः ॥ विद्यमानेपि पितरि श्राद्धं कर्त्तुमुपस्थितः ॥
पितृवत्सितृपुत्रादेः कुर्याछ्राद्धमसंशयः ॥ तथा च ॥ वृद्धौ च तीर्थे संन्यस्ते
ताते च पतिते सति ॥ तेभ्य एव पितादद्यात्तेभ्यो दद्यात्सुतः स्वयं ॥ उद्वाहे
पुत्रजनने पुत्रेष्ट्यां सोमके मखे ॥ तीर्थे ब्राह्मण आयाते षडेते जीवतः पि
तुः ॥ संग्रहशिष्टे । अन्वष्टक्ये गयाश्राद्धे सत्यां यत्र मृतेहनि ॥ मातुश्राद्धं
सुतः कुर्यात्पितर्यपि च जीवति ॥ ७ ॥ अन्वष्टक्य इति प्रेतपक्षनवमी ॥ श्राद्ध
मित्यर्थः ॥ नजीवत्पितृकः कुर्याछ्राद्धं मातृक्षयाहते ॥ कृतेपि नवमी श्राद्धे
गृहे तद्वहि लुप्यते ॥ तथा च गोभिलः ॥ जीवमानः पिता यस्य माता चेन्म्रि ८६ ८७

यते यदि ॥ प्रेतपक्षे नवम्यां तु मातुः श्राद्धं विधीयते ॥ महालये नवम्यां तु श्राद्धं
कुर्यान्मृतेहनि ॥ कुर्यात्पिंडविधानेन पितर्यपि च जीवति ॥ नावश्यान्नवमी
श्राद्धं यावद्वै वर्त्तते पिता ॥ तदैव लुप्यते श्राद्धं मृतश्चेद्यदि वै पिता ॥ सुवा
सिन्यां मृतायां च यछ्राद्धं प्रतिवत्सरं ॥ सुवासिन्यैः प्रदातव्यं ब्राह्मणैः सह
भोजनं ॥ अथ सापत्न्यमातृविषयं ॥ सारावल्यां ॥ एकभर्त्तृकपत्नीनामपु
त्रनिधनं गताः ॥ अनस्याः पुत्रवत्वेपि कर्त्तामन [illegible] तेवितत्र तु ॥ अत्र के
चिद्विशेषमाह ॥ सापत्न्यजननी यस्य पितुश्चेज्जीवतो मृता ॥ अपुत्रा य
दि सा चापि तस्याः कार्याः कथं क्रिया ॥ मनुः ॥ सर्वासामेकपत्नीनामेका
चेत्पुत्रिणी भवेत् ॥ सर्वास्तानेन पुत्रेण पुत्रिण्यो मनुरब्रवीत् ॥ एकै
कपुत्रिणां तुल्या ह्यपुत्रा निधनं गता ॥ तस्याः क्रियादिकं केन कर्त्तव्यं

पितृमेधकं॥१८५॥एकेनैव तु कर्त्तव्यं ज्येष्ठपत्नीसुतेन च॥जन्मज्येष्ठेन चा
मातुः सपत्न्याऽप्यपि कर्म कृत्॥कृत्वा सौ वपनं पुत्रः पित्रोस्तु जीवतोरपि॥
सपत्न्याः मातुः कुर्वीत पैतृमेधिककर्म च॥चकारात्प्रतिसांवत्सरीकादिक
मपि कुर्यादित्यर्थः॥मृतामातरि जीवत्यां सापत्न्यजननी यदि॥पितामह्या
दिभिः कुर्यात्प्रत्यब्दं न तु तर्पणं॥५३॥ऽथ बहुपत्नीकपुत्रविषयं॥एकभर्त्तृ
कपत्नीनां सर्वासां संततिवैसुताः॥पितुर्मरणकाले तु ज्येष्ठपत्नीसुतोग्र
जः॥ऽथ कर्माधिकारिणः॥पुत्रानाह याज्ञवल्क्यः॥ऽौरसो धर्मपत्नीजः
स्तत्समः पुत्रिकासुतः॥क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥गृ
हे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः॥कानीनः कन्यका जातो माता
महसुतः स्मृतः॥ऽक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः॥दद्यान्मा

तापिता चा यं स पुत्रो दत्तको भवेत्॥त्रा॥क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्या
त्स्वयंकृतः॥दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः॥उत्सृष्टो गृह्य
ते यस्तु सोपि विद्धो भवेत्सुतः॥पिंडदोंशहरश्चैषां पूर्वाभावे परः परः॥
॥१८६॥मनुः पारिजाते॥ज्येष्ठ एव सुतः कुर्यादविभक्तैः सहानुजैः॥पुत्रो
र्वाद्धिकं श्राद्धमन्येषां न च ते सह॥प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौर
सौ॥कुर्यातामितरे कुर्युरेकोद्दिष्टं सुतादयः॥ऽौरसः पार्वणेनैव पि
त्रोरेव विधीयते॥दत्तपुत्रादयः सर्वे एकोद्दिष्टविधानतः॥व्यामुष्या
यणकाद्दर्शुदर्श्यां पिंडोदके पृथक्॥श्राद्धं कुर्युस्तवोश्चैव पित्रोर्द्दत्त
गृहीतयोः॥यस्य यो बीजतो जातस्तस्यैव पार्वणं स्मृतं॥एकोद्दिष्टम
थान्यस्य विधिरेक उदाहृतः॥पितुश्चैव गृहीतस्य मातुश्चैव तथैव

८९ च॥ इत्तः कुर्यात शरीरे वनान्येषां तु कदाचन॥ ६६॥ ऽथान्याधिकारः॥ पुत्र
८८ पौत्रश्च तज्जश्च पितामाता स्नुषा तथा॥ भगिनी भागिनीयश्च सपिंडोथ
नहार्यपि॥ एतेष्ववहिताकश्चित्पूर्वभावे परस्परं॥ ऽथानुपनीताधिका
रे॥ विश्वरूपे॥ ऽथसंस्कृते न विप्रेण पत्न्या वापि समंत्रकं॥ ऽथाग्निदाहप्र
कर्त्तव्यमन्यसर्वं तु कारयेत्॥ कुर्याद्दनूपनीतोपि मंत्रवत्पैत्रमेधि
स्या ५ कं॥ यद्यसौ कृतचूडस्याद्यदि वा त्रिवत्सरः॥ कृतचूडस्तु कुर्वीत द्दु
द्दुदकं पिंडमेव च॥ स्वधाकारं कुर्वीत वेदोच्चारणं कारयेत्॥ कृतचूडा न ४
पनीतः सपित्रोः श्राद्धं समाचरेत्॥ उदाहारे स्वधाकारं न तु वेदान्हरा
एपसौ॥ १४७॥ मनुः॥ न ह्यस्मिन्युज्यते किंचिद्यावन्मौंजीबंधनात्सदा॥ ॥
नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते॥ स्वधादिनयनं प्रेतका ८९

च ४

ऽथपुत्रातु यदा भार्या संप्राप्ते भर्तुरौर्ध्वदैहिके॥ रजश्चला भवेत्तस्या तु सौ
कुर्यात्स्वपंचमेहनि॥ १॥

र्यमित्यर्थः॥ पुत्रे सति निषेधः॥ पुत्रेषु विद्यमानेषु नान्यो न्यं कारयेत्स्वधां॥
ऽथान्तकृत्यं ह्यपुत्रस्य श्राद्धं कुर्याः सनाथकं॥ प्राणत्यागो भवेद्यत्र तीर्थे वा स्व
गृहेपि वा॥ ॥प्रेतकार्याणि तत्रैव कुर्याद्दन्यत्र नैव तु॥ ॥ऽथापुत्रविषये॥
पत्नी कुर्यादपुत्रस्य पुत्रिकापुत्र एव वा॥ कनीयान्भ्रातृजो वापि पूर्वाभावे
परस्परः॥ ॥ऽथवपनविधिः॥ ॥ऽथाचार्यः॥ निषेधेऽसत्यपित्रोर
पित्रोरेव मृतेहनि॥ वापयेयुः सुताः पित्रोर्मरणे श्रवणेपि च॥ ॥
संवर्त्तः॥ गयायां भास्करक्षेत्रे माता पित्रोर्मृतेहनि॥ ऽथाधाने यज्ञका
ले च षट्सु वै वपनं स्मृतं॥ ७६॥ मातामहपितृव्याणां मातुलाग्रजयोर्गु=
रोः॥ श्वशुराचार्ययोः स्वामि पत्न्योर्वापि पितुः स्वसुः॥ मातुः स्वसुर्भगि
न्याश्चैव हि॥ एषां केपि बुधः प्रागुर्गर्भे वा नेपि कारयेत्॥ इति कर्म
कनिष्ठो ज्येष्ठ १

८ श्रि कर्तृविषयं ॥ तथाच व्याघ्रः ॥ विभक्ता वाविभक्ता वा पित्रोस्तु मरणे सुता ॥
वपनं कुर्वरन्येषां कुर्यात्कर्त्ता त्वयोभवेत् ॥ प्रथमेह्नि कर्त्ता स्वगोत्रो
येत् ॥ अपामास्त्रियादिकान्मंत्रान्स्तु क्तानि वर्जयन्स्वयं ॥ सव्येनैव ततोऽन्नादि
विधिनापरिवेषयेत् ॥ अन्नं च पायसं भोज्यं घृतं च व्यंजनादिकं ॥ सूपमंते
प्रदातव्यं सर्वस्माद्देवपूर्वकं ॥ कर्ता दक्षिणतो देवे पायसादि द्रव्यं च यत् ॥
तथाच वामतः स्वस्य पैतृके परिवेषयेत् ॥ देवपात्रे स्थितं चान्नं गायत्र्याचाभि
मंत्रयेत् ॥ उद्दिश्यमानं विप्रेभ्यो दास्यमानमथापि वा ॥ दत्वा जपेत्ततो मं
त्रं ये देवासो दिवीत्यथ ॥ पितृभ्यो पितथा दत्वा ये चेह ति जपेदथ ॥ २०० ॥ ॥
तिष्ठन्कुर्यादुपस्थानं देवतान्यइति क्रमात् ॥ नमेदित्यादिभिर्मंत्रैः ॥

सव्ये वद्विजाः स्मृतिः ॥ तिथिवारादिकानुक्त्वा गृहीत्वा सतिलान्जलं ॥
पितृन्देवान्समुद्दिश्य क्रियमाणेन वै मया ॥ श्राद्धानेव पितुश्चास्मात्ति
तृणं चैव मे वहि ॥ ब्रह्मलोका निवासो स्तु निनयेत्सतिलंजलं ॥ ब्राह्मणैः
प्रोक्तपि वास्त्वन्नं गायत्री समुदीरयेत् ॥ परिषेचनमन्नस्य कारयेद्देवपूर्व
कं ॥ चित्रगुप्तबलिं चैव न दद्याच्छ्राद्धभुग्द्विजः ॥ अन्नेन वाथ वाऽन्येन जले
नान्नेन वापि च ॥ तृप्त्येवापोशनार्थं हि पित्रादि द्विजपाणिषु ॥ निनयेत्सु
जलं चाथ सव्येनैव तु दैविकं ॥ सकृदु [illegible] क्त्वा तु गायत्रीं पित्रादिषु च
वै मधु ॥ भोजने चापसव्येन [illegible]तु देयं सव्येन दैविकं ॥ तिष्ठन्नेव स्म
रेत्स्मादि इशानादि नु दद्भ्युरवः ॥ तत्सद्देवान्न तं चास्तु जुषध्वं तु यथासु
खं ॥ उत्क्रामन्तो पस्तरणमसी स्वाहा पिबेदथ वा ॥ वाग्यतो भोजनं कुर्युः

लीर्बर्धं यत्नाद्यथारुचिं ॥ भुंजानान् श्रावयेद्विप्रान् रक्षोघ्नान्पितृलिंगका
न् ॥ पुराणानि पवित्राणि रुचोः गिता पितृस्तुतौ ॥ १३ ॥ यावदुष्णं भवेदन्
नं यावद्भुंजंत वाग्यता ॥ पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणाः ॥ भो
जनस्य तु पर्याप्तं किंचिद्देयं ततोधिकं ॥ यद्यन्नं भुक्ते ततः किंचित्किंचिदु
च्छिष्टभागिनां ॥ इष्टात्त्वेषु विप्रेषु गायत्रीं समुदीरयेत् ॥ तृप्तास्थ इति
तान्पृष्ट्वा देवांश्चाथ पितॄनपि ॥ तृप्तेषु श्रावयेद्विप्रो मधुवाता ऋताय
ते ॥ अप[illegible]हन्निति च तान्विप्रान् संपन्नमिति पृच्छतः ॥ क्रियतामन्न
शेषं किं तेचेष्टैः सह भुंजतां ॥ तद्वाक्स्वीकृत्य सर्वस्मात्किंचित्किंचित्कृतां
चयेत् ॥ सर्ववर्णैकमन्नाद्यमानीयाश्चाप्यवारि समुत्सृजेद्भुक्तवता १२३
मग्रतः प्रकिरेद्भुवि ॥ पुरतश्चातिलान्दर्भान्क्षिप्तोद्यापः पितृभोजनात् ॥

येनाग्निदग्धा मंत्रेण तुभ्यमन्नं प्रकिरेदथ ॥ २८ ॥ पितृयज्ञचरोरन्नं दक्षि
णे प्रक्षिपेदथ ॥ यजमानकुलेजाता इति मंत्रं समुच्चरेत् ॥ यद्यन्नं भुक्ते ततः
किंचित्किंचित्पृथक् पिंडार्थमुद्धरेत् ॥ माषाः सर्वत्र वर्ज्याः स्युः दैवे पित्र्ये च कर्मणि ॥ प्रेत
पिंडेन चाग्राह्या इत्येवं शौनकोब्रवीत् ॥ उत्तराचमनात्पूर्वं पिंडदानं भवेद्धि हि ॥ पश्चा
द्यापि वदंत्यन्ये केचिद्ब्रह्मविदो जनाः ॥ पिंडदानमनीचां तेषां चांतेष्वथवा भवेत् ॥ अ
नौ निनयनाद्यंते पितृयज्ञं समापयेत् ॥ २९ ॥ सान्निध्ये नैव गृह्याग्नेरथवोच्छिष्टस
न्निधौ ॥ पिंडदानं न वेच्चैव वक्ति कारवचो यथा ॥ अपर्वाग स्माह्निरखेत्स्मेन लेखाप
हता इति ॥ अपसुहता मवस्तीर्य सकृदाच्छिन्नबर्हिषा ॥ लेखायां पिंडदेशे तु शिंधुं
तं परिस्त्रिभिः ॥ तत्र पिंडत्रयं दद्यात्पराचीनेन पाणिना ॥ पितरस्तत्र वैतत्ते विहा
ये चेति मंत्रतः ॥ पित्र्येनामानि यानीयात्तत्रया द्विपदनुक्रमात् ॥ ३० ॥ अग्निष्वा
त्ता पितर इति तानन्नुमंत्रयतु ॥ ५ ॥ अप्रदक्षिणमावृत्या ह्युदमाणाग्नियम्य
च ॥ अभ्यावृत्यानुमंत्रामीमदंत्या इति मंत्रतः ॥ चरुशेषमवघ्राय निनयेत्
अप्सा

वेवज्जलं ॥ आघ्रायाथ चरोः शेषं मामाचामेदुपवीतिना ॥ निनयेदपसव्येन शुंधंतामिति
पोषवे ॥ अन्यवावदेति नामा निमंत्र्यान्ते नमज्जनं ॥ दद्याद्दशामेषेतद्धेति पिंडेषु
तपरं ॥ दद्यात्पिंडेषु लोमानि प्रकोष्ठस्थानि यानि च ॥ पंचाशद्वत्सरादूर्ध्वं नवोर्णिं
वेति वृत्तिकृत् ॥ वरुणः पितृपिंडे स्यात्प्रजापतिः पितामहे ॥ प्रपितामहपिंडाग्नि
रित्येताः पिंडदेवताः ॥ ३६ ॥ दत्वा पिंडत्रयं चेत्थं सव्येनैव तु पूजयेत् ॥ गंधपुष्पादिभि
श्चैव पिंडाधिष्ठात्रिदेवताः ॥ यत्किंचित्पच्यते गेहे भक्ष्यभोज्यादिकं च यत् ॥ अनि
वेद्य न भोक्तव्यं पिंडमूले कदाचन ॥ नमो व इत्युपस्थाय मनोन्वेसेपठ्य चेन तु ॥ प
रेनवेति मंत्रेण पिंडांस्तान्प्रवाहयेत् ॥ ३८ ॥ औपासनाग्निकं गच्छेज्जपेदग्ने त
मित्यृचं ॥ यदंतरिक्षमित्येतां तस्य एव जपेदृचं ॥ ३९ ॥ तिष्विवारादिकान्नरत्वा
पितॄन्पूर्ववदुद्धरेत् ॥ पितृणां ब्रह्मलोके स्याद्दत्वा तु निनयेज्जलं ॥ अर्चो
तानां चक्षुष्यपूर्वपात्रीं नू प्रक्षालयेदथ ॥ मध्यमध्ये जलं चैव दद्याद्यावत्कुशा
स्तृतान् ॥ पुनर्देयं जलं देवे पितृणामपसव्यतः ॥ जलं दद्यात्तिलान्दर्भान्

स्तृतान्पूर्ववज्जलं ॥ स्पृष्ट्वाथ तु तु क्रवंतोस्य गोत्रनामाभिवादयेत् ॥ प्रत्युचुस्ते त
तो विप्राः पितृप्रसादस्त्वित्यथ ॥ पितृप्रसादतो लब्धान्संगृह्य स्वयमाहृता
न् ॥ धारयेच्छिरसि स्वस्य स्वगोत्रस्याभिवृद्धये ॥ चालयित्वाथ पात्राणि स्वस्ति
त्यथ समुद्धरेत् ॥ दद्याद्दक्षिणमुदकं दैवे पित्र्ये यथाक्रमं ॥ अन्नं प्रकिरणं
केचिदत्रैव कुर्वंति सूरयः ॥ पात्रस्थानेषु सर्वेषु यथाचारो भवेदिह ॥ अन्नप्रकी
रणार्थं यत्तद्दानीं तु जलत्कृतो ॥ आचांतानां समीपे तु स्वयतः प्रकिरेद्भुवि ॥ असं
स्कृतेति मंत्रेति पितॄणां प्रकिरेद्भुवि ॥ असोमपा [illegible] श्च मंत्रेण देवानां प्रकि
रेद्भुवि ॥ उत्तानं प्रथमं पात्रं कृत्वा यज्ञोपवीत्यथ ॥ दत्वाप दक्षिणांशास्त्या द्विजे
भ्योथ स्वधोच्यतां ॥ ५० ॥ अवशिष्टं तु यत्किंचिदर्घ्यपात्रास्थितं जलं ॥ पिंडानां
पुरतः सिंचेदेतां स्वधोच्यतामिति ॥ अनुज्ञया तु विप्राणां ततः पिंडान्समुद्ध
रेत् ॥ शांतिरित्यादिभिर्मंत्रैः पिंडस्थाने जलं क्षिपेत् ॥ स्वस्तीति हि तुद्धरेत्

१२५ कर्त्ता ब्राह्मणैः शोभनं तेरुचिः ॥ ततो विसर्जयेच्छ्राद्धं वाजे वाजेपइत्यृचा ॥ गत्तिष्टतेतिवा
मांसं स्पृष्ट्वा विप्रस्तनै पितृ ॥ सहैव पितरो देवैः स्वस्थानं गंतुमुद्यता ॥ ५३ ॥ ऽपमावाज
स्यप्रसव इति मंत्रं समुच्चरेत् ॥ त्रिःप्रदक्षिणमावृत्य मंडलस्यान्द्विजोनघ ॥ पवि
त्रं ग्रंथिमुत्सृज्य मंडलं विसृजेज्जलं ॥ दक्षिणाभिमुखस्तिष्ठन्नयेच तामान्वरान्पि
तॄन् ॥ ५६ ॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेवच ॥ श्रद्धाच नो माव्यगमद्बहुदेयं
च नोस्त्व ॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि ॥ याचितारश्च नः संतु मा च याचि
ष्म कंचन ॥ याचितारं प्रति ब्रूयुस्तथैवास्त्विति ते द्विजाः ॥ स्वादुषंसद इत्येतान
त्रीकृत्य निवेदयेत् ॥ उपरुतान्प्राक्षिपेत्स्वादे ष्विदं वस्तु तथैवच ॥ तेनेद[illegible]प्याहि
षस्तेभ्यः संतुष्टोस्तो यथारुचिः ॥ ६० ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि
च ॥ प्रयच्छंति तथा राज्यं प्रीता स्त्र्यंपितामहाः ॥ घृतेनाभ्यंज्य वै पादान्विप्राणां
क्षालयेदथ ॥ मर्दयेद्भक्तिभावेन ततस्त्वेवं तु वंदयेत् ॥ अद्य मे सफलं जन्मभ

१२५

वेत्पादाभिवंदनात् ॥ अद्य मे वंशजाः सर्वे पातो वो नुग्रहादिवं ॥ पत्रशाखादिदानेन
क्लेशतायूपमीदृशा ॥ तत्क्षेशाजा यच्चितो स्म विस्तत्पर्हे त्वमर्हसि ॥ वसिष्टसदृशा वि
प्रास्सूर्यपर्वसमातिथिः ॥ आसनादेन मस्कारो भवत्सत्कारएवतु ॥ यस्य स्मृत्याच ॥
श्राद्धसंपूर्णतां याति प्रसादाद्भवतामम ॥ जपेन्मंत्रं वसिष्टेति देवानूवसिष्टइत्यथ ॥
क्षमध्वं भो द्विजन्मानः पितृयज्ञे ममाध्वरैः ॥ कृत्वातु संपुटौ पाणी स्वासीमांतमनुव्र
जेत् ॥ म्रियते चेत्पितायस्य विद्यमाने पितामहे ॥ पैतृकादिषुनामानि कथमेवोच्च
रेदिति ॥ द्विवारं पितृनाम्ने व पितृकादिवेयतः ॥ प्रपितामहनामस्यादेकवार
मितीहतु ॥ अनेन विधिना श्राद्धं कुर्याज्जीवत्पितामहः ॥ दद्यात्पिंडद्वयं
पित्रे चाप्येकं प्रपितामहे ॥ २·७० ॥ इति श्रीनारायणभट्टविरचितायां
धर्मप्रवृत्तौ श्राद्धप्रकरणं ॥ अथ श्राद्धप्रयोगे न्याहवचनानिलि

१२६ स्मृते ॥ ॥प्रत्यब्दं विधिना पित्रोः श्राद्धं कृत्वा द्विजोत्तमः ॥ कुर्यात्पंचमहायज्ञानि
ति यज्ञविदो विदुः ॥ पित्रोः प्रत्याब्दिकं श्राद्धं विधिवत्तत्समाप्य च ॥ कार्याः पंचमहाय
ज्ञा इत्याह श्री कात्यायनः ॥ दद्याद्विसर्जितान्पिंडान्गुरवे दक्षिणान्वितान् ॥ तद
भावेन्यथान्यस्मै विप्रायैवाप्सु वा क्षिपेत् ॥७२॥ पिंडास्तु गोजविप्रेभ्यो दद्यादग्नौ
जलेपि वा ॥ प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टानि मार्जयेत् ॥ पात्राणि क्षालयेच्छ्रा
द्धे स्वयं शिष्योथवा सुतः ॥ न स्त्रीभिर्न च कौमारी नान्यश्चैवं कदाचन ॥ न दद्यादजो
ज विप्रेभ्यो जलेनैव तु निक्षिपेत् ॥ विकिरं तु द्विजोच्छिष्टं भूमौ स्वस्वात्तु नि
क्षिपेत् ॥७५॥ संकल्पादौ पादशौचे पिंडदाने विसर्जने ॥ अर्चनांते च विधिव
स्मृतमाचमनं त्विह ॥ संकल्पादौ च ये दर्भास्त्याज्या विप्रांघ्रिशोधने ॥ अर्चना
दौ च ये दर्भा निरत्याज्याः श्राद्धविसर्जने ॥ विसर्गश्चोल्मुकश्चाग्नौकरणं पंक्तिवा
रणं ॥ करंशुद्धिरपोशानं पितृपूर्वाणि षट्सदा ॥ स्वागते स्वस्तिवचने । १२६

गोत्रशेषप्रदक्षिणे ॥ अर्घे च दक्षिणादाने षट्सु सव्यं विधीयते ॥८०॥ आ
वाहने पिंडे च श्राद्धानुवादने हुते ॥ अन्नाच्छादनपात्रेषु नामान्यप्युच्च ऽ
चरेत् ॥ आवाह आसने पाद्ये अन्नदाने तथैव च ॥ अक्षय्यं पिंडदाने च
नामान्येव समुच्चरेत् ॥ अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा ॥ अन्न
दाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृता ॥८३॥ अन्नदाने विशेषः स्यादादौ
संबुद्धिरुच्चरेत् ॥ नपुंसमा च चतुर्थी च यथालिंगं च वक्तितः ॥ घृतलेपं
पादशौचे विष्टरे चोपवेशनं ॥ बर्कुचीनैव कुर्वंति पितृपात्रमधोमुखं ॥
दीयमानं च यच्चान्नं गायत्र्या प्रोक्षवारिणा ॥ दद्याच्छ्राद्धे विधायान्नं मन्त्रसो
परि वै कुशाः ॥८६॥ परिविष्टं तु यद्दास्यमंगुष्ठेन द्विजस्य तु ॥ स्पर्शयेत्सतिलं
तोयं श्राद्धे विप्रकरेर्पयेत् ॥ अन्नादि सकलं देयं विनाज्यं देवपूर्वकं ॥ उ
क्तोयं मुनिभिः श्राद्धे विधिर्वाजसनेयिनां ॥ प्रेतकार्येषु सर्वेषु सपिंडीक ऽ

रणे वतु ॥ पाणावेवेतु होमस्याद्न्यत्राग्नौकरेपि वा ॥ क्रतोद्दक्षौ वसुसत्यौ
कामकालौ धनुर्धरौ ॥ पुरूरवाद्रवौचेति विश्वेदेवाः स्मृता दश ॥
यज्ञे देवौ क्रतोदक्षौ वृद्धौ सत्यवसु स्मृता ॥ सपिंड्यां कामकालौ तु तीर्थे चै
व धनुर्धरौ ॥ पुरूरवाद्रवौचेति प्रत्यब्दे पार्वणेन तु ॥ अपत्यपाकुरुते यस्तु
श्राद्धं तस्य च धा नवेत् ॥ विभक्तिमथन ज्ञात्वा श्राद्धे संकल्पमारभेत् ॥ ९८
वंदेवानग[illegible]तिकर्व्यं पितरस्तथा ॥ ९९ ॥ [illegible] श्राद्धकन्मत्स्वीयदि
पंक्तौ द्विजन्मना ॥ स याति नरके घोरे पितृभिः सह मज्जति ॥ अज्ञात्वा कु
रुते श्राद्धं योनिश्रवणवर्जितं ॥ श्राद्धहं ता नवेत्कर्त्ता निराशाः पितरोग
ताः ॥ ब्राह्मणेभ्यो कृतां लब्ध्वा नाशीर्वचनसंयुता ॥ धारयेच्छिरसि स्वस्य
श्राद्धे नप्रेत कर्मसु ॥ ९६ ॥ द्वाभ्यामेव तु पाणिभ्यां मर्घ्यपात्राणि पैतृके ॥
सपिंडीकरणं प्रेतकार्येधेके न चैव हि ॥ श्राद्धात्प्रत्यब्दिकात्पूर्वं नृप १२१

र्णं क्रियते यदि ॥ पितरस्तेन तृप्यंतु ततो नं न नदंति ते ॥ नित्यकर्म कथं श्रा
द्धे कारुण्यानां च दार्ष्टिके ॥ अष्टिकातर्प्पणं पूर्वं कुर्याच्छ्राद्ध यतः परं ॥ कारुण्य
केन्यपाकेन वैश्वदेवमतः परं ॥ धर्मज्ञो विधिरुक्तोयं पैतृके मातृकेन
च ॥ २१०० ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा ललाटे यस्य दृश्यते ॥ कर्तुः श्रेवपवान्तोतु
निराशाः पितरो गताः ॥ रंगवल्यां कृतां रेखां स्कंधमाल्यां द्विजस्य च ॥
ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः ॥ गुग्गुलं बिल्वपत्रं च र
क्तपुष्पाणि केतकिं ॥ ५ ॥ जातीदर्शनमात्रेण निराशाः पितरोगताः ॥ ३ ॥
घंटावादं विवादं च हुंकारं हास्यरोदनं ॥ अवाच्यवचनं [illegible]वा निरा
शाः पितरो गताः ॥ प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् ॥ शेषं
महानसे कृत्वा तत्र पाकं समाचरेत् ॥ यदि स्याल्लौकिके पाकस्ततो

त्रं तत्र हूयते ॥ शाखाग्नौ यदि चेदग्नेर्होमं तत्रैव कारयेत् ॥ ६ ॥ होम इति
वैश्वदेवः ॥ श्राद्धं वस्त्रादिकं चैव विप्रेभ्यो दीयते यथा ॥ पिंडेभ्योऽपि तथा
दद्यादन्यथा निष्फलं भवेत् ॥ पितृयज्ञविधानेन श्राद्धे पाकपरिक्रि
या ॥ गृह्याग्नौ स्यात् दानं दत्वा तदाशौचं न विद्यते ॥ कर्म प्रारभ्य मारभ्य
न वैद्यावद्विसर्जनं ॥ यदि स्यात्सूतकं मध्ये त्वासन्नांतं न सूतकं ॥ सू
तकात्प्राक् समारब्धं कुर्याच्छ्राद्धीयमेव हि ॥ उपासमाप्तेर्न दोषस्या
दन्यकर्मसु सूतकं ॥ स्नात्वा कुर्वंति वै पाकं श्राद्धे पत्नी विधानतः ॥ पु
नः स्नात्वा ततश्चैव धारयेदन्यदंबरं ॥ संसृष्टानां न नियुक्तो ज्येष्ठः कु
र्यात्समंत्रकं ॥ सकलं पैतृकं पित्रोरनुज्ञातास्तु सोदरकाः ॥ तिथिवारा
दिकान् स्मृत्वा पितृनुद्दिश्य पावैयतः ॥ संसृज्येष्ठानुजाः सर्वे निनयेयु

स्तिलोदकं ॥ १७ ॥ संसृष्टेषु गते ज्येष्ठे विहितः श्राद्धं कनीयसा ॥ न कार्यमाज्ञ
या कार्यमित्याहुः केऽपि संकटे ॥ उपाकृत्या क्रियमाणे तु ज्येष्ठश्चेन्मध्य आग
ते ॥ ज्येष्ठः कुर्यात्ततः शेषं पिंडदानादिकं च यत् ॥ पिंडदानादधो ज्येष्ठे क्रि
यमाणे तु कर्मणि ॥ कनिष्ठाश्चागताः पिंडे निनयेयुस्तिलोदकं ॥ १९ ॥ क्रि
यते यदि वै श्राद्धमज्ञाने कस्य विद्यादि ॥ निमंत्रयेन्न तु ज्ञातिं न ज्ञातिः
स्वस्य चान्नतु ॥ यत्र वै पच्यते पाकं पदशालान्विते गृहे ॥ सांगणे पितृत
स्तस्य चरंति चह्यकुत्सिते ॥ मंत्राननुच्चार्य कर्तैव श्राद्धकर्म समाचरेत् ॥
नैवोच्चरेद्द्विजो मंत्रान् वृथा स्यादुच्चरेद्यदि ॥ न जपेयुर्द्विजा मंत्रान् घोरः
श्राद्धकर्मणि ॥ स्वादोऽस्तु तं जपेयुस्ते न तं च यमदैवतं ॥ २० ॥ अथ स
मस्तपितृर्चनविधिः ॥ देवानादौ समभ्यर्च्य पितृवर्गमथार्चयेत् ॥ मा

१२९

त्ववर्गतथामाताव्याहादेश्च यथाक्रमं ॥ पितृवर्गेमातामहास्यच ॥ ऽप्यर्चयित्वा
पक्षारूप्याद्र्चयेदितिशौनकः ॥ ऽपन्यपक्षः ॥ देवानभ्यर्च्यपित्रादीवर्गं
वर्गंसमर्चयेत् ॥ एकस्मिन्नथवाकालेसर्वानभ्यर्च्ययेपितॄन् ॥ एकोदि
ष्टविधानेनवकेचैवसमर्चयेत् ॥ तीर्थेमहालयेचैवहित्वाद्वादशदैव
तं ॥ पितुर्वर्गतथामातुर्वर्गेमातामहस्यच ॥ पत्न्यादेवर्गवर्गस्यनाना
न्मुख्यस्यक्रमात् ॥ संकल्पविधिरेषस्यात्तथाचैवानुवादने ॥ तीर्थेमहा
लयेचैवमर्चनंस्यात्पृथक्पृथक् ॥ २६ ॥ स्वस्याशक्तिविषये ॥ रो
गादिनायकश्राद्धंस्वयंकर्तुंनशक्यते ॥ पुत्रेणवाथशिष्येणज्ञातिनावा
पिकारयेत् ॥ २१२ ॥ एकादशीश्राद्धेभोजनं ॥ ॥ श्राद्धंकृत्वातुयोवि
प्रोमाहाद्युपवसेदिति ॥ राहुसंभवतिश्राद्धंसोपिगच्छेदधोगतिं ॥

१२९

एकादश्यांयदिश्राद्धंभवेद्यदिकथंचन ॥ कृत्वातूपवसेच्छ्राद्धंविधुरो
विधवापिच ॥ श्राद्धंकृत्वागृहस्थोपिनैवकुर्याद्दुपोषणं ॥ पितृशेषस्यम
श्नीयादेकादश्यांनदुष्यति ॥ मोहादुपवसेच्छ्राद्धंकृत्वाचेद्धरिवासरे ॥
समूढोनरकंयातिपितृभिस्सहमज्जति ॥ एतस्मात्तविषयं ॥ ॥ ऽप
पवैष्णवविषये ॥ एकादश्यांयथाश्राद्धंभ्रत्यद्यदिवाऽपपि ॥ कार्यंभे
वहितच्छ्राद्धंनुपवासकथंभवेत् ॥ उपवासोदानीतच्छ्राद्धं ॥ नैमितिकं
भवेत् ॥ कृत्वातुपवसेश्राद्धंशेषंमाघ्राह्यवैचरोः ॥ स्कंदे ॥ तएवोपव
सेयुश्चेद्वैष्णवाहरिवासरे ॥ कृत्वातुविधिनाश्राद्धंमाघ्रायपितृसेवि
तं ॥ श्राद्धंकृत्वासमाघ्रायपितृशेषंविधानतः ॥ उपवासंततःकुर्या
त्केचिदेवंविदुर्बुधाः ॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोतिथिप्रियः ॥
श्राद्धकृत्सत्यवादीचगृहस्थोपिविमुच्यते ॥ पितृयज्ञात्परोधर्मःपि

त्वयज्ञात्परं तपः ॥ पितृयज्ञात्परं कर्म नान्यदस्तिच भूतले ॥ ३७ ॥ इति
श्रीनारायणभट्टपंडितविरचितायां धर्मप्रवृत्तौ श्राद्धप्रकरणं ॥ ॥ ॥
॥ अथ दानविधिरभिधीयते ॥ ॥ तत्र तावद्दानप्रशंसा । श्रुतिः ॥ दक्षिणा
वतामिदिमानि ति ॥ उक्षादि विद्दक्षिणावंतो ऽमस्तुर्ये ऽप्रश्चदा तस्माद्दा
नपरमंवदंति ॥ इत्यादि श्रुतिवचनानि ॥ तथाच याज्ञवल्क्यः ॥ देशका
लउपायेनद्रव्यंश्रद्धासमन्वितं ॥ पात्रेप्रदीयते यत्तत्सकलंधर्मलक्ष
णं ॥ नविद्यायाःकेवलयातपसाकेवलेनहि ॥ विद्यातपोभ्यांसुक्तंयत्त
द्विपात्रंप्रचक्षते ॥ पात्रेयत्तंतुयत्किंचिच्छुचिर्नूलासमाहितः ॥ ज्ञेयंत
त्सर्वमक्षयंमहादानादिकंचयत् ॥ [illegible] दशातिप्रत्यहं यस्तु हिरण्या
न्नादिकंचयत् ॥ भुक्त्वाभोगान्यथाकामान्सोश्नुते पदमव्ययं ॥ हिरण्य
मन्नमुदकंफलपुष्पादिकंचयत् ॥ यत्तुकिंचित्प्रत्यहं देयं यथावित्ता १३०

नुसारतः ॥ दानानि ॥ दानंनैमित्तिकंदद्यात्सुसंकल्प्य यथाविधिः ॥ नि
त्यदानेतुवैवस्यात्संकल्पादिफलादिके ॥ ४९ ॥ सर्वत्राभ्युखो दा
ताजुहीताचउदङ्मुखः ॥ सजलंदक्षिणायुक्तंदद्याद्विप्रकरेसदा ॥
वित्तंविप्रकरेदत्तंसद्यःशतगुणंभवेत् ॥ पालस्यादथवालोभा
न्निःफलंस्याद्दिनांतरे ॥ यत्तत्संकल्पितंद्रव्यंतद्दिनेचेन्नदीयते ॥
द्विगुणंस्याद्द्वितीयेह्नित्रितीयेत्रिगुणंभवेत् ॥ अथ गोदानं ॥ गवा
मंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यात्ततः
शांतिंप्रयच्छमे ॥ कपिलेसर्वदेवानांपूजनीयासिरोहिणि ॥ ती
र्थविर्गमये ऽसः यस्माद्ततःशांतिंप्रयच्छमे ॥ कल्पधेनोनमस्तेस्तु
कृष्णाविष्णुशिवात्मकः ॥ जन्मप्रभृतिपापानिकल्पेनाशयमेसदा ॥

५० ।। अथ भूदानं ।। सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता ।। अनंत
संख्यफलदा मतः शांतिं प्रयच्छ मे ।। यस्या रोहंति बीजानि काले चैव म
हीतले ।। तत्प्रसादात्सकला मम संतु मनोरथाः ।। दानान्यन्यानि
सर्वाणि कनकादीनि यानि च ।। तानि भूमिप्रदानस्य कलां नार्हं
ति षोडशीं ।। अथ तिलदानं ।। महर्षिगोत्रसंभूताः काश्यपस्य तिला
स्मृताः ।। तस्मात्तिलप्रदानेन मम पापं व्यपोहतु ।। अथ हिरण्यदानं ।।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।। अनंतपुण्यफलदमतः
शांतिं प्रयच्छ मे ।। अथाज्यदानं ।। कामधेनोः समुद्भूतं सर्वयज्ञे
षु साधनं ।। देवानामाज्यमाहारमतः शांति० ।। अथ धान्यदानं ।।
धान्यं करोषि दातारमिह लोके परत्र च ।। यस्मात्समुच्यते धा

न्यमतः शां० ।। २१ ।। अथ वस्त्रदानं ।। शीतवातोष्णसंत्राणं लज्जायार
क्षणं परं ।। देहालंकरं वस्त्रमतः० ।। पीतांबरं सदा पुण्यं देवानां परमं
प्रियः ।। अतो दानेन मे पापं हरत्वमे समं लीम ।। रक्तवस्त्रं महापुण्यं पा
दितस्य प्रियं सदा ।। २ ।। शुभदं सर्वलोकानां मतः० ।। मनोहरं नील
वस्त्रं बलभद्र प्रियं महत् ।। षण्मुखस्य प्रियं वस्त्रं नित्यं चित्रं मनोह
रं ।। तस्मादस्य प्रदानेन शांतिरस्तु सदा मम ।। पट्टकूलं सदा पु
ण्यं पवित्रं कीर्तिदं शुभं ।। सर्वदेवप्रियं यस्मात्स्मादतः० ।। ६७ ।।
किट जत्र सरं पुण्यं ममर ढुम संज्ञवं ।। पवित्रं सर्वदा यस्मादतः० ।।
अथ कंबलदानं ।। हिमनाशकरं पुण्यं कंबलं बलवर्धनं ।। दानेनानेन
वै यस्मादतः० ।। अथ सकलादिदानं ।। कुणजं चाविकं पुण्यं सर्वलोके

प्रियं श्रुतं ॥ सदापवित्रं परमं मतः ॥ ७० ॥ अथ गुडदानं ॥ गुड
मिक्षुरसोद्भूतं रसानां परमं परं ॥ दानेनानेन वै यस्मात् ॥
अथ शर्करादानं ॥ शर्करेक्षुरसोद्भूता सदा स्वादुकरा शुभा ॥
दानेनानेन मे नित्यं ॥ अथ रौप्यदानं ॥ पितॄणां वल्लभं य
स्मात् विष्णोर्वै शंकरस्य च ॥ रजता यातु मां नित्यं शोकसंसा
तापसागरात् ॥ अथ लवणदानं ॥ अन्नाद्याः स्वादुतां याति
लवणेन रसाश्रये ॥ नित्यं लवणदानेन मनः संतु मनो
रथाः ॥ अथ नानाधान्यदानं ॥ ब्राह्मणा निर्मिता पूर्वं व्रीहयो
यज्ञसाधनं ॥ अनेन व्रीहिदानेन मम संतु मनोरथाः ॥ व्रीही

जा संदुजाः शुद्धाः पितृदेवद्विजाः प्रियाः ॥ दानेनानेन मे संतु सर्व
कामाश्च संपदः ॥ ७९ ॥ अथ गोधूमदानं ॥ धान्यचूडामणिर्जं
बूद्वीपे गोधूमसंज्ञिकाः ॥ गंधर्वधनसंख्यानां मतः ॥ याव
नलदानं ॥ यावन्नताः प्रियकराः कांतिपुष्टिबलप्रदाः ॥ दाने
नानेन वै यस्मात् शांतिरस्तु सदा मम ॥ माषदानं ॥ यस्माद्देह
हिताः पथ्याः विष्णोर्देहसमुद्भवाः ॥ पितृतृप्तिकरा माषाः प्रय
च्छंतु शुभां गतिं ॥ ७८ ॥ मुद्गदानं ॥ मुद्गबीजानि वै यस्मा
त्प्रियाणि परमेष्ठिनः ॥ तस्मादेषां प्रदानेन मम० ॥ चणकाः ॥
गोवर्धनगिरेर्जाः रसमयेह हरिरद्धिताः ॥ चणकाः सर्वपा

पघ्नाः मतः ०॥ कुलित्थाः दानं ॥ ऽऽपञ्चिगर्भोद्भवाः सौम्याः बलारोग्य
यशःप्रदाः ॥ कुलत्थाः सर्वपापघ्ना मतः ०॥ निष्पावा दानं ॥ निष्पा
वा निर्मिता पूर्वं लोकानां च हितायवै ॥ दानेनानेन मेयस्य द
तः ०॥ यवाः दानं ॥ पूर्वमेव हि यज्ञार्थं ब्रह्मणा निर्मिताय
च ॥ ऽऽएनेन यवदानेन शांतिरस्तु सदा मम ॥ प्रियंगु दानं ॥
प्रियंगवः प्रियाय स्मादग्नेर्वै यज्ञसाधनाः ॥ तस्मात्प्रि
यंगु दानेन मतः ० ॥ ८५॥ कोद्रवा दानं ॥ कोद्रवा निर्मिता दे
वैः प्राचीनां च हितायवै ॥ यस्मात्तेषां प्रदानेन मतः ०॥ मसूराः
दानं ॥ मसूराः पुष्टिदा लोके ब्रह्मणा निर्मिता हिताः ॥ तस्मा
देषां प्रदानेन शांतिरस्तु सदा मम ॥ लांक दानं ॥ वातघ्नस

कालंकाबलदा रोगनाशना ॥ नवं लुलंक दानेन सर्वसंपदा
मम ॥ ॥इति धान्य दानं ॥ ऽऽअथान्न दानं ॥ ऽऽअन्नं ब्रह्ममयं साक्षा
ल्लोकानां प्राणरक्षणं ॥ ऽऽअन्न दानेन वै कामान्भुक्त्वा सायुज्य
माप्नुयात् ॥ ८६॥ जल दानं ॥ जलं ब्रह्ममयं नित्यं जीवनं सर्व
कारणं ॥ जल दानेन वै यस्मात्ततः शांति० ॥ मंडक दानं ॥ सू
र्यमंडल संभूताः सर्वमंगलदायकाः ॥ ४॥ मंडकाः सर्वदोष
घ्नाः ऽऽमतः ०॥ तैल दानं ॥ तैलं तिलसमुद्भूतं सर्वारिष्टनिवार
णं ॥ तुष्टिदं पुष्टिदं चैव मम आनिष्टं प्रशांतये ॥ नवनीत दानं ॥
क्षीरार्णव समुद्भूतं विष्णोस्तुष्टिकरं परं ॥ नवनीतं च दास्या
मि प्रीतिं मे देहि सर्वदा ॥ क्षीर दानं ॥ प्राणीनां जीवनं क्षीरं पि

त्वं देवप्रियं सदा ॥ कांतिदं पुष्टिदं नित्यमतः पा० ॥ दधिदानं ॥ दधिदधी
रोद्भवं पितॄणां तृप्तिकारणं ॥ अतस्तस्य प्रदानेन मतः पा० ॥ तक्र
दानं ॥ तक्रं दधिसमुद्भूतं प्राणिनां शांतिदं परं ॥ अतस्तक्रप्रदा
नेन शांतिरस्तु सदा मम ॥ अथ पुष्पदानं ॥ मनोहराणि पुष्पाणि
सदा देवप्रियाणि च ॥ अतस्तेषां प्रदानेन शांतिरस्तु सदा मम ॥
फलदानं ॥ फलं फलानि मधुरं द्विजदेवप्रियाणि च ॥ अतस्ते
षां प्रदानेन शांतिरस्तु० ॥ प्रियं स्वादुकरा नित्यं फलदत्तं म
नोहरं ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ छत्रदा
न ॥ संपदां भूषणं छत्रं वर्षातापनिवारणं ॥ अनेन प्रीतिदं
यस्माद्दत्तः० ॥ उपानद्दानं ॥ उपानहू प्रदास्यामि त्रिलोकंटक

रक्षणात् ॥ पादसंरक्षणार्थीय गृहाण त्वं सुखाय मे ॥ जलपात्रदानं ॥
वारिणा पूरितं पात्रं तापत्रयहरं शुभं ॥ पितॄणां तुष्टिदं स्वस्य गृहाण त्वं
सुखाय मे ॥ व्यंजनदानं ॥ व्यंजनं वासुदेवत्वं सर्वकालसुखप्रदं ॥
अस्य दानेन वै शांतिः सर्वदास्तु गृहे मम ॥ गृहदानं ॥ इदं गृहं गृ
हाण त्वं सर्वोपस्कर संयुतं ॥ तव विप्र प्रसादेन मम संतु मनोर
थाः ॥ काष्ठदानं ॥ काष्ठानामुत्तरं शीतं महादेवेन निर्मितं ॥ गं
८ प्र धकीरणं पुष्यं मतः पा० ॥ शिविकादानं ॥ शिविका सुखदा नित्यं महा
लक्ष्मीप्रिया सदा ॥ अस्य प्रदानेन वै मित्रं तस्याः सर्वदास्तु सुखं
मम ॥ मंचकदानं ॥ ~~सुखकरावनंच स्माके रावस्य प्रियं सस~~ ॥
मंचको रोगहा रोगघ्नः सर्वसौख्यप्रदायकः ॥ अस्य प्रदानेन वै नि

त्वं शांतिर० ॥ शयनं दानं ॥ सुखदं शयनं यस्मा केशवस्य प्रि
यं सदा ॥ दानेनानेन सौभाग्यं सर्वदास्तु गृहे मम ॥ कशिपुःदा
नं ॥ मृदु वै बीजकार्पास पूरितं सुखदं नृणां ॥ कशिपोश्च प्रदा
नेन सुखं स्यात्सर्वदा मम ॥ तांबूलदानं ॥ तांबूलं सुखदं लो
के सर्वदा मंगलप्रियं ॥ प्रियं चैव हि देवानां मतः० ॥ १७ ॥ ति
लपात्रदानं ॥ तिलपात्रं सदा पुण्यं सुवर्णं तिलपूरितं ॥ दाने
नानेन मे नित्यं सर्वारिष्टं प्रशाम्यतु ॥ धान्यदानं ॥ सर्वदेव
मयं धान्यं सर्वप्रीतिकरं महत् ॥ प्राणिनां जीवनं धान्यं मतः० ॥
दासीदानं ॥ दासीहं प्रत्यहं गेहे मार्जनादि क्रियावति ॥ सं
प्रदानेन चैव स्यात्सुखा संपत्सदास्तु मे ॥ शय्यादानं ॥ १३५

तांबूलपूगसंयुक्तां नानापरिमलैर्युतां ॥ वस्त्रेणाच्छादयेच्छय्यां नानारत्नसम
न्वितां ॥ धूपदानं ॥ धूपदानान्वितं भव्यं भाजनं कांस्यनिर्मितं ॥ मंचस्योन्नय
तो दीपं व्यजनं च सुगंधिकं ॥ सजलं कलशं दिव्यं वेण्यं च यथातथा ॥ स्था
पितं शिरसो भागे पाददेशे ह्युपानहौ ॥ कर्पूरेलालवंगादि यं प्रीतिकरं शु
भं ॥ प्रसाधिपनवंतक्रं कशिपुं तूपबर्हणं ॥ कशिपोस्तु प्रदानेन सुखं स्या
त्सर्वदा मम ॥ पुरतो गंधपानादि तथा चैवासनं न्यसेत् ॥ पृष्ठदेशे तु वै छ
त्रं न्यसेत्त्पूजां समाचरेत् ॥ ततो विप्रं समभ्यर्च्य दानं दद्याद्यथोचितं ॥ शो(
भनं मंचकं नव्यं पट्टेनेव सदावृतं ॥ सोपस्करं समायुक्तं नानारत्नोपशो
भितं ॥ पुष्पतांबूलसहितं नानापरिमलान्वितं ॥ मृदुनिबीजकर्पासतांबू
लस्तुनदं यतः ॥ शय्यास्या वात्मनो भक्तिं गौरीशंकरयोः प्रियां ॥ २६ ॥ दी
पदानं ॥ दीपदानप्रदो नित्यं देवतानां प्रियः सदा ॥ दानेनानेन भवेत्सौ

खंयशांतिर्मेवांछितंफलं ॥ सज्योतिर्गुणपात्रंचदीपंवाहुसमन्वितं ॥ सु
खदंचास्यदानेनशांतिर्मेयस्तुसर्वदा ॥ हरिद्रादानं ॥ गौरीप्रियाहरि
द्राचनित्यंकल्याणदायिनी ॥ दानेनास्याःसुखंशांतिसंपदस्तुसदामम ॥
कुंकुमदानं ॥ कुंकुमंशोभनंदिव्यंसर्वदामंगलप्रदं ॥ दानेनास्यसदा
सौख्यंसौभाग्यंशांतिदप्रदं ॥ सिंदुरदानं ॥ सिंदूरंशुभदंचैवगणनाथ
प्रियंसदा ॥ दानेनास्यगृहेशांतिसुखंचास्तुसदामम ॥ ३३ ॥ कस्तूरिका
दानं ॥ कस्तूरिभाग्यदाभव्यादेवमर्त्यप्रियासदा ॥ दानेनास्याःसुखंभाग्यं
शांतिरस्तुसदामम ॥ कलशदानं ॥ कलशंशुभदंभव्यंजलेनपरिपू
रितं ॥ दानेनास्यसदासौख्यंशांतिरस्तुसदागृहे ॥ गंधदानं ॥
गंधमनोहरोभव्यःशांतिदःसुखदःसदा ॥ संप्रदानेनचैवास्याशां
तिरस्तुसदामम ॥ कर्पूरदानं ॥ कपुरंरुचिरंविप्रगृहाणेमंसुपूजितं ॥ १३६

पुष्पगंधस्थितासामेकमलाप्रियतापिती ॥ दंडदानं ॥ भयनाशकरोदंडोवैण
वोदेवनिर्मितः ॥ दानेनानेनचैवास्यमतः ॥ ३८ ॥ सौभाग्यद्रव्यं ॥ सौभाग्य
द्रव्यदानंचस्त्रीभिःकार्यंप्रयत्नतः ॥ सन्नर्तकाभिःसंक्रांतौफलादीनांतथै
वहि ॥ दानंषोडशसंख्याकेरकैकस्यफलस्यच ॥ हेमराजतकांस्यानां
भाजनानियथाभवेत ॥ सगुडंतिलसंयुक्तंसुसंप्रीतिकरंलवणं ॥ सं
वर्धितंगृहाणेदंमतः ॥ पात्राणिदानं ॥ हिरण्यादीनिपात्राणिमृद्भांडा
नितथापिच ॥ गृहाणेमानिवैयस्मात्तोस्तुरःप्रियतामिति ॥ पिष्टदानं ॥
गोधूमजनिर्वंपिष्टंशिलायंत्रविनिःसृतं ॥ द्विजश्रेष्ठगृहाणेदंमतः ॥
पायसपूरितदानं ॥ सौवर्णभाजनंकांस्यंपायसान्नेनपूरितं ॥ दाने
नास्येचसौभाग्यंशांतिरस्तुसदावयोः ॥ ३९ ॥ कदलीदानं ॥ कदलीस
र्वदोषघ्नीहेमवर्णावरावृता ॥ दानेनास्याःसुखंभाग्यंशांतिरस्तुस

दानवयोः॥ हेमपात्रदानं॥ जन्मांतरसहस्रेषु यत्कृतं दुष्कृतं मया॥ हेमपा
त्रप्रदानेन मम पापं व्यपोहतु॥ रौप्यपात्रदानं॥ कन्यानृषणतः पापं परदा
राभिमर्षणात्॥ रौप्यपात्रप्रदानेन तानि नश्यंतु मे सदा॥ ताम्रपात्रदानं॥
परापवादपैशून्यं दुष्टमांसस्य भक्षणं॥ पापं गात्रोस्थितं ताम्रपात्र
दानेन नश्यतु॥ कांस्यपात्रदानं॥ मया पापान्यनेकानि कामाकामकृता
नि च॥ कांस्यपात्रप्रदानेन तानि नश्यंतु सर्वदा॥ लोहदानं॥ ज्ञानाज्ञा
नकृतं पापं मया लोभकृतं चिरात्॥ लोहपात्रप्रदानेन मम पीडां व्यपो
हतु॥ ताम्रं॥ सूर्यप्रीतिकरं ताम्रमारोग्यं बलवर्धनं॥ तस्माद स्यप्रदा
नेन प्रीयतां मे दिवाकरः॥ कांस्यं॥ कांस्य ब्रह्मशिवः साक्षात्क
समेतद्विभावसोः॥ कांस्यं विष्णुमयं यस्मादतः॥ ॥ पंचरत्नदानानि॥
यस्मात्सर्वेषु रत्नेषु देवाः सर्वे व्यवस्थिताः॥ रत्नदानेन मे शांतिं प्रय

च्छंतु सदा सुराः॥५५॥ माणिक्यदानं॥ माणिक्यं पद्मरागं तु वैडूर्यं वज्रमेव च॥
गोमेदं मरकतं चैव पुष्परागं च मौक्तिकं॥ हरितं च नवैतानि रत्नानि वदंति
हि॥ मौक्तिकं॥ मौक्तिकं भूषणं विष्णोः प्रियो गौर्याः प्रियस्य च॥ दानेनास्य
शिवं मेऽस्तु परत्रेह च सुखं सदा॥ प्रवालदानं॥ प्रवालं पुष्टिदं कांतिवर्ध
नं सुखदं सदा॥ दानेनास्य सुखं चैव मतः॥ ॥५६॥ मांगल्यदानं॥ मांग
ल्यमण्योर्लक्ष्म्याः प्रियायोगो यीश्च सर्वदा॥ दानेनैव सुखं शांति सौभाग्यं स
वैदास्तु मे॥ कर्णभूषणं॥ कर्णभूषणदानं॥ कर्णप्रसाददा स्त्रीणां भूषणं
मंगलप्रदं॥ दानेनानेन सौभाग्यबलप्रसादास्तु मे सदा॥ तैलदानं॥
तैलं पुष्टिकरं नृणां लक्ष्मीदं मंगलशुभं॥ दानेनास्यास्तु मे शांतिस
र्वानिष्टप्रशांतये॥ ५९॥ ॥ पंचगजादिदानं॥ ऐरावतश्चतुर्दंतो ग
जानां नायकश्च यः॥ दिग्दंतिनां पूज्यतमो पापं हरय यतः प्रभुः॥ सुप्र

तीकं गजेंद्रं च सुरम्य स्वामि षेचकं ॥ इंद्रस्य वाहनं श्रेष्ठं सर्वदेवैश्च पूजितं ॥
गजेंद्र मत्तमातंग दैत्य सैन्य विनाशक ॥ तव दानेन मे शांति सर्वदा
स्तु सुखं मम ॥ अश्वदानं ॥ अश्वो हि वाहनं नानो कारणं हि धातकृ
तो ॥ संप्रदानेन मे चास्य शांतिरस्तु सुखं शिवं ॥ वृषभदानं ॥ वृषभो
धर्म एव स्यान्महादेवप्रियः सदा ॥ संप्रदानेन वै चास्य शांतिरस्तु स
दा मम ॥ अजादानं ॥ अजो ग्निवाहो यज्ञार्थं ब्रह्मणा निर्मिता पुरा ॥
मेषदानेन वै शांति सुखं चास्तु सदा मम ॥ छागदानं ॥ छागः
प्रियो हि यज्ञानां माकुती वेव्यवस्थिताः ॥ अस्य चैव प्रदानेन शांतिरस्तु
सदा मम ॥ अथ शिवप्रतिमादानं ॥ मृत्युंजय महारुद्र गौरीश वृष
वाहन ॥ संप्रदानेन गौरीश मम संतु मनोरथाः ॥ ६८ ॥ शिवनाभिदा
नं ॥ शिव रुद्रो पियः साक्षात्साक्षान्नारायणोपि च ॥ दानेनास्या हरि

हरौ प्रसन्नौ स्तां सदा वयोः ॥ शालिग्रामदानं ॥ शालग्रामशिलापुण्या भुक्ति
मुक्तिप्रदायिनी ॥ शालिग्रामप्रदानेन मम संतु मनोरथाः ॥ चक्रांकि
तदानं ॥ चक्रांकितसमायुक्ता शालग्रामशिलासह ॥ दानेनैव न वेत्तस्मै
उभयोर्वांछितं फलं ॥ शंखदानं ॥ शंखश्चलकरो नित्यं सर्वमंगलदायकः ॥
तस्मादस्य प्रदानेन मम संतु मनोरथाः ॥ घंटादानं ॥ घंटा देवप्रिया नित्यं
महानंदकराशुभा ॥ संप्रदानेन वै तस्य मम संतु मनोरथाः ॥ मूर्त्ति
दानं ॥ नारायण जगंनाथ श्रीपते गरुडध्वज ॥ नवमूर्त्तिप्रदानेन प्रस
न्नो भव सर्वदा ॥ गणेशदानं ॥ गणनाथ विघ्नहर गौरीसूनुरभिष्टदं ॥
अस्य दानेन मे शांतिः प्रसन्नो स्मि विनायकः ॥ सूर्यदानं ॥ ग्रहाणामा
धिपः सूर्यः पद्महस्तः प्रभाकरः ॥ दानेनास्य रवे शांति मम संतु मनोर
थाः ॥ ७६ ॥ जगदंबादानं ॥ आदिमाया महाशक्ति विश्वमाया जगन्मयी ॥

दानेनास्याः प्रसन्नो स्तु सर्वदा मम शांभवा ॥ पुस्तके देवी सरस्वती जगन्मा
ता शास्त्र ब्रह्मादि देवताः ॥ पुस्तकस्य प्रदानेन रक्षमां परमेश्वरी ॥ सोपस्क
र समायुक्तो त्रियामूर्त्तिसदक्षिणा ॥ गृहाण त्वं द्विजश्रेष्ठ मम संतु मनोर
थाः ॥ देशकाल उपायेन द्रव्यं श्रद्धा समन्विताः ॥ पात्रे प्रदीयते यत्तु सकलं
धर्मलक्षणं ॥ न विद्यया केवलया तपसा केवलेन हि ॥ विद्यातपोभ्यां व
तं यत्तु द्विपात्रं प्रचक्षते ॥ पात्रे दत्तं तु यत्किंचिच्छुचिर्भूत्वा समाहितः ॥ शे
यं तत्सर्वमक्षय्यं महादानादिकं च यत् ॥ ८८ ॥ दानं नैमित्तिकं दद्यात्सु सं
कल्पयथाविधिः ॥ नित्यदाने तु नैव स्यात्संकल्पादिक दाचन ॥ ददाति
प्रतिगृह्णाति हिरण्यादिकमेव च ॥ तुष्टो गोगान्यथाकामान् सोश्नु
ते परमव्ययं ॥ ॥ अथ गोदानविधिः ॥ दानमेतत्समाचष्टे पावनं प
रमं महत् ॥ समानं सर्ववर्णानां गवां दानमनुत्तमं ॥ चतुर्वर्गफला

वासंश्च लक्षणं नृपसत्तम ॥ स्नानं सरसि वा नद्यां पंचगव्येन संयमी ॥ वे
नैव स्नापयित्वेशं पूजयेद्विधिसत्तम ॥ सयवाश्च तिलाकुत्वा पंचग
व्यघृतान्वितान् ॥ समिद्धो ग्नौ व्याहृतिभिर्मूलमंत्रेण वाथवा ॥ अष्टोत्त
रशतं कृत्वा सवत्सां गां प्रदापयेत् ॥ ८९ ॥ ॥ सोपस्करां सवत्सां च
घंटाभरणभूषितां ॥ गंधैर्हरिद्रापिष्टैश्च मुखं पुच्छं प्रपूजयेत् ॥
अग्रपादादिचांगानि संप्रक्षाल्य शुभोदकैः ॥ आ गाव इति मंत्रेण
गायत्र्या वा प्रपूजयेत् ॥ पादौ गोरग्र पादाभ्यां शृंगाभ्यां मास्यमेव हि ॥
स्कंधाभ्यां पृष्ठपुच्छाभ्यां सर्वांगे ~~[illegible]~~ भ्यो नम इति ॥ स्थानेष्वेते
षु गंधांश्च दद्यान्मंत्रमनुक्रमात् ॥ अक्षतान् तत्पुष्पाणि प्रक्षिपेत्तु
ष्टमानसः ॥ सर्वगंधसमायुक्तं मिंडादिसुरवंदिते ॥ सवत्से गौर्गृ
हाणेमं धूपमंगलदीपकं ॥ आनंदकृत्सर्वलोके देवानां च सदा प्रिये ॥

गो स्वाच जगन्मातः दीपोयं प्रतिगृह्यतां ॥ एषा छादनं गवे दद्यात्सम्य
क्छुद्धं सुनिर्मलं ॥ सुरभिर्वस्त्रदानेन प्रीयतां परमेश्वरी ॥ सुरभि
स्त्वं जगन्मातर्देवि विष्णुपदे स्थिते ॥ सर्वदेवमये ग्रासमिदं दत्तं
मया तव ॥ ९६ ॥ दंते मुक्तिकं दद्यात्ललाटे ताम्रलोप्य ते ॥ उरसि
मधुरक्षीरं मपाने च घृतं मधु ॥ हृदये चंदनं दद्याछृंगयो विद्रुम
डकं ॥ सुवर्णशृंगयो रौप्यं खुरे पुच्छे च दक्षिणां ॥ वस्त्रं छत्रं प्रद
तव्या दोहनं कांस्यपात्रकं ॥ ब्राह्मणं पूजयित्वा तु च वस्त्रालंकारभू
षणैः ॥ गावः सुरभयो नित्यं गावो गुग्गुलगंधकाः ॥ गावः प्रतिष्ठा
भूतानां गावः स्वस्त्ययनं महत् ॥ २३०० ॥ अन्नमेव परं गावो देवा
नां हविरुत्तमं ॥ पावनं सर्वलोकानां रक्षंति च वहंति च ॥ हविषा
मंत्रपूतेन तर्पयानमरादिकान् ॥ ऋषीणामपि होतॄणां गावो होमे

प्रतिष्ठिताः ॥ सर्वेषामपि भूतानां गावः शरणमुत्तमं ॥ नमो गोभ्यः श्रीपतिभ्यः सौ
रभेयीभ्य एव च ॥ २ ॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ गवामंगे
षु तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्तस्माछिवं मे स्यादिह लोके परत्र च ॥
गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे हृदयः संतु गवां मध्ये
वसाम्यहं ॥ प्राङ्मुखीं गामिमां स्थाप्य सवत्सां तां सुपूजितां ॥ पुच्छदेशे तु
दाता वै स्नातो बद्धशिखो भवेत् ॥ ६ ॥ उदङ्मुखस्तु विप्रस्य पात्रं च वणल
क्षितं ॥ आज्यपात्रं करे कृत्वा कनकेन समन्वितं ॥ निक्षिप्य पुच्छं तस्मिंस्तु
घृतं ऊर्ध्वं प्रगृह्य च ॥ सलिलं विप्रपाणौ तु प्रागग्रं तु निधापयेत् ॥ ज
लं कुशांश्च सलिलं गृहीत्वा दानमाचरेत् ॥ अनेनैव तु मंत्रेण पात्रहस्ते
जलं क्षिपेत् ॥ यज्ञसाधारभूता या शश्वद्दाघप्रनाशिनि ॥ विश्वरूपप
देवीप्रियतामनयो गवा ॥ अनु व्रजेत्तु तां धेनुं ब्राह्मणेन समन्वितं ॥

गोमतीं तां ततो दद्यात्कृपेतत्प्रयतः शुचिः ॥ जलशायी जगत्पिता पद्मनाभः सनातनः ॥
अनंतगो गरुडायन प्रीयतां परमेश्वरः ॥ इति संप्रार्थ्य तां दद्याद्ब्राह्मणे वेदपारगे ॥
पूर्वपापविनिर्मुक्तः सोश्नुते पदमव्ययं ॥ ददाति यः सवत्सां गां सर्वान्कामान
मश्नुते ॥ इह लोके तु संप्राप्य विष्णुसायुज्यमाप्नुयात् ॥ १६ ॥ इति गोदान
विधिः ॥ ॥ अथोभयतोमुखी विधिः स्कन्दपूर्व वदेव ॥ सालंकृतां स
प्रसवां गायत्रीं यः प्रयच्छति ॥ विप्राय वेदविदुषे विष्णुलोकं स गच्छति ॥ हे
मशृंगीं रौप्यखुरीं सुशीलां वस्त्रसंयुतां ॥ सकांस्यपात्रं दातव्या क्षीरिणी गोः
सदक्षिणां ॥ यावद्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते ॥ तावद्गौः पृथिवी
ज्ञेया यावद्गर्भं विमुंचति ॥ संपूज्य तां च प्रसवां यः करोति प्रदक्षिणं ॥ सा
र्णवां सकलां पृथ्वीं प्रदक्षिणसकृद्भवेत् ॥ सुपूजितामिमां गावो ददाम्युभय
तोमुखीं ॥ सागरांतमहीदानं फलं प्राप्य लभे सुखं ॥ सालंकृतां गृहाण

मां ददाम्युभयतोमुखीं ॥ विष्णुरूप द्विजश्रेष्ठ त्राहि मां भवसागरात् ॥ २३ ॥
अथ महिषीदानं ॥ कार्पासबीजपिण्याकहरिद्रा गौरमृत्तिका ॥ सिंदूरं तैल
माज्यं च रक्तुलां गुग्गुलं ततः ॥ नीलवस्त्रं लवणं माषाः रक्तपुष्पं सचंदनं ॥
घंटा कांस्यमयं पात्रं ताम्रपात्रं तथैव च ॥ वस्त्रोपवीताभरणं माम चैव सद
क्षिणा ॥ आदौ संपाद्य चैतानि महिषीदानमाचरेत् ॥ पुण्यकाले पवादे
शे देहे व्याधिसमुद्भवे ॥ कर्तव्यं महिषीदानमपमृत्युविनाशनं ॥ गणे
शं च यमं मृत्युं संपूज्य होमयेद्दृघ ॥ व्याहृतिश्च तिलाज्येन शतमष्टोत्तरं
हुतं ॥ यमं चैव तथा मृत्युं तत्तन्मंत्रेण होमयेत् ॥ यमं संतर्प्य महिषीमक्षिः
प्रक्षालयेद्दृघ ॥ उयप्रेहि मनेनैव मंत्रेणाथ प्रपूजयेत् ॥ सर्वांगान्धूपू
जनं चैव पादादिषु यथाक्रमं ॥ यमप्रिये महाघोरे महिषी व्याधिनाशि
नी ॥ त्वं मृत्युभयं नीतं मरणान्मां समुद्धर ॥ गोरचनं ललाटे तु शृंग

वा गौरिमृत्तिका ॥ कंठे सिंदूरमुद्रे हरिद्रालेपनं भवेत् ॥ कृष्णवस्त्रंकंठ
देशे छत्रं चैव प्रसारयेत् ॥ शृंगे हेमखुरे रौप्यं गंधपुष्पैः समर्चयेत् ॥ त्रिः
प्रदक्षिणमावृत्य महिषीं दक्षिणामुखीं ॥ ब्राह्मणं पूजयेत्पश्चाद्वस्त्रालं
कारभूषणैः ॥ तां दद्यात्प्राङ्मुखः कर्ता स्थिता योदङ्मुखाय च ॥ कार्पास
बीजपिण्याकतृणोदकसमन्वितं ॥ ३६ ॥ विप्रेंद्र वेदवेदांगकरुणाकरता
रक ॥ गृहाण महिषीं लक्ष्मीं सवत्सां स्वर्णभूषितां ॥ सुनेत्रां च सुशृंगां च
रूपां मांसपूर्णविग्रहं ॥ पयस्विनीं सुशीलां तां हरिद्र तिमिरापहां ॥ हेमशृं
गां रौप्यखुरीं कांस्यपात्रां समन्वितां ॥ सर्वसंभारवत्तां तसारं कांस
दक्षिणं ॥ महिषीवस्त्रसंयुक्ता सुशीला च पयस्विनी ॥ नीलवस्त्रावृतां
चाहं दास्ये मृत्युहराय च ॥ यमवाहा तु महिषी मृत्युरूपेण संस्थिता ॥
सर्वव्याधिहरो नित्यमेतं ॥ सरत्नां सजलं पुष्पं दत्वा विप्रकरेर्पयेत् ॥

कांस्यपात्रस्थिते पाणौ दद्याद्दानं सदक्षिणं ॥ ४७ ॥ मृत्युरूप गृहाणेमां महि
षीं द्विजसत्तम ॥ मृत्योः संत्राहि मां घोरा गच्छ स्वयत्र वापि च ॥ ततो बहि
र्द्विजो गच्छेन्निरस्य दक्षिणं पथि ॥ तेनैव पितृंश्च तर्पयेद्यमं ॥ आज्य
निरीक्षणं कुर्याद्दशदानानि वै यतः ॥ अन्नेभ्यश्चैव विप्रेभ्यो दद्याच्छ
क्त्या च दक्षिणां ॥ अनेन विधिना चैव महिषीदानमुत्तमं ॥ यः करोति
नरस्तस्य नास्य मृत्युर्भवेत्क्वचित् ॥ इति महिषीदानं ॥ अथ ऋतुपर
वे दानमाह ॥ सम्यग्दद्याद्वसंते तु जलं स्वादु सुशीतलं ॥ गंधपुष्पादिकं
चैव ब्राह्मणेभ्यो विशेषतः ॥ ग्रीष्मे चोपानहौ छत्रं मन्नपानादिकं च हि ॥ द
द्याद्वर्षनवं वेश्म सर्वोपस्करसंयुतं ॥ ४९ ॥ दद्याच्छरदि वासांसि नवा
नि विविधानि च ॥ हेमंते पितृणां चैव प्रदद्याद्दिंधनादिकं ॥ चित्रान्नं
शैशिरे दद्यात्सर्पिर्दधिसमन्वितं ॥ ऋतुष्वेवं च सर्वेषु केचिदिच्छंति

सर्वदा ॥ न शक्नोति समर्थश्चेन्नयदि ॥ पुण्यकालेथवा दद्याच्छित्तं वित्तादि
कं यदा ॥ पुण्यकालः स विज्ञेयश्चित्तं वित्तं यदा भवेत् ॥ अनित्यं च शरी
रस्मात्तस्माद्दानं समाचरेत् ॥ दाता भुंक्ते हि भोगांश्च सर्वान् कामान् यथे
प्सितान् ॥ पुत्रपौत्रैः परिवृतस्ततो मोक्षमवाप्नुयात् ॥ २३५ ॥ इति नारा
यणभट्टविरचितायां धर्मप्रवृत्तौ दानप्रकरणं ॥ अथ द्रव्यशुद्धिः ॥
तत्रादौ भूमिशुद्धिरभिधीयते ॥ याज्ञवल्क्यः ॥ भूशुद्धिर्मार्जनाद्दा
हात्कालाद्गोक्रमणात्तथा ॥ सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपने
त् ॥ ५३ ॥ चांडालधूषिते यत्र यत्र शूद्रादिसंगसिः ॥ एवं कल्मषभू
यिष्ठा भूरमेध्या प्रकीर्तिता ॥ श्वसूकरखरोष्ट्राद्यैः संस्पृष्टा दुष्ट
तां व्रजेत् ॥ अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ॥ यत्र वा
सादमेध्या सा भूस्तु वैप्र सर्वोपि च ॥ पंचधा वा चतुर्धा वा पूर्ववद्

द्धि शुध्यति ॥ इति भूमिशुद्धिः ॥ अथ गृहशुद्धिः ॥ गृहशुद्धिं प्रवक्ष्यामि
हतस्य शावदूषणे ॥ प्रोत्सृज्य मृन्मयं भांडं सिद्धमन्नं तथैव च ॥ गृहा
दपास्य तत्सर्वं गोमयेनोपलेपयेत् ॥ अग्निः संप्रोक्ष्य चैवाथ छागेना
घ्रापयेद्बुधः ॥ ब्राह्मणैर्मंत्रपूतैश्च हिरण्यकुशवारिणा ॥ सर्वमभ्यु
क्षयेद्वेश्म ततः शुद्ध्येन्न संशयः ॥ इति गृहशुद्धिः ॥ अथ पात्रशुद्धिः ॥
निर्लेपं कांचनं भांडमद्भिरेव विशुध्यति ॥ अब्जमश्ममयं चैव
राजतं चानुपस्कृतं ॥ ६ ॥ चमसस्रुक्स्रुचः स्नेहपात्राण्युष्णेन वारिणा ॥
सलेपानामलेपानां वारिणा शुद्धिरिष्यते ॥ भैवाच्छातानि ॥ ॥ ॥
यज्ञसाधनभूतानां पात्राणां चैव सर्वदा ॥ सस्यादीनां च सर्वेषां
वारिणा शुद्धिरिष्यते ॥ गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि
च ॥ शुद्ध्यंति दशभिः क्षारैः श्वकाकोपहतानि च ॥ भस्मना शुध्यते

कांस्यं सुरयायन्न लिप्यते ॥ सुरास्तत्र पुरीषे स्कृशुध्यते स्युपलेखनैः ॥
ताम्राम्लानेन शुद्धेन न चेदामिषलेपितं ॥ ॰पामिवनत्रय छिप्तं पुन
र्दाहेन शुध्यति ॥ सूतिको स्त्रिष्टभांडस्य सुनामघतस्य च ॥ त्रिसप्त
प्तमार्जनाच्छुद्धिर्नेतु कांस्यस्य तापनं ॥ सूतिकाश्वानविण्मूत्ररजश्व
लहतानि च ॥ प्रक्षिप्तव्यानि तान्यग्नौ यद्यद्यावद्दहे रपि ॥ सुवर्ण
रौप्यशंखाश्म मुक्ति रत्नमयानि च ॥ कांस्याय ताम्रपात्राणि त्रपुसी
सादिकानि च ॥ निर्लेपितानि शुध्यंति केवलेन जलेन तु ॥ शूद्रो
च्छिष्टानि शोध्यंते त्रिधा क्षाराम्लवारिणा ॥ ब्रह्म[illegible]त्र विशां चै
व संस्पृष्टं संमार्जितं शुचिः ॥ चतुर्थेन तु यद्भुक्तं चतुर्भिस्तत्र मार्जितं ॥
७० ॥ ॰प्रग्नौ प्रक्षिप्य गृह्णीयाज्जले प्रक्षाल्य यत्नतः ॥ गोशृंगेण तु सं
स्पृष्टं तत्पात्रं शुचितामियात् ॥ गंडूषं पादशौचं च यः कुर्यात्कांस्यभा

जने ॥ षण्मासं स्नुविनि क्षिप्य पुनर्दग्धेन चाहरेत् ॥ लोहानां दहना
च्छुद्धिर्भस्मना गोमयेन च ॥ दहना खननाद्वापि शैलानामंभसापि वा ॥
काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि ॥ एवं भोजनपात्राणां भुक्ते
यः पूर्वसूरिभिः ॥ संहतानां तु पात्राणि यद्येकमुपहन्यते ॥ तस्यैव शो
धनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत् ॥ इति पात्रशुद्धिः ॥ ॰अथ धान्यशुद्धिः ॥
व्रीहयः कोद्रवा दध्निः शाकमूलफलानि च । तत्पात्रस्थां पहरा । दानि ८
स्नुपकरणेन वा ॥ गृहे दाहे समुत्पन्ने दग्धे च मानुषे पशु ॥ ॰प्रभो
ज्यस्य गृहे व्रीहि धान्तु द्रव्यस्य संग्रहः ॥ मन्मयेनावदातानाम धोशु
चिच तिष्ठतां ॥ रत्नमाषतीलादीनां न दोषो मनुरब्रवीत् ॥ न चैत्र
प्राणिनो यत्र केवलं गृहदीपिना ॥ तत्र द्रव्याणि सर्वाणि गृह्णीयाद्वि
चारयत् ॥ धान्यपूगतृणानां च काष्ठानां चैव सर्वदा ॥ क्लिन्नानां

मक्षिकानां मारुतेनैव शोधनं ॥ ८ ॥ अथान्नशुद्धिः ॥ पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं ॥ दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति ॥
देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च ॥ काकश्वाभिश्च संस्पृष्टमन्नं
तन्न विवर्जयेत् ॥ तन्मात्रमन्नमुद्धृत्य शेषसंस्कारमर्हति ॥ वक्ष्ये
वं विजानीयात्कृतेष्वन्नेषु वै यतः ॥ पक्वद्रोणाधिकं चान्नं काकश्वाद्युपघातितं ॥ ग्रासमुद्धृत्य तन्मात्रं यच्च लालाकृतं भवेत् ॥ हेमोदकेन वा भुक्ष्म रजतेनांबुनाथवा ॥ अग्निज्वालोपसंस्पर्शात्सुवर्णमधु
सर्पिषा ॥ द्रव्याणां प्लावनेनैव घृतानां प्रोक्षणेन च ॥ भागेन द्युपसं-
स्पृष्टमन्नं तच्छुचितामियात् ॥ ९ ॥ लवणं घृततैलानां लवणं गोरसस्य च । गुडानिक्षा स-
वयेदग्निः शाकमूलफलानि च ॥ द्रव्याणां चैव सर्वेषां शुचिरूपं सवनं भवेत् ॥
प्राहुरणं संहतानां च दारुणां तक्षणं ॥ घृतं चैव दधिक्षीरं तथैव क्षुरसो गुडः ॥ म-
वा

इगुडान्वितं तत्रं तथा मधु न दुष्यति ॥ आममांसं घृतं क्षौद्रं स्नेहश्च फ-
लसंभवः ॥ म्लेच्छभांडस्थिता दुष्या निष्क्रांताः शुचयः स्मृताः ॥ २३५ ॥
निर्यासानां गुडानां च वजवानां तथैव च । कुसुंभकुंकुमानां च ऊर्णा-
कार्पासयोस्तथा । मृत्पूर्णेनेण काष्ठानां शस्त्राणां भांडानां वायसैः ॥
स्पर्शने विहितं शौचं सोमसूर्याग्निमारुतैः ॥ उच्छिष्टेन तु संस्पृ-
ष्टाद्रव्यं हस्तकर्पं च नः ॥ पानिधायैव तद्द्रव्यमाचांतः शुचि-
तामियात् ॥ ३ ॥ अथ जलशुद्धिः ॥ पवित्रं धारसोपेता निर्मला
पृथिवीगताः ॥ पक्षिणश्चैव गोपाना आपः शुद्धिकरा हि ताः ॥ म-
निस्थं तु दकं मेध्यं वै त्रिपं पत्रको नवेत् ॥ पवादं तं चेदम-
ध्येन तद्देव बिंदुगं ॥ उद्धृता वा प्रशस्तास्युः शुद्धे पात्रे यथा ।

विधिः॥एकरात्रोषित स्नात्वा त्यजे ह्यपः समुद्धृता ॥ प होम्यानि
तडागानि नदी वापि सरांसिच ॥५॥ चांडालाद्यशुचिस्पर्शे नितीर्थैः
परिवर्जयेत् ।वापीकूपतडागेषु मानुषं शीर्यते यदि ॥उद्धरेदु
दकं सर्वं पञ्च पीड्यान्मध्य स्तथा ।प्रक्षिप्य तं च गव्यं तु ततः शुद्धिम
वाप्नुयात् ॥श्वानश्च काकचांडाले ईषि तेषु विशोधनं ॥ घटा
नां शातमुद्धृत्य पंचगव्यं क्षिपेत्ततः ॥उपानत्श्लेष्मविण्मूत्रस्त्रि
रजो मृत्कमेवच ।एभिर्विदूषितं कूपं कुंभानां षष्टिमुद्धरेत् ॥
जलाशये स्वल्पजले स्थावरे च महीतले ।कूपवत्कथिता शु
द्धिर्महत्सु चन दूषणं ॥ चांडालभांडसंस्पृष्टं पीत्वा कूपगतं ज
लं ।गोमूत्रयावकाहार त्रिरात्रेण विशुध्यति ॥२४॥ प जागा ।१७४६

वोमाहिषमश्वबालणाश्वमसृतिका ॥दशरात्रेण शुद्धिं स्याद्भूमि
ष्ठं नन वोदकं ॥ इति जलशुद्धिः ॥ अथ वस्त्रशुद्धिः ॥ अहतं च
नवं श्वेतं सदृढं नान्य धारितं ॥ पवित्रं तद्विजानीयाद्वस्त्रं स
कलकर्मसु ॥३॥ वस्त्रं मृद्दर्भेनसा शुद्धेद ––वैदमेवच ।वज्रा
दिकं च तुष्टं चेत्यजेत्तन्मात्रमेवच ॥ यदि मूत्रपुरीषाभ्यां रे
तसा रुधिरेण वा ॥ तैलं समुपपद्यते तच्छुद्धिः प्रक्षालये
त्ततः ॥ अथ पट्टिस्तत्रोद्वणं कौचं वकुनां धान्यवासे सा ।प्रक्षा
लनेन नव्यानां मद्भिः शौचं विधीयते ॥ उर्णकौशेयकुतुपप
ट्ट होम दुकूलजाः ॥ पलशुद्धानवत्पते शोषणं प्रोक्षणादि
भिः ॥ तान्येवामेध्ययुक्तानि क्षालयेत्क्षाघनैः स्वकैः ॥ ॥

तूलिकाद्युपधानं च पुष्पं रक्ताम्बरं तथा ॥ शोधयित्वातपे किंचित्क
रैः संमार्जयेन्मुहुः ॥ पश्चात्तु वारिणा प्रोक्ष्य विनियुंजीत कर्म
णि ॥ ९ ॥ चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च ॥ शाकमूल
फलानां तु धान्यवच्छुद्धिरुच्यते ॥ १० ॥ पाविकं पट्टकूलं च पवि
त्रं चैव सर्वदा ॥ अमेध्यलेपनं चेत्स्यात्तावत्प्रक्षालनं स्मृतं ॥
जलेन मृत्सहरिद्राभिर्लेपनं कथ्यते बुधैः ॥ तैलं गोमयगो
मूत्रैश्चर्मणां शुद्धिरिष्यते ॥ पत्रपुष्पकुशादीनि धृत्वा वासो
पि शुद्ध्यते ॥ एषामावसनेन स्याच्छुद्धिरेवं विदुर्बुधाः ॥ रथ्या
कर्दमतोयानि नावः पथितृणानि च ॥ मारुतेनैव शु[illegible]ंति प ध्यंर
क्वेष्टकचितानि च ॥ इति वस्त्रशुद्धिः ॥ अथ देहशुद्धिः ॥ ॥ १४७

अद्भिर्गात्राणि शुध्यंति मनः सत्येन शुध्यति ॥ विद्यातपोभ्यां भूता
त्मा बुद्धिर्ज्ञानेन शुध्यति ॥ अजाश्वमुखतो मेध्या गावो मेध्याश्च
पृष्ठतः ॥ योषितः सर्वतः शुद्धाः कारुहस्तः सदा शुचिः ॥ एवं संक्षेप
तः प्रोक्ता सर्वेषां शुद्धिरप्यथ ॥ विज्ञेया शुद्धिरन्येषां विशेषाः स्मृति
तोन्यतः ॥ इति देहशुद्धिः ॥ अथ प्रायश्चित्तं विमुच्यते ॥ कृता
नां चैव पापानां ज्ञानतोज्ञानतोपि वा ॥ उच्यते पापिनां शुध्यै प्रा
यश्चित्तं विनिर्णयः ॥ वेदवेदांगतत्त्वज्ञो धर्मशास्त्रविशारदः ॥
स्वधर्मनिरतो दांतस्तेभ्यः पापं निवेदयेत् ॥ एको वा वेदव
द्धर्मं यं व्याचष्टे समाहितः ॥ स विज्ञेयः परो धर्मो नाज्ञानां नियु

तेन तु ॥ विज्ञाय नखरोमाणि प्राप्य स्नानमाचरेत् ॥ केशानां
रक्षणार्थाय द्विगुणं व्रतमाचरेत् ॥ राजा वा राजपुत्रो वा ब्राह्म
णो वा बहुश्रुतः ॥ सर्वान् केशान् समुद्धृत्य छेदयेदंगुलद्वयं ॥
सर्वत्रैव हि नारीणां शिरसो मुंडनं स्मृतं ॥ न स्म गोमय[illegible] वा
रि पंचगव्यादिकल्पतैः ॥ २३ ॥ मलापकर्षणं कार्यं बाह्यशौचप्रसि
द्धये ॥ सम्यक् स्नात्वा शुचिर्भूत्वा सार्द्रवासाः समाहितः ॥ प्रदक्षिणात्र
यं कृत्वा पापानि तु निवेदयेत् ॥ सन्नानेव प्रचेष्टव्या वक्तव्यं वास
मंजसं ॥ एवं कृत्वापि नरो नैति किल्बिषं ॥ यो शास्त्राधर्म २३
शास्त्राणि प्रायश्चित्तं प्रयच्छति ॥ २६ ॥ प्रायश्चित्तं भवेत्पूतो व कारकि
ल्बिषी व्रजेत् ॥ अपनार्चितमनाहूतमप्रष्टुं च यथाविधि ॥ प्रायश्चित्तं न १९८

दातव्यं ज्ञानवह्निरपि द्विजैः ॥ प्रायश्चित्तमकुर्वाणाः पापेषु निरताः नराः ॥ अ
पश्चात्तापिनः कष्टान् नरकान् यांति दारुणान् ॥ तामिस्रं लोहशंकुं च महा
निरयशाल्मलिं ॥ रौरवं कुतवं कतिम्न त्तिकां कालसूत्रकं ॥ सापातं
लोहितोदं सविषं संप्रतापनं ॥ महानरककाकोलं संजीवनमहापथं ॥ अ २४
विमंध ततामिस्रं कुंभीपाकं तथैव च ॥ २५ ॥ असीपत्रवनं चैव पतनं चै
कविंशति ॥ महापातकजैर्घोरैरुपपातकजैस्तथा ॥ अपनियांति ल
नाचाराः प्रायश्चित्ताः नराधमाः ॥ विहितस्यानुष्ठानान्निंदितस्य च
सेवनात् ॥ अनिग्रहीचेंद्रियाणां नरः पतनमृच्छति ॥ तस्मादनेनक
र्तव्यं प्रायश्चित्तं विशुद्धये ॥ एवमस्यांतरात्मा च लोकश्चैव प्रसीद
ति ॥ प्रायश्चित्तैरपैतेनयद ज्ञानकृतं भवेत् ॥ कामतो व्यवहा
र्यस्तु वचनादिह जायते ॥ ब्रह्महा मद्यपस्तेयी तथैव गुरुतल्प

१४८

गः ॥ एते महापातकिनो यश्च तैः सह संवसेत् ॥ ३६ ॥ हंता मंत्रोपदे
ष्टा च तथा संप्रतिपादकः ॥ प्रोत्साहकः सहायश्च तथा मार्गा
नुदर्शकः ॥ आश्रयः शस्त्रदाता च भक्तदाता विवेचक ॥ युद्धोपदे
शकश्चैव तद्विनाशप्रदर्शकः ॥ आश्रयपुरस्कृता ॥ अपनिषण्णे दो
ह्णाहामो यस्तु सर्वे ब्रह्मणः पस्मृतः ॥ अकार्यकारिणस्तेषां प्रायश्चित्तं
प्रकल्पयेत् ॥ अपकृष्टस्ताडितो वापि धनैर्वा विप्रयोजितः ॥ यमुद्दि
श्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकः ॥ ४० ॥ असंबंधेन यः कश्चिद्द्वि
जः प्राणान्समुत्सृजेत् ॥ तस्यैव तद्भवेत्पापं न तु यं परिकीर्त्तयि
त् ॥ गुरूणामध्यधिक्षेपो वेदनिंदासुहृद्वधः ॥ ब्रह्महत्यासमं
ज्ञेयमधीतस्य च नाशनं ॥ यज्ञे विवाहकार्ये च तथान्यस्मिन्न धर्म
कर्मणि ॥ विघ्नं समाचरेद्यस्तु तमाहुर्ब्रह्मघातकं ॥ निषिद्धभक्ष १४८

णं जिह्मं स्वोत्कर्षेषु च वचोनृतं ॥ रजस्वलामुखास्वादः सुरापानसमं भवे
त् ॥ अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ॥ निक्षेपस्य च सर्वं हि सु
वर्णस्तेयसंमितं ॥ सखीभार्याकुमारीषु स्वयोनिष्वंत्यजासु च ॥ ४१ ॥
स्वगोत्रसु सुतस्त्रीषु गमनं गुरुतल्पवत् ॥ पितुःस्वसारं मातुला
नीं स्नुषां मातुलानीं स्नुषां मातृष्वसामपि ॥ मातुः सपत्नीं भगिनीमा
चार्यतनयां तथा ॥ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ॥
छित्वा लिंगं वधस्तस्य सकामायास्त्रियस्तथा ॥ अथोपपातकानि ॥
गोवधो व्रात्यतास्तेयमृणानां चानपक्रिया ॥ अनाहिताग्नितापण्य
विक्रयः परिवेदनं ॥ भृताद्ध्ययनादानं भृतकाध्यापनं त
था ॥ पारदार्यं पारिवेत्त्यं वार्धुक्यं लवणक्रिया ॥ ५० ॥ स्त्रीशूद्रवि

द्रक्षत्त्रवधो निंदितार्थोपजीवनं ॥ नास्तिक्यं व्रतलोपश्च सुता
नांचैव विक्रयः ॥ धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं ॥
पालार्थी क्रियारंभो मद्यपस्त्रीनिषेवणं ॥ स्वाध्यायाग्निसुत
त्यागो बांधवत्यागएव च ॥ इंधनार्थं द्रुमछेदः स्त्र्यर्थमौ
षधसेवनं ॥ हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः ॥ शू
द्रसेवं हीनसख्यं च हीनयोनिनिषेवणं ॥ तथैवानाश्रमे वा
सः परान्नपरिपुष्टता ॥ असच्छास्त्राभिगमनं माकरेष्वधि
कारता ॥ भार्याविक्रयणं चैषामेकैकमुपपातकं ॥ महापातक
तुल्यानि पापान्युक्तानि यानि तु ॥ ५६ ॥ तानि पातकसंज्ञानि त
न्न्यूनमुपपातकं ॥ ब्राह्मणस्य रुजं कृत्वा घ्रातिश्चाघ्रातिम १५०

द्ययोः ॥ जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतं ॥ खरोष्ट्राणां मृगें
द्रानामजाविकवधस्तथा ॥ संकरीकरणं ज्ञेयं मीनाहिमहिषस्य वध
स्तथा ॥ निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं ॥ अपात्रीकर
णं ज्ञेयमसत्यस्य च भाषणं ॥ क्रिमिकीटवयोर्हत्या मेध्यगंधसे
वनं ॥ मलिनीकरणं प्रोक्तमुक्तादन्यत्र कीर्तितं ॥ ६० ॥ अथ प्राय
श्चित्तं ॥ शिरःकपालध्वजवान् भिक्षाशी कर्म वेदयन् ॥ ब्रह्महा द्वा
दशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥ चरेद्वा ब्रह्महा सर्वं व्रतं
द्वादशवार्षिकं ॥ समाप्ते तु राज्ञे हृद्यावाजवामास्मिन् व्रते सति ।
अपज्ञाता ब्राह्मणे हत्वा सामान्यद्विजसत्तम ॥ प्रायश्चित्तमिदं
कुर्याद्विधानाद्द्वादशाब्दिकं ॥ ६३ ॥ ब्राह्मणस्य परित्राणाद्गवां

१५१

द्वादशाब्दस्य च ॥ तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ॥
दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ॥ दृष्ट्वा पथि निरा
तङ्कं दृष्ट्वा तु ब्रह्महा शुचिः ॥ प्राणीयविप्रसर्वस्वं हृतं घातित एव वा ।
तन्निमित्तं क्षतः शस्त्रैर्जीवितोपि विशुध्यति ॥ अरण्ये निय
तो जप्त्वा त्रिः कृत्वो वेदसंहितां ॥ शुध्यते वामतो टीला प्रतिस्रो
तः सरस्वती । संग्रामे वा हतो लक्ष्यीभूतः शुद्धिमाप्नुयात् ॥ मृ
तकल्पप्रहारार्त्तो जीवन्नपि विशुध्यति ॥ जातिमात्रं यदा हन्या
द्दृष्ट्वा ब्राह्मणे रहः ॥ प्रायश्चित्तं तदा कुर्यादिदं पापविशु
द्धये ॥ प्राणांतिकं च यत्प्रोक्तं प्रायश्चित्तं मनीषिणः ॥ तत्कामिका
मिविषयं विज्ञेयं नात्र संशयः ॥ कामतो वा यदा हन्यात् ब्राह्म १५१

णं ब्राह्मणास्तदा । चरेत् व्रतं घोरं यावत्पापपरीक्षयः ॥ ७१ ॥ मतिपूर्वं य
दा हन्यात् ब्राह्मणं जातिमात्रकं ॥ गोसहस्रं तदा दद्याद्यस्य म
णे ताडयन् । विधेः प्रथमिका ह्येषा द्वितीये द्विगुणं चरेत् ॥ तृती
ये द्विगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ॥ ७२ ॥ मातरं पितरं हत्वा सो
दर्यं भ्रातरं तथा ॥ गुरुं हत्वा श्रोत्रियं वा चाहिताग्निमथापि वा ॥ प
शानतो यदा हन्याद्द्विगुणं व्रतमाचरेत् ॥ तदात्मानं दहेदग्नौ
निहन्यादपि कामतः ॥ एतदुक्तं ब्राह्मणस्य द्विगुणं क्षत्रियस्य तु त्रि वैश्यस्य
गुणं प्रोक्तं शूद्रादीनां चतुर्गुणं । यागस्थं क्षत्रियं हन्यात्तच्चरेद्ब्रा
ह्मणे व्रतं । तत्र हा च यथा वर्णे तथात्रेपी निषूदकः ॥ चरेद्व्रतमहत्वापि घाता
र्थं समुपागतः ॥ द्विगुणं सर्ववर्णे तु ब्राह्मणे व्रतमादिशेत् ॥ पाशीतिर्य

१५२ स्ववर्षाणि बालो वान्यून षोडशः ॥ प्रायश्चित्तं न चार्हति स्त्रियो न्याधितए
व वा । महापातकसंयुक्तो दैवात्स्यादग्निमानपि । पुत्राद्यैः पालयेदग्नि
युक्तः पादेशासंश्रयात् । ८ । इति ब्रह्मप्रा॰ ॥ अथ सुरापानप्रा॰ ॥ गौडी
पैष्टी च माध्वी च धाँ विज्ञेया त्रिविधा सुरा ॥ यथैवैका तथा
सर्वा न पातव्या द्विजोत्तमैः ॥ सुरा वै मलमन्नाणां पाप्मा च मल उच्य
ते ॥ तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥ मधुकं चैक्षवं दा
वं क्षीरं तालं खार्जूर पानसं ॥ न पातव्यं द्विजैर्मद्यमेतेयं नालिकेरज
जं ॥ सुरांबु घृत गोमूत्र पयसानग्निसन्निभं ॥ सुरापोन्यतमं पीत्वा
मरणाच्छुद्धिमाप्नुयात् ॥ बालवध्या शजवध्या ब्रह्महत्याव्रतं च
रेत् । पिण्याकं वा कणान्वापि नद्यये तु सदा निशि ॥ प्रज्ञात्वोना
तु सुरापीत्वा रेतो विण्मूत्रमेव च । पुनः संस्कारमर्हति त्रयो व १५२
र्णा द्विजातयः । ८६ । पतिलोकं न सा याति ब्राह्मणी वा सुरां पि

बेत् ॥ इहैव सा शुनी गृध्री सूकरी चैव जायते । पतत्यर्धं शरीरस्य य
स्य भार्या सुरां पिबेत् ॥ अपः सुराभाण्डसंस्था अमद्यभाण्डस्थितास्त
था । प्राजापत्यं चरेत्पीत्वा षड्रात्रोपवसेद्द्विजः । ८८ । इति सुरापान
प्रा॰ ॥ अथ सुवर्णप्रा॰ ॥ ब्राह्मणः स्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोपि वा शुचिः ॥ ९० ॥ अनिवेद्य नृ
पे शुद्ध्ये सुरापव्रतमाचरेत् । आत्मतुल्यं सुवर्णं च दद्याद्विप्रस्य तु
ष्टिकृत् ॥ स्वर्णं तु षोडशमाषा परिमितः ॥ अपकृत्य सुवर्णस्य मा
षमात्रं द्विजाधमः ॥ गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुध्यति ॥
सोयब्रह्मस्वन्यूनं तु सुवर्णहरणे कृते ॥ पश्चात्तापेन शातव्यं तस्मा
देकादशाद्दिकं । रौप्यं हृत्वा द्विजो मोहाच्चरेच्चांद्रायणव्रतं । गण
ने दशकादूर्ध्वं द्विगुणं त्रिगुणं चरेत् ॥ इति सुवर्णस्तेयप्रा॰ ॥

॥अथसंसर्गप्रायश्चित्तं॥ स्मृतिर्ज्वलनमृत्कृनाचविशुध्यति॥ स्वयंवाशी
श्ववृषणानुकृत्वाचयजाजंत्रौ॥ नैरुतिदिशमातिष्टेदानिपाशादि
जिह्लगः॥ पितृभार्यांतुविज्ञायसवर्णायोधिगछति॥ जननीसाम्य
विज्ञायमृतःशुद्धिमवाप्नुयात्॥ गुरोश्चैत्रसभार्यंतुपुनर्गत्वाचका
मतः॥ पंडमात्रंसमुत्कृत्यशुद्धोजिवन्मृतोपिवा॥ गुरोर्भार्यांतुयोवै
रूपांपुनर्गत्वानुकामतः॥ लिंगाग्रछेदइत्वातुसततःशुद्धोस्तकिल्बिषा
त्॥ पुनःश्लृङ्गीगुरोर्गत्वायदिविप्रोविमोहितः॥ ब्रह्मचारिसदुष्टात्मा
द्वादशाब्दव्रतंचरेत्॥ एतद्दोषविशुध्यस्तुपतितेषुउदाहृतं॥ स्त्री
णामपिप्रसक्तानांमेषएवविधिस्मृतः॥ अथमहापातकं॥ योगे
नपतितेनैवसंसर्गंयातिमानवः॥ सतस्यैवव्रतंकुर्यात्तत्संस
र्गविशुध्यये॥ एनस्विभिरसत्संसंविशेषोवेवसरंसोपितत्समः॥ कन्यां

समुद्वहेवेषांसोपिवासोनकिंचनः॥ संलापस्पर्शनयनसहपानीसनाशना
त्॥ याजनाध्यापनाद्यानासत्पापंक्रमतेनृणां॥ याजनंयोनिसंबंधे
स्वाध्यायंसहभोजनं॥ कृत्वासद्यःपतत्येवपतितेननसंशयः॥
संसर्गेमाचरन्विप्रःपतितादिष्वकामतः॥ पंचाहंवाद्वादशाहंवाद्वादशा
हमथापिवा॥ मासार्द्धमासमेकंवामासत्रयमथापिवा॥ षण्मासमर्ध
मेकंवाभवेदूर्ध्वंतुतत्समः॥ पंचाहंतुचरेत्कृच्छ्रंदशाहंदशाहंतप्त
कृच्छ्रकं॥ परार्धंस्वर्धमासंस्यान्मासंचांद्रायणंचरेत्॥ मासत्रयंतुकु
र्वीतकृच्छ्रचांद्रायणंनरः॥ षण्मासिकेतुसंसर्गेषडब्दंव्रतमाचरेत्॥
॥अथोपपातकं॥ वाच्यंप्रकीर्तितयत्पापंमज्ञात्वाचोपपादितं॥ षडब्दंने
वशुध्यंतेमहतःपातकाद्दते॥ उपपातमन्यस्तंमहापातकतांव्रजेत्॥ द्वाद
शव्रतेनैवतस्यशुद्धिस्तनान्यथा॥ कृतापवसनोगोष्टेचर्मणातेनसं
वृतः॥ चतुर्दहंसमश्नीयादन्वहंलवणंमितं॥ २५१०॥ गोमूत्रेषोचरन्

स्नानं द्वौ मासौ नियतेंद्रियः॥ दिवानुगच्छता गास्तातिष्ठन्नूर्ध्वं रजः पिबेत्॥
तिष्ठंतीष्वनुतिष्ठेत व्रजंतीष्वप्यनुव्रजेत्। आसीनोप्यनु आसीनः निय
तो वीतमत्सरः॥ अनुरामविकित्सां वा चौरव्याघ्रादिभिर्भयात्। पति
तां पंकमग्नां वा सर्वप्राणैर्विमोचयेत्। १२। उष्णे वर्षति शीते वा मारुते
वाति वा भृशं। न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः॥ अनेन वि
धिना यस्तु गोघ्नो गा अनुव्रजेत्। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्य
पोहति। वृषभैकादशा गाश्च दद्यात्सुचरितव्रते॥ अविमानेन सर्वं
सर्वं वेदविद्भ्यो निवेदयेत्॥ १६। गार्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सु
व्रतां॥ यज्ञादिना घातयित्वा द्विगुणं व्रतमाचरेत्। पादमेकं चरेद्रो तनेर
धे द्वौ पादौ वधनं चरेत्। योजने पादहीनं स्यात् चरेत् सर्वं निपातिते।
पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वै बलात्। निपातयंति ये गास्तासां कृ- १५४

कुर्युर्व्रतं हि ते। अपपालनात्प्रणश्येत गोश्चरंति कथंचन। जलौघवल्लयं मग्नां
कृ कुर्युर्व्रतं हि ते। अपपालनात्प्रणश्येत गोश्चरंति कथंचन। मेघविद्युद्धतापि
वा। २५२॥ श्वभ्रादौ पतिता कस्माच्छ्वापदैर्वापि नंदिता। प्राजापत्यं चरेत्कृच्छ्रं
गोस्वामिव्रतमुत्तमं। शृंगभंगे वा चर्मनिर्मोचने तथा। प्राजापत्येन शुद्धिः स्या
त्स्वस्थाने पतिगोर्भवेत्॥ हतमुत्पादितं येन कुर्यात्सरोहिणव्रतं॥ न्यत्क्रमेण व
ति चेत्तेन गोहत्यातस्य पुष्कला। २३। पतिदोहातिवाहाभ्यां नासिकाभेदने
न वा। नदीपर्वतसंरोधे कृतं पादोनमाचरेत्। अपस्यिनंगगवां कलाकढि
मे गंतथैव च। यदि जीवति वयसां प्रायश्चित्तं न विद्यते। एतदेव व्रतं कुर्यु
रुपपातकिनो द्विजः॥ अवकीर्णवीर्यश्च अप्यर्धं चांद्रायणं मया प्रिवा। २६। एत
च्चांद्रायणं कामकृते तकामकृते वतु। दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशोस्त
गाः॥ उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा। इत्युपपातकं॥ अथ सर्ववधा
न् प्रा॰॥ क्षत्रियस्य वधं कृत्वा षडब्दं व्रतमाचरेत्॥ अब्दं वैश्यवधे कृत्वा द्वा
दशब्दं वधे चरेत्॥ अंत्यजानां वधं कृत्वा ह्येकमेकं समाचरेत्॥ अप्र
दुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्॥ हस्तिनं तुरगं छागं महिषोष्ट्रक॥

पिंतथा॥मृगंचरोहिणंहत्वाचरेच्चांद्रायणद्वयं॥३॥ऽप्रजादिकंखरश्वानंस्यगालंश्व
करंतथा॥मार्जारशशकंहत्वाप्राजापत्येनशुध्यति॥कपोतबककाकानांगृध्रा
णांमूषकस्यतु।वधेह्येषांप्राणिनांचपादकृच्छ्रंसमाचरेत्॥ऽपनस्थिप्राणि
नोहत्वाप्राणायामेनशुध्यति।ऽपस्थिन्वितवधेविप्रःकिंचिद्दद्याद्विशुद्धये॥
सावित्रीपतितायस्यदशवर्षाणिपंचच॥सशिखंवपनंकृत्वाव्रतंकुर्यात्स
माहितः॥एकविंशतिरात्रंचपिबेत्प्रसृतिपातकं।भोजनेचहविष्यान्नंब्रा
ह्मणान्सप्तपंचच॥३४॥ततोनयावद्बुद्धस्यतुस्योपनयनंस्मृतं॥एतदुपनय
नस्यमुख्यकालात्पूर्वकालोज्ञेय।ऽपतऊर्ध्वंव्रात्यास्तोमः॥व्रात्यास्तोमाहृतेकृ
तेइतिवचनात्॥गजाश्वस्यापहरणेमणीनांरजतस्यच।धान्यापहरणे
चैवकुर्यात्सांवत्सरव्रतं॥धान्यान्नधनचौर्याणिकृत्वाकामाद्द्विजोत्तमः॥
सजातीयगृहेष्वेवकृच्छ्रार्धेनविशुध्यति।मनुष्याणांचहरणेरत्नानांचतथैवच।
कूपवापिजलानांचशुद्धिश्चांद्रायणेनतु॥धान्यानांहरणेकृच्छ्रंतिलानांभेद १५५

वस्मृतं॥सर्वेषांधातुजातीपराकहरणेचरेत्॥४७॥दशकघाणकाहर्धेद्विगुणंव्र
तमाचरेत्॥ऽपासरुस्ताकृत्रिगुणंमधुहिमविधिस्मृतं॥विक्रयेयद्धृतंप्रोक्तं
हरणेद्विगुणंहितत्।ऽपरणाद्दशगुणंहत्वाप्रायश्चित्तंसमाचरेत्॥यद्वायद्वा
हृ४ परद्रव्यमपहृत्याथकिल्बिषी॥तदेवद्विगुणंतस्यकृत्वाकृच्छ्रंसमाचरेत्॥
ऽपजाविपट्टकार्पासताम्रधान्यतिलादिषु॥चतुर्गुणंमूल्यंदत्वाप्राजापत्यं
समाचरेत्॥कांस्यसीसादिधातूनांद्विगुणंस्तेयमोचनं॥प्राजापत्यार्धमा
गाश्चप्रायश्चित्तविशोधनं॥गोहर्तुःसहकृच्छ्रस्यादर्धंहिस्त्यश्चसस्यके॥
हारके॥चतुर्गुणंमूल्यंदत्वाशक्तेस्येकादशोत्तमं॥४६॥नृदेपनोजापह
रणेयानशय्यासनेषुच॥पुष्पमूलफलानांचकृच्छ्रंसंतपनंचरेत्॥यस्य
यस्यतुवर्णस्यवृत्तिच्छेदंसमाचरेत्॥तस्यतस्यवधेप्रोक्तंप्रायश्चित्तंसमाचरेत्।
कालेत्वाक्षयकर्माणिसम्यक्कुर्याद्विधानतः॥तदकुर्वंत्रिरात्रेणमासिमासिवि
शुध्यति॥२५५॥ऽपनाहिताग्नोपित्रादौयदामाणःसुतोयदि॥सहिव्रात्ये

नपश्चनायजेत्तंनिः क्रयायतु।सुरालवणमद्यानांगुडादीनां घृतस्यच॥वि
क्रेतांप्राणिनांचैवकुर्यात्कृच्छ्रमहाव्रतं॥तैलमध्वादिसोमानांचरेच्चांद्राय
णव्रतं॥दध्यश्रृक्षीरसर्पिर्वगुडखंडादिविक्रये।५३।सर्वेषां हपकानांप्रा
जापत्यंसमाचरेत्॥भक्ष्याणांचैवसर्वेषां प्राजापत्यंसमाचरेत्॥उपवासंतुत
कस्यनक्तंकांजीवविक्रये॥पूगिफलंमातुलिंगंजांबखजूरमेवच।एतेषां
पादकृच्छ्रस्याद्धान्यादीनांचविक्रये।हेमशय्याद्विलोहानांकार्पासस्याचर
स्यच।विक्रयेचित्रवस्त्राणांप्राजापत्यंसमाचरेत्॥वातश्चाश्वतरीणांचग
जानामेंदवस्मृतं।गोविक्रयं द्विजःकृत्वाप्राजापत्यंसमाचरेत्।नि।
लीतुविक्रयेघस्रुक्ष्यातिदेशंव्रतंचरेत्॥चांद्रायणंप्रकुर्वीतयेकाला
देदविक्रये।सर्वेषामेवविद्यानांपादकृच्छ्रंसमाचरेत्।रत्नानांविक्रये
दकृच्छ्रंहिंगवादीनांतथैवच॥२५९॥अन्येषांचैवसर्वेषांपादकृच्छ्रंसमा
चरेत्॥कामतःपारिवेत्येतुचरेद्दष्टव्रतंद्विजः॥समाप्तेष्टतुकन्यानां १५६

ज्येष्ठायप्रतिपादयेत्।अज्ञात्वापारिवेत्येतुकृच्छ्रमेवंद्वयोःस्मृतं।अपतिकृच्छ्रं
चरेद्दातहोताचांद्रायणंचरेत्॥६३॥अथागम्यागमनेप्रा०॥रेतःसिंचेत्
कुमारीष्वयोनिष्वंत्यजादिषु।सपिंडापत्यदारेषुप्राणत्यागोविधीयते॥
व्रतस्यंविधवागत्वाचांद्रायणंचाष्टमाचरेत्॥गुरोर्हिततरंगत्वातथैव
तनयोध्रुवर॥चंडालीपुल्कसीम्लेच्छीस्नुषाचभगिनीसखि।मातापि
त्रोःस्वसारंचरहितांसरणागतां॥मातुलानांप्रव्राजितांस्वगोत्रान्न
पयोषितां॥सखीनायंगुरोर्नार्यंभ्रातुर्नार्यांतथैवच।पितृव्यप
त्नीतनयांधात्रीचैवगतस्यच॥आसांगत्वाद्विजोमोहात्षडष्टव्रतमा
चरेत्॥कामतश्चेत्सकृद्गत्वाद्वादशा[illegible]ह्व्रतंचरेत्॥द्वितीये
द्विगुणंप्रोक्तंतृतीयेत्रिगुणंस्मृतं।चतुर्थेतुकामतःकृत्वाह्यात्ममेदंनि
कृतयेत्॥अभ्यासात्कामतोगत्वानिष्कृतिर्नविधीयते।चांडा
लांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच॥पतत्यज्ञानतोविप्रोज्ञा

नात्सास्यं च गच्छति ॥ रजकश्चर्मकश्चैव नटो बुरुड एव च । कैवर्तमेद
भिल्लाश्च ह्यंत्यजाः सप्त कीर्तिताः ॥ रजस्वलां द्विजो गत्वा ह्यर्द्धकृच्छ्रं समाचरे
त् । ब्राह्मणी ब्राह्मणो गत्वा प्राजापत्यं समाचरेत् । पशुवेश्यादिगमने प्राजापत्यं
समाचरेत् । दिवा निगमने विप्रः स्नात्वा तूपवसेद्दिनं ॥ अहोरात्रं तु षष्ठ्या
दौ प्राजापत्यं तु पर्वणि ॥ शूद्रां निगमनो विप्रः प्राज्ञा ॥ गर्भपातं सकृत्कृत्वा
शूद्रहत्याव्रतं चरेत् । शूद्रीशयनमारोप्य ब्राह्मणो वात्यधोगतिं ॥ तस्यां चै
व प्रसूतस्य निष्कृतिर्न विद्यते । अभ्यासे हि गुणा वृद्धिर्मासा द्वौ विधी
यते ॥ ततो यासगुणा वृद्धिर्यावत्संवत्सरो भवेत् ॥ ततः संवत्सरं गुणं पापा
त्पापं समाचरेत् । तावत्कृच्छ्रं प्रकुर्वीत षडब्दं कामतो भवेत् ॥ ब्राह्मणी कामतो ग
च्छेत् क्षत्रियां वैश्यमेव च । गोमूत्रं पावकेर्मासात्तदर्धं च विशुध्यति । विप्रा
शूद्रस्य संपर्को न चेत्स्यात्सत्स्नूयते । प्रायश्चित्तं स्मृतं तस्याः षडब्दं व्रतमुत्त
मं ॥ द्वात्रस्त्र शूद्रसंपर्के चरेच्चांद्रायणं व्रतं । चांद्रायणं चरेत्कृच्छ्रं पंचरेद्वैश्य १५७

स्य संगमे । शूद्रं गत्वा चरेद्वै स्यात्कृच्छ्रं चांद्रायणोत्तरं । अनुलोमेन कुर्वीत कृ
च्छ्रपादं चरेदपि तं । बलाच्च यदि गच्छेद्या मैथुनं पापकर्मभिः । सकृत्कृते सां
तपनेऽप्यनु प्रस्रवणे शुचिः । कामतः शूद्रसंपर्के ह्यंत्यजे वा तथैव च ॥
प्रविष्टो संप्रदीप्ते गोमूत्रं तु नाचेद्विशुध्यति ॥ यत्पुंसः परदारेषु समाने
षु व्रतं स्मृतं ॥ व्यभिचाराच्च भर्तुः स्त्री तद्दोषं समाचरेत् ॥ कथंचिद्ब्राह्म
णीं गत्वा क्षत्रियो वैश्य एव च । चतुरब्दं षडब्दं च प्रायश्चित्तं विधीयते । शूद्र
स्तु ब्राह्मणीं गच्छेत् कथंचित् कामतो हितः । द्वादशाब्दव्रते नैव तस्य शुद्धिः स्त्रीना
न्यथा । कामतो ब्राह्मणीं गच्छेच्छूद्रो वाप्यंत्यजोपि वा ॥ प्रविष्टो संप्रदीप्ते गोमू
त्र नाचेद्विशुध्यति ॥ अथ गीनाम्नो ॥ अग्निहोत्रापविद्धाग्निर्ब्राह्मणः का
मकारतः ॥ चांद्रायणं चरेन्मासं ब्रह्महत्यासमं हि तत् ॥ पतत्यपत्यपतीता
नि निरग्नेस्तु द्विजन्मना ॥ तावत्कृच्छ्रं चरेद्धोमं विप्रः सर्वं समर्पयेत् । गो
ष्ठे वसन् ब्रह्मचारी मासमेकं पयोव्रती ॥ गायत्रीजाप्यनिरतो मुच्यते सं तप

विग्रहात् ॥ त्रिणि कृच्छ्राणि चरेद्व्रात्यो याजकोपि चरन्नपि ॥ ब्राह्मणं चेदं जीवमा
नो त्यक्त्वा च शरणागतं ॥ ८९ ॥ गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः ॥ व
ध्वा वा चासमाप्तिसंप्रसाद्योपवसेद्दिनं ॥ प्राणायाममजक्लेस्थि वा खरपानो
ष्ट्रपानगः ॥ नग्नस्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियं ॥ पतिताद्व्यमाद
तेन भुक्त्वा वा ब्राह्मणो यदि ॥ कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं विशोधनं ॥ विप्रदं
डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने ॥ कृच्छ्रातिकृच्छ्रं संघाते कृच्छ्रमांतरशोणि
ता ॥ पथि चांडालकं दृष्ट्वा कुर्यात् सूर्यावलोकनं ॥ पापिसंभाषणं चैव गाय
त्रीं तु सकृज्जपेत् ॥ द्विजश्चांडालभांडस्थं सलिलं पिबते यदि ॥ षण्मा
सं तु चरेत् कृच्छ्रमष्टमं तस्य लक्षणं ॥ अज्ञानाद्ब्राह्मणो भुंक्ते शूद्रस्यान्नम
नातुरः ॥ तस्य पापविशुद्ध्यर्थं प्राजापत्यत्रयं चरेत् ॥ ज्ञानाच्चेद्ब्राह्मणो भुंक्ते ष
ण्मासं व्रतमाचरेत् ॥ अमेध्यानां च सर्वेषां प्राजापत्यं समाचरेत् ॥ शूद्रह
स्तेन पानीयात् पानीयं वा पिबेत् क्वचित् ॥ अहोरात्रोषितो भूत्वा पंचग १५८

व्येन शुध्यति ॥ महापापोपपापानां यो भिशंसेन्मृषापरं ॥ मद्यान्नदं तस्य समा
सीसजापि नियतेंद्रियः ॥ २६ ॥ ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे ॥
कृमिरुत्पद्यते येन प्रायश्चित्तं कथं भवेत् ॥ गवां मूत्रपुरीषेण दध्ना क्षी
रेण सर्पिषा ॥ त्र्यहः स्नात्वोपवासेन स्वर्णदानेन शुध्यति ॥ स्त्रियः क्षीरं
सकृत्पीत्वा कथंचिद्यदि मोहितः ॥ पुनः संस्कृत्य चात्मानं प्राजापत्यं च
रेद्द्विजः ॥ ब्रह्मचारी यमश्नीयात् मधु मांसं कथंचन ॥ प्राजापत्यं चरेत् कृ
च्छ्रं मौंजीहोमेन शुध्यति ॥ सूर्योदये तु यः शेते तथा चास्तमिते रवौ ॥ ब्रह्म
स्तोनोवुनावेतुह्य होरात्रोषितः शुचिः ॥ मिथ्याभिशंसिनो दोषो द्विसमो भू
तवादिषु ॥ मिथ्याशंस्त च दोषं च समादत्ते मृषावदन् ॥ कोधामरु कृच्छ्रगम्य
लेनायीयांस्तू नरः क्वचित् ॥ प्राजापत्यं चरेत् कृच्छ्रं तस्य पापस्य शुद्धये ॥ विप्रस्तो
कामृषाभाषां कृत्वानुशपथं मृषा ॥ ब्राह्मणो यावकोतेन तीव्रं चांद्रायणं चरे
त् ॥ मित्रां पात्रे गृहीत्वा तु पुण्यं न अनुहारयेत् ॥ प्रतिग्रहेषु सर्वेषु षष्ठांशं
च प्रकल्पयेत् ॥ चांद्रायणेन शुध्यंतु सर्वेषां यत्प्रतिग्रहाः ॥ कृत्वा तस्य स

भुक्त्वान्नं मति कृच्छ्रं विशोधनं ॥२९१०॥ कृष्णाजिनं च शय्यां च गजमश्वं
रथं तथा । ॥ जवस्या द्विमुखी धेनुं गृहीत्वा व्यक्षमाचरेत् ॥ व्रात्यानां याज
नं कृत्वा परेषामंत्य कर्म च । अभिचारा विहीनं च त्रिभिः कृच्छ्रैर्विशुध्यति । शर
णागतं तु संत्यज्य वेद विप्लाय वै द्विजः । वत्सरं याव काहार स्तत्पापस्य विशु
द्धये ॥ कन्या दोषी च सोमस्य विक्रयी नास्तिकस्तथा ॥ मिथ्याशंसिकृतस्थश्च
गुरोः प्रत्यय कारकः ॥ मातापितृ सुतत्यागी नायत्यागि तथैव च ॥ प्रसन्ना
स्नातिगामी च ह्यज गोराम विक्रयी ॥ पायाज्य याजकश्चैव वाकितवः कूटका
रकः ॥ ते च चान्द्र विशुध्यर्थं चरे संवत्सरव्रतं ॥ ॥ छत्राक विड्वराहं च ल
शुनं ग्रामकुक्कुटं ॥ पलांडु गृंजनं चैव मोहाज्जग्धाय ... द्विजः ॥ पुनि ते८
त्येतानिषु ... गृंजग्ध्वा कृच्छ्रं सांतपनं चरेत् ॥ चांद्रायणं यती ... नां तु शेषेषु
प्रवसेदितः । संसर्ग दुष्ट यच्चान्नं क्रियादुष्टम कामतः ॥ भुक्त्वा स्वभावदुष्टं
च तप्त कृच्छ्रं समाचरेत् ॥ चांडाल पतितानां च दुष्टस्यान्नं च भक्षयेत् । विप्रः

चतुर्शितं चैव कृच्छ्रमेकं समाचरेत् ॥ २० ॥ माहिषिक फाणितं शाकं गोरसं लवणं घृ
तं । हस्ता दत्वा निभुक्त्वा नि भोक्त्वा सांतपनं चरेत् ॥ पतिग्धातिष्ठति द्वारे दुरत्वा
श्नाति यो नरः ॥ रुधिरं तद्भवेदन्नं भुक्त्वा चांद्रायणं चरेत् ॥ पानार्थी तः पं
पिवेद्यस्तु न त्यजेद्यदि किंचन ॥ पयो शानमक्षेत्वा तु भुक्त्वा सांतपनं चरे
त् ॥ सूतिकायै तु यन्नांड स्पृष्ट्वा तस्य स्पृष्टि नाथवा ॥ तत्संभुक्त्वा द्विजो मो
हात्त्रिरात्रेण विशुध्यति । यद्वा भोजन कालेतु ह्यशुचिस्पृश्यते द्विजः ॥ प
शिखा सर्व मेवान्नं त्रिरात्रेण विशुध्यति ॥ चांडाल पतितोद क्यावाक्यं श्रुत्वा
द्विजोत्तमः ॥ भुंजीर न्नवापिवे यस्तु स्ववदिन म भोजनं ॥ शिरोवेष्टम नियो भुं
क्ते पानीयं वा पिवेत् क्वचित् ॥ पहोरात्रोषितो न्नवा पंचगव्येन शुध्यति ॥
घृतहीनं तु यो भुंक्ते नरः स्वाकृतिपंचकं । पश्चात्कृतेनयो भुंक्ते द्विजश्चांद्रा
यणं चरेत् ॥ शूरा संस्पृष्ट भांडे तु रेतो विष्मूत्र दूषिते । जल क्षीरादि
वा पिवेत् तप्तकृच्छ्रं समाचरेत् । विण्मूत्रो कृपघातस्या ह्यपः प्राणपदि

जोत्तमः ॥ तस्य शुद्धिस्त्रिरात्रेण पुनः संस्कारमर्हति ॥ ८ ॥ अंत्यजैः खानिता कूपा
स्तडागा वा तथैव च । तत्र स्नात्वा च पीत्वा च प्राजापत्यं समाचरेत् ॥ स्वच्छ
इच्छया चमंडुतां विधिवत्प्रतिगृह्य च ॥ शूद्रोच्छिष्टं च पीत्वापः कुशवारि
पिबेदहं ॥ अपन्नोज्य्रान्नं द्विजो भुंक्त्वा त्रिरात्रेणैव शुध्यति । मत्या भुक्त्वा च
रेत्कृच्छ्रं रेतो विण्मूत्रमेव च ॥ निर्गताचार विप्रस्य निषिद्धाचरणस्य च ॥
अन्नं भुक्त्वा द्विजः कुर्यात्प्राजापत्यं चतुष्टयं ॥ महापातकिनस्त्वन्नं कृत
घ्नस्य तथैव च । आरूढपतितानां च सगोत्रामेत्य रेव च । पाषंडितानां
श्रितानां यतेश्चापि तथैव च । पतितः कृच्छ्रः सकृत्स्य भुक्त्वा चरेच्चांद्राय
णव्रतं ॥ जातिभ्रंशादिकं पापं कृत्वान्यतर इच्छया । चरेत्सांतपनं कृ
च्छ्रं प्राजापत्यमनिच्छया । पादेन ब्राह्मणं हत्वा प्रायश्चित्तविधिच्छ
या । त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् । नीलीवस्त्रं यदा
रक्तं ब्राह्मणोंगेषु धारयेत् ॥ अहोरात्रोषितो भूत्वा पंच १८

चगव्येन शुध्यति ॥ रोमकूपे यदा गच्छेद्रसो नील्याः कस्यचित् । त्रिवर्णेषु
च सः मान्यं तप्तकृच्छ्रं विशोधनं ॥ नीलीदारु यदा भिद्यात् ब्राह्मणस्य श
रीरतः ॥ शोणितं दृश्यते तत्र चरेच्चांद्रायणद्वयं ॥ ५ ॥ नीलीमध्ये यदा गच्छे
त्प्रमादे प्रमादतः ॥ त्रिरात्रोपोषितो भूत्वा पंचगव्येन शुध्यति ॥ अपां
क्तेयस्य यः कश्चित्पंक्तौ भुंक्ते द्विजोत्तमः ॥ विना यज्ञोपवीतेन भुक्त्वा दि
नाम भोजनं ॥ अनापदि चरेद्यस्तु सिद्धां भिक्षां गृहे च सन् ॥ प्राजाप
त्येन शुध्येत ॥ एकाकी मिष्टमश्नाति द्विजः ॥ न पंक्तौ विषमं दद्यान्न याचेत्तं न
दापयेत् । प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः ॥ नदीतरणहेतु
श्च कन्याविघ्नकरस्य च । समे विषमकर्तुश्च निष्कृतिर्नैव विद्यते ॥ होमकाले
तथा दोहे स्वाध्याये दारसंग्रहे । अंतरेण यदा गच्छेद्द्विजश्चांद्रायणं चरेत् ॥
कन्यान्नेध नलाना नानां बुध्या विधा समाचरेत् ॥ प्रत्येकं प्राकृतं कुर्याद्वत्सच
र्यंतु वार्षिकं । वेतनं कारयित्वा यः पठेत्याग यति द्विजः । द्विजश्चांद्रायणं कु

र्यात्ततः पापात्प्रमुच्यते ॥ एवं निवर्त्य महायज्ञान्नोक्तं कोपत्तत्सहं गृही ॥ एवं तान्तु
रः स निधने वर्षषट्के न शुध्यति । ब्रह्मचारी सुनादुष्टः ॥ एतं सायापयः
पिबेत् ॥ गृहस्थश्चेत्त्रिरात्रं तु चैकाहं योग्निहोत्रवत् ॥५॥ नामे रूधं तु
दृष्टस्य तद्वद्द्विगुणं चरेत् । खादेच्च तत्त्रिवर्षेण मस्तके च चतुर्गुणं ॥ रज
स्वला च दृष्टे चेच्छुनाजंबूकरासभैः । पंचरात्रं निराहारः पंचगव्येन शुध्यति ।
ऊर्ध्वं तस्य शेतकार्याणि हृत्वा वा धनहारितः । वर्णानां यं द्वयं प्रोक्तं तद्द्धंप्र
यतश्चरेत् ॥५३॥ वल्लोद्दासीकृताये च म्लेछ चांडाल तस्करैः ॥ एवं तुं नका
रितं येन गवादि प्राणि हिंसनं । उच्छिष्टमार्जनं चैव तथा तस्मैव भोजनं ।
एवं हारात्रमुपासीरन् तच्छोचं बांधवैः सह । निंदितेहनि सायांह्ने ज्ञा
तिभिर्युक्तसन्निधौ । निवर्त्तेतितत सर्वे संभाषणसहासनं । दापा
दस्य प्रदानं च पात्रमेव च भोकिकं ॥ एवमेव विधिः कुर्या द्योषित्सुप

तितास्वपि । शरणागतस्त्रीबालंघातकान्संदिशेन्नचैव । देशं कुलं वयः शक्तिं पा
पं चावेक्ष्य यत्नतः ॥ प्रायश्चित्तं प्रकल्प्यं स्याद्यच्च चोक्तानि निष्कृतिः ॥ एवं नेन
शुद्धिमाप्नोति येन प्राणैर्वियुज्यते ॥ एवं पार्तिं वा महतिं याति नैव तद्धृतमाविशेत् ।
ऊनैकादशवर्षस्य पंचवर्षपरस्य च ॥६॥ चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं च
शुद्धये । मद्यमांसनदोषाणां भक्षणे नातिकश्चन । दोषस्यात्यंच मावर्षाद्
र्ध्वं पित्रोः सुहृद्गुरोः ॥ गृहस्थानानि पापानि कुर्वत्यां श्रमणो यदि ॥ श्चौलवद्धो
धर्मेण कुर्युरथ वा किं ब्राह्मणैः प्रदर्शनात् ॥ लघुदोषे च नादिष्टं प्रायश्चित्तं समा
चरेत् ॥ तावास वैषु दोषेषु [illegible] श्रुद्धो चांद्रायणं स्मृतं ॥ कृते निसंशये
पापे न भुंजितानुपस्थितः ॥ भुंजानो वर्धयेत्पापं यावान्नाख्यायपर्षदि ॥
पर्षत्सहस्रसंख्याका पापेषु महदादिषु ॥ उपपापेषु सर्वेषु स्वल्पे स्वल्पा
तपा न वेत् । पापं प्रख्यापयेत्पापी दत्वा धेनुं तथा वृषं ॥ विख्याय पापवं
तेकल्पः शास्त्रया दत्वा व्रतं चरेत् ॥ एवं पातीनां मार्गमाणानां प्रायश्चित्तानि

ये द्विजाः॥ज्ञानंतोनप्रयच्छंतिगच्छंतिसमुतांकृतैः।मोहाद्वापिद्विवालोभा
द्भयाद्ज्ञानतोपिवा॥वदंत्सनुग्रहंमेतुतत्पापंतेषुगच्छति।न्यायतोब्राह्म
णैःछिन्नंचत्रियादैःकृतेनसः॥अपुतराज्ञास्तर्णंकृत्वाव्रतंसर्वंसमादि
शेत्॥तथाश्चैडंसमासाद्यसदाधर्मपुरःसरं।प्रायश्चित्तंप्रदातव्यंजप
होमादिवर्जितं॥कर्मनिष्ठास्तपोनिष्ठाःकदाचित्पापमागताः॥जपहो
मादिकंतेभ्योविशेषेणप्रदीयते॥येनामधारकाविप्राःमूर्खाधनवि
विवर्जिताः॥कृच्छ्रचांद्रायणादीनितेभ्योदद्याद्विशेषतः॥राजोवाराज
पुत्रोवाधनंनिर्धनतःसदा॥भूमिदानादिकंतेभ्यःशक्तेभ्यःषड्गु
णंस्मृतं॥विद्वद्विप्रतपस्वीनांनेष्यतेकेशवापनं॥सतांमहापत
कीनांयश्चांशेनतुवर्णिनां॥इत्युपपातकानि॥अथकृच्छ्रचांद्रायणा
दिव्रतानि॥तत्रादौतागम्यमनियमाउच्यते॥ब्रह्मचर्यंदयाक्षां
तिर्दानंसत्यमलोल्यता॥अहिंसास्तेयमाधुर्यंदमश्चेतियमादश॥

स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहः॥नियमागुरुशुश्रूषाशौचाक्रो
धाप्रमादता॥एकभक्तेननक्तेनतथैवायाचितेनच॥उपवासेनचैकेन
पादकृच्छ्रमुदाहृतं॥यथाकथंचित्त्रिगुणंप्राजापत्योयमुच्यते॥अयमे
वातिकृच्छ्रःस्यात्पाणिपूरान्नभोजनः॥प्रातस्तुद्वादशग्रासाःसायंपंचद
शैवतु॥अयाचितोतुद्वौचाष्टौपादंनिरशनंस्मृतं।सायंद्वाविंशति
ग्रासाःप्रातःषड्विंशतिस्तथा॥अयाचितेषोडशग्रासाःकृच्छ्रस्यचरदाहृ
तः॥कुक्कुटांडप्रमाणःस्यात्मयूरांडप्रमाणकः॥ग्रासप्रमाणंविज्ञेयंय
थावास्यंविशेन्मुखे।सायंप्रातस्तथैवैकंदिनद्वयमयाचितं।दिनद्वयसमंकृत्वा
पराकःपरिकीर्तितः॥गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं॥प्राश्यापा.
परेह्न्युपवसेत्कृच्छ्रंसांतपनंचरेत्॥एकैकंप्रत्यहंपीत्वात्र्युपवासस्ततःपरं॥स
प्ताहेनतुकृच्छ्रोयंमहासांतपनःस्मृतं।अथगोमूत्रादिप्रमाणं॥ब्रह्मकूर्चेति
ज्ञेयं।पीण्याकमामतक्राबुसक्तूनांप्रतिवासरं।एकरात्रोपवासश्चमहाकृच्छ्रो

यदुच्यते ॥ एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् ॥ तुलापुरुइत्येवं ज्ञेयं पंचदशात्मकं ।
एतद्द्वयं च नाश्नीयात्कृच्छ्रार्द्ध इति विधीयते ॥ एकैकं ग्रासमश्नीयादहानि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रः प्रकीर्त्तितः ॥ त्र्यहमुष्णं पिबेदापः त्र्यहमुष्णं घृतं पिबेत् ॥
त्र्यहमुष्णं पयः पीत्वा वायुभक्षो दिनत्रयं ॥ अयं तप्तकृच्छ्रः शक्तविषये ॥ ८ ॥ तप्त
क्षीरघृतांबूनामेकैकं प्रत्यहं पिबेत् ॥ त्र्यहं चोपवसेत्तप्तकृच्छ्रं कृत्वा समाच
रेत् ॥ क्षीरं तु द्विपलं तत्र घृतमेकपलं स्मृतं ॥ जलं त्रिपलं ग्राह्यं परिमाणं प्रकी
र्त्तितं ॥ कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशति । द्वादशाहोपवासेन पराकः
परिकीर्त्तितः ॥ कृच्छ्रं पंचदशाहिकः गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयं ।
स्तनत्रयात्सप्तरात्रं त्रिरात्रं चाल्पमनुक्रमेत् ॥ एतत्सौम्यायनं नाम व्रतं कल्म
षनाशनं ॥ पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः ॥ प्रत्येकं प्रत्यहं पीत्वा पर्णकृ
च्छ्र उदाहृतः । एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः ॥ क्वाथयित्वा पिबेद
द्भिः पर्णकृच्छ्रो विधीयते ॥ पत्रैः स्ततः परमं कृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ॥ पत्रैः

फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः । श्रीकृच्छ्रः श्रीफलैः प्रोक्तो मासेनामलकैस्त
था । मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु ॥ तिथिवृद्ध्या चरेत्पिंडाञ्छुक्ले शिख्यं
डसंमितान् ॥ एकैकं ह्रासयेत्कृष्णे पिंडं चांद्रायणं चरेत् ॥ २७ ॥ हविष्यान्नं
समश्नीयाद्गायत्र्याचाभिमंत्रितं ॥ अमावास्यां न भुंजीत ह्युपस्त्रिषवणं स्पृशेत् ॥
वर्धमाने तथा सोमे ग्रासं वर्धयेत्सदा । हीयमाने च हीयंते एतच्चांद्रायणं
चरेत् ॥ अष्टावष्टौ समश्नीयात्पिंडान्मध्यंदिने स्थिते । नियतात्मा हविष्यस्य चां
द्रायणस्य तं चरेत् ॥ चतुरः प्रातरश्नीयात्पिंडान्विप्रः समाहितः ॥ चतुरोस्त
मिते सूर्ये शिशुचांद्रायणं स्मृतं ॥ त्रीन् पिंडान् समश्नीयान्नियतात्मा दृढव्र
तः । हविष्यान्नं च वै मासं ऋषिचांद्रायणं चरेत् ॥ यथाकथंचित्पिंडानां चत्वा
रिंशच्छतद्वयं ॥ मासेनैवोपभुंजीत चांद्रायणमथापरं ॥ अनादिष्टेषु पापेषु
शुद्धिश्चांद्रायणैः स्मृता । धर्मार्थं यश्चरेदेतच्चंद्रस्यैति सलोकतां ॥ अथ प्रत्या
म्नायः ॥ ॥ जन्मप्रभृति पापानि कृतानि सुबहून्यपि । षडब्दैर्नैव शुध्यंति महत
तः पातकादृते । प्रत्याम्नाया गवां देयं मशिशितिर्धनिनः शरं । दशाब्दपाणिगा

यत्या तथाष्टौ व्रतमाचरेत् ॥ प्राणायामसहस्राणि द्वादशात्रिगुणानि च ॥ एवं नरविशो
षण प्रायश्चित्तं प्रकल्पयेत् । तिलहोमस्य लक्षं तु सहस्राण्यपरीति च ॥ प्रतामा
तद्दमा ४ या समा गावो दक्षिणा हितयैव च । प्राजापत्यं दशाब्दानि सक्तु गाददद्यात्तु स जलदर्पणं ।
तेद्दर्मो वेलुनिष्कं स्यात् दद्धं पादमेव च । विप्रा द्वादश वै भोज्यो उपवासस्त
थैव च ॥ पारायणं संहिताया: समान्यानुक्रमनीषिण: । कृच्छ्रं दशयुतं चैव प्रा
णायामः शतद्वयं । तिलहोमसहस्रं तु समान्यानुक्रमनीषिण: । उपवासस्त
गायत्र्याः सहस्रं विप्रभोजनं ॥ प्राणायामशतं दृष्टौ च सममेतच्चतुष्टयं । प
तिकृच्छ्रपराकश्च तप्तकृच्छ्रस्तथैव च ॥ प्राजापत्यत्रयं चैव सममेतच्चतुष्टयं ॥ चांद्रायण
त्रयं कृत्वा गायत्र्या ह्ययुतत्रयं । गोदानानि तथा । त्रीणि समयेत चतुष्टयं । पुण्यतीर्थे
चार्द्रशिराः स्नानं द्वादशसंख्यया । द्वियोजनं तीर्थयात्रा प्राजापत्यसमं स्मृतं ।
गायत्र्याः स्कन्दजपेरक्कोटिं ब्रह्महत्या व्यपोहति ॥ लक्षस्य शतजपे च स्कन्द सुरापाना
त्प्रमुच्यते ॥ पुनातिहोमहत्तारिं गायत्र्या जंदात्सप्तमी ॥ गायत्र्याः षट्त्रिंशं जि
दौ दौः दौः पुनाति कृस्रतत्यगः ॥ मंडलं पावमानं त्र जपेल्लिलत हविषं नुकः ॥ १५४

धु
मासमेकं तु नारी शुद्धिर्ब्रह्मवधादृते ॥ इदमिंद्रमिदं स्कंदं मधुपर्कं देवमेव
च । सुरापानात्प्रमुच्येत मासमेकं तु योजयेत् ॥ षण्मासं वत्सरं वापि नियतो नि
यताशनः ॥ जप्त्वा तु पौरुषं सूक्तं मुच्यते सर्वपातकैः ॥ प्राणायामशतं कार्यं स
र्वपापापनुत्तये । उपपातकजानां तु ह्यनादिष्टस्य चैव हि । महाव्याहृति
होमस्तु तिलैः कार्यो द्विजन्मना । उपपातकशुध्यर्थं सहस्रं परिसं
ख्यया । निशायां वा दिवा वापि यदज्ञानकृतं भवेत् । त्रिकालसंध्याक
रणात्समस्तं प्रणश्यति ॥ वेदाभ्यासरतं शांतं महायज्ञक्रियापरं । न स्पृ
शंति हि पापानि महापातकिनं विना ॥ लोके विलोक्य पापानि तमसा क
वलीकृतं । प्रज्ञाभावाद्य न स्मृति स्मृत्यर्थभास्वरं ॥ सन्मार्गच्यु
तमुन्मार्गगामिनं चासाद्दर्शनं ॥ पतनं पापकूपेषु नानात्माति समाकुलं ॥
प्रतस्तस्योपचाराय सारमुध्धत्य यत्नतः ॥ मन्वाद्यनेकशास्त्राणां शा
स्त्रदीपः कृतो मया ॥ २१ ॥ इति नारायणभट्टविरचितायां धर्मप्रवृत्तौ प्रा

यश्चित्तप्रकरणं॥ ॥उ। पिता माता मातामहश्चैव जामाता भगिनीत्रयं॥ श्वसुरेण च सं
बंधाः सप्त गोत्राः प्रकीर्त्तिताः॥६॥ अथ एकोत्तरशत कुलानि॥ ॥ पित्रादीनां च
सप्तानामेकैकस्य चतुर्दश॥ मित्र स्वामि गुरूणां च कुलमेकोत्तरं शतं॥ अ
थ मधुपर्कविषयं॥ द्विराचम्य समासीनं कृतीप्रत्यङ्मुखो वरं॥ प्राङ्मुखं तु समासी
नं मधुपर्केण पूजयेत्॥ मूको ध्रो बधीरस्तब्धाः पंगुकुब्जो नपुंसकः॥ कुष्टी रो
गी ह्यपस्मारी दशदोषा[illegible] तावुधैः॥ कुलं शीलं वपुर्विद्या वयो वित्तं सनाथता॥ गु
णाः सप्त भवते यस्मै तस्मै कन्या प्रदीयते॥ अथ षोडशलक्षणं॥ हिरण्यं धान्यमन्नं च
स्ना~~[illegible]~~ नं वा सागरासु च॥ चतुर्विधा नमे
तेषां मध्ये संज्ञा प्रच दृते॥ साल्लंकृतं वा गोदानं तन्मोल्यं चात्र निष्कलं॥ हेमक
ष्ठो नवे त्रिंशत्कथिता हि बुधैरपि॥ द्वादश द्विजभोज्यं च कृष्छ्रस्यैकं उदा
हृतः॥ त्रिंशद्देवहिते कृष्छ्रे एकादः परिकीर्त्तिताः॥ समुद्रगा नदी स्ना
नं एकस्मात्कृष्छ्र एव हि॥ कृष्छ्रास्त त्रिंशमे काश्च कल्प्यते मुनिभिः सदा॥ षडु
ण्णी कृत मे कष्टे नैकैकं पृथक् पृथक्॥ षडष्टं तत् द्वि[illegible]जैः प्रोक्तं प्रायश्चि १५५

त्तं द्विजन्मना॥ हेमधान्यानि रत्नानां मेकैकस्य पृथक् पृथक्॥ षडष्टं विधिना कुर्यात्प्रा
यश्चित्तं चतुर्विधं॥ साशीति शत संख्याकान् कृष्छ्रान् स्वष्टस्य चैव हि॥ चल विधिर्नाम
पूर्वं प्रायश्चित्तं विनिर्दिशेत्॥४३॥ एवं कर्ममहाशक्त्यश्च घयाविताऽनुसारतः॥ ॥
तीर्थानुगमनेनैव स्नान होम जपादिना॥ अत्रापि दशपापानि[illegible] कुर्यात् पाप[illegible]दं
यायच॥ यथोक्तविधिनाशक्तो वशक्तो च स्व शक्तितः॥ अ। गोभूतिलहिरण्या
ज्यवासो धान्य गुडानि च॥ रौप्यं लवणमित्याहुर्दश[illegible]दानाः प्रकीर्त्तिताः॥ सा
लंकृता सवत्सा च सदक्षिणा पयस्विनी॥ गां प्रदद्याद्दश कृष्छ्रे तन्मोल्यं वा स्व
शक्तितः॥ निवर्त्तनमिताभूमिर्जोएत्रयमितास्तिलाः॥ सुवर्णं निष्कपादं स्या
दाज्यं चैवाढकं स्मृतं॥ स्त्र द्वौ व स्त्र[illegible] पंचैव गुडं च पल नष्टकं॥ सार्धकारीद्व
यं धान्यं व्रीहयः परिकीर्त्तिताः॥ निष्कत्रयमितं रौप्यं लवणं सार्द्धखादितं॥ प्र
माणं दशदानानां कीर्त्तितं मनीषिणः॥५०॥ बालवत्सकधेनूनां सहस्रं यत्र तिं
ष्ठति॥ तद्धे निवर्त्तनं ज्ञेयं इति शातातपोऽब्रवीत्॥ साशीति शत कृष्छ्रा सुरे
सा।

काष्ठस्य च वैशुनः॥ षड्गुणीकृतं तस्माद्दं षडब्दः परिकीर्तितः॥ हेमान्नस्नानधान्यानां
समानं तच्चतुष्टयं॥ इत्थं कृतं महाकृच्छ्रे रेकैकं वापि कृच्छ्रकं॥ यान्यकर्तुं शक्यते
तेषामनुशिष्टं श्च शक्तितः॥ किंचिद्दत्वा सुवर्णं तु स्नानान्यपि समाचरेत्॥
कुर्यात्तस्मात्समर्थोपि यथा वित्तानुसारतः॥ निवेद्य कृतपापानि परिषत्संनिधौ
स्वयं॥ प्राज्ञापितं तथा लब्ध्वा वपनादिकमाचरेत्॥ स्नात्वा प्राश्य गं गोदानं प्राय
श्चित्तनिमित्तकं॥ पादौ दद्यात्तथाचोत्तेषु दोषांगनिमित्तकं॥ हवनं पंचगव्य
स्य तत्तन्मंत्रपुरःसरं॥ कृत्वा व्याहृतिभिश्चैव तिलाज्यं जुहुयाद्द्विज॥ प्रायश्चि
त्तं विवेदय परिषद्युक्तं यच्चैवं प्रायश्चित्तं समाचरेत्॥ पुनः परिषदं नत्वा समस्त
व्यस्त शक्तितः॥ सर्वपापविनिर्मुक्तः पूतो भवति मानवः॥ ५॥ प्रायश्चित्तं स दद्यं
स्याउत्तमस्याधिकारिणः॥ द्विगुणं मध्यमस्यापि त्रिगुणं प्रथमस्य च॥ षट्कर्म
निरतो विप्रः उत्तमः परिकीर्तितः॥ वेदहीनः कर्मनिष्ठो मध्यमः परिकीर्तितः॥
निचसेवारतो वेदशून्यस्याद्धमो हि सः॥ एवं ज्ञात्वा ततो विप्रान्प्रायश्चित्तं १६६

विनिर्दिशेत्॥ कर्षमात्रसुवर्णस्य कृच्छ्र इत्यभिधीयते॥ तदभावे धर्मधेर्वा गोरसु
जामात्रमेव वा॥ द्वादशाढकधान्यस्य कृच्छ्र इत्यभिधीयते॥ कृच्छ्रमेकं नदीस्नानं
द्वादशद्विजभोजनं॥ गुंजामात्रसुवर्णं तु कृच्छ्रः सर्वमशेषतः॥ तदभावे च वा
ताम्रं लोहं सीसमथापि वा॥ षडब्दं ब्राह्मणस्योक्तं ब्राह्मणस्य तदर्धकं॥ जीवतु
तेमने वा कुशवे द्विगुणमुच्यते॥ प्रस्थितं द्विगुणं गोलं पाद्योशे चतुर्गुणं॥
दाने तस्ता वतिथ्ये का यद्युत्पन्नं नु वो हि वे॥ द्विजः संवत्सरं चैको यस्त्रीवाद्धि
तो भवेत्॥ दशाहसोकुदंडस्यात्रिंशद्दंड निवर्तनं॥ निवर्तनैश्च तावद्भिः गो
चर्मपरिकीर्तितं॥ प्रथ्यधान्यपरिमाणं॥ पलं द्वयं तु प्रसृतिं द्विगुणं कुड
वं स्मृतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थश्चत्वार आढकः॥ आढकैस्तैश्च
तुर्भिश्च द्रोणः स्मकचितो बुधैः॥ कुंभो द्रोणद्वयं सूर्पः खारी द्रोणास्तु षोडश॥
सुवर्णपरिमाणं॥ जालसूर्य मरीचस्थं त्रसरेणुः रजः स्मृतं॥ तेष्ठो लिक्षा तु ता
स्तिस्रो राजसर्षप उच्यते॥ गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः॥ कृष्णलः

पंचते माषस्ते सुवर्णस्तु षोडश॥ ॥ ४३॥ फलं सुवर्णाश्च त्वारः पंचवापि प्रकीर्त्ति
तः॥ द्विकृष्णलो रौप्यमाषो धरणं षोडशैव तु॥ शतमानं तु दशभिर्धरणैः प
लमेव च निष्काः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः॥ ॥ पन्यपद्धोः य
वस्यासरत्रा पैश्च त्रिगुंजाश्चैव यस्मात् त्रितिर्यकैः गुंजाभिः पंचभिश्चैको माषकः
परिकीर्त्तितः। नवषोडशभिर्माषैः सुवर्णस्तु पुनः स्मृतः॥ पलं सुवर्णाश्चत्वा
रः पंचवापि प्रकीर्त्तितः॥ मानं तु लांगुलिकस्यैः गुंजा पंचाद्य माषकः॥ ते षोड
शा तु कर्षो स्यात् फलं कर्षश्चतुष्टयं॥ इति श्रीनारायण भ० कृ० वि० ध० ॥ ॥ पश्चादि
लक्षणं॥ ॥ अथ निमेषादि कालज्ञानलक्षणमाह ॥ ॥ पाक्षिपक्षपरिक्षेपो निमे
षः परिकीर्त्तितः॥ द्वौ निमेषौ त्रुटिर्ज्ञेया द्वौ त्रुटी तु लवः स्मृतः। द्वौ लवौ क्ष
ण इत्युक्तं काष्ठा प्रोक्ता क्षणा दश त्रिंशत्काष्ठाः कलाः प्रोक्ताः कलास्त्रिंशा
न्मुहूर्तकः॥ ॥ ॥ पक्षः पंचदशप्रोक्ता मुहूर्तोः पूर्वसूरिभिः॥ रात्रावपि तथा
प्रोक्ता अहोरात्रमिति स्मृतं। द्विधा त्रिधा च तद्वा पंचधा दिवसः स्मृ

तः॥ तत्र मध्याह्नतः पूर्वं पूर्वाह्नस्तु स्मृतो बुधैः॥ ॥ तद्वहिश्चैव मध्याह्नो ह्य
पराह्नः स्मृतो परैः॥ सायाह्नश्चेति वैप्रोक्ताः चतुर्धा दिवसस्य तु॥ मुहूर्तत्रि
तयं प्रातस्तावानेव हि संगवः॥ मध्याह्नस्त्रिमुहूर्तः स्यादपराह्नस्तु तादृशः॥
सायाह्नस्त्रिमुहूर्तः स्यादित्येवं कथितो बुधैः॥ ॥ प्रासायं वर्तते यावत्सा
तिथिः सर्वकर्मसु॥ उदितो यत्र मार्तंडः खंडः खंडातिवर्तते। ॥ अखंडा सा
तिथिः ग्राह्या स्नानदानव्रतादिषु॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनि
तिथिः॥ तया कर्माणि कुर्वीत ह्रासवृद्धिर्न कारणं॥ जन्मास्तांत्पं गनीयद्धि
स्नानदंतमज्जास्तु च॥ तिथिस्तात्कालिनी ग्राह्या पारणे लंघने तथा॥ व्रतो
पवासनियमे घटिकैका यदा भवेत्॥ सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्निकी॥
खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं॥ ॥ खर्व दर्पौ परौ पूज्यौ हिंसा स्यात्पू
र्वकालिकी॥ खर्वो नाम तिथेः साम्यं दर्पो वृद्धिः प्रकीर्त्तितः। हिंसा स्यात् क्षय इ
त्युक्तो मुनिभिस्तिथिनिर्णयः। तिथेः परस्या घटिका स्तु यास्युर्न्यूनास्तथैवास्य

१६८

धिकाश्च तासां ॥ अथ धर्मे नियोज्यंच तथा प्रयोज्यं क्रमसेच वक्ष्ये प्रथमे दिने तत् ॥ वृद्धाचार्य
स्थयत्र मासमेसौरस्यापेवचः। कश्चिन्न धर्मे तु कः श्रेया विष्णुधर्मेषु योधिकः ॥ तत्र
तावत्प्रतिपदादितिथयः ॥ तत्र स्मृतिः ॥ युग्माग्नियुग्मभूतानां षण्मुन्योर्वसुरंध्रयोः ॥
रुद्रेण द्वादशीयुक्ता चतुर्दश्याच पौर्णिमा ॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं ॥
व्यस्तमेतन्महादोषं प्रवदंति मनीषिणः ॥ प्रतिपदादितिथिनाम देवताः ॥ कोलादर्शे ॥
अग्निचापाविधिं गौरीं गणेशं फणिनं गुहं ॥ सूर्यं शंभुं तथा दुर्गां यममीशं हरिं स्मरं ॥
॥ शिवं चंद्रमसं चैव क्रमात्प्रतिपदादिषु ॥ शुक्ले कृष्णे पिवा पक्षे विधिनापरिपूजये
त् ॥ तत्र तावत्संवत्सरप्रतिपन्निर्णीयते ॥ याशुक्लप्रतिपच्चैत्रमासवत्सरयोश्च सा
परविद्धा प्रकर्त्तव्या द्विमुहूर्त्ता भवेद्यदि ॥ नंदा संवत्सरादौ च दर्शे विधानकारयेत् ॥
परविद्धा प्रकर्त्तव्या द्विमुहूर्त्ता भवेद्यदि ॥ मुहूर्त्तमपि कर्त्तव्या प्रतिपद्धितियान्विता ॥
याशुक्लमासस्य तिथिर्वत्सरादिरिति स्मृता ॥ २८ ॥ मुहूर्त्तद्वितयं चैव मुहूर्त्तं यद्दिवा
परा। वर्त्ततेवासरे यस्मिन् प्रातःसो ऽधपतिर्भवेत् ॥ अन्यच्च ॥ प्रतिपद्विखल्वचैत्रां १६८

शुक्लेपक्षेनवेतां कथमपि यदि वारो [illegible] द्वौ तदा भूपतिः कः। प्रथमइह मुनींद्रैः कीर्त्तितोगर्ग
मुख्यैः गुणवतिसतितिष्ठिं भेराज्यनाज्जेष्ठ एव ॥ अथ द्वितीया ॥ पत्नतिस्तिलकाशोकक
रवीरव्रते हिता। सा द्वितीया ॥ तथा च तद्द्वितीया प्रतिपद्युता ॥ ३ ॥ पूर्वेद्युरसतिप्रातःपरे
द्युस्त्रीमुहूर्त्तगाः ॥ सा द्वितीया परो पोष्या पूर्वविद्धा तथान्यथा ॥ अथ तृतीया ॥ रंभाख्यांवर्ज
यित्वा तु तृतीया द्विजसत्तम ॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ॥ अथ चतुर्थी ॥ ग
णनाथव्रते कार्या तृतीया सहिता तथा ॥ चतुर्थी तन्नदेवस्या व्रते ग्राह्यापरान्विता ॥ ५ ॥ सं
कटचतुर्थीव्रते तृतीयायुक्ता गृह्यते। सिद्धिविनायकव्रते परविद्धा चतुर्थिका गृह्यते ॥
अथ पंचमी ॥ पंचमी सर्वदा ग्राह्या परा द्वादशनाडिका ॥ सा नागपंचमी प्रोक्ता व्रतेष्वन्येषु चापरा ॥
कर्त्तव्याश्च वर्षेशुक्ला त्रिमुहूर्त्तादिपंचमी। तं न्यूना यदि चेत्पूर्वपंचमी शुक्लदानुगां ॥ तत्रैव
पूजयेत्सर्वान् येकन्नक्तादिकं च हि ॥ अथ षष्ठी। न हि षष्ठी नागविद्धा कर्त्तव्या तु कदा
चन ॥ परविद्धा प्रकर्त्तव्या षष्ठी सर्वव्रतेषु च ॥ ७ ॥ अथ सप्तमी ॥ सप्तमी पूर्वविद्धैव व्र
तेषु सकलेषु च ॥ पलाने पूर्वविद्धायाः परविद्धा प्रगृह्यता ॥ अथाष्टमी ॥ शुक्लपक्षेऽष्टमी का
र्यानवमी सहितायदा ॥ पूर्वविद्धा न कर्त्तव्या शिवशक्तिव्रतेष्वपि ॥ कृष्णपक्षेऽष्टमी चैव कर्त्त

१६९

व्या सप्तमीयुता ॥ नवमी संयुता या च कर्तव्या न कदाचन ॥ अथ नवमी ॥ अष्टम्यां संयुता कार्या
नवमी सर्वदा श्रुता ॥ दशमीसंयुता चापि कर्त्तव्या सापि कुत्रचित् ॥ दशमी ॥ दशमी तु प्रकर्त्त
व्या नवमीसंयुता सदा ॥ उदयव्यापिनी चेत्स्यात्परतश्चेत्परेहनि ॥ अथैकादशी ॥ दश
मीवेधरहिता कर्तव्यैकादशी सदा ॥ गृहस्थैर्यतिभिश्चैव पक्षयोरुभयोरपि ॥ द्वाद
शी ॥ पूर्वविद्धा प्रकर्तव्या द्वादशी सर्वदा बुधैः ॥ परविद्धापि कार्या वा यथा मोक्षो भवेत्तथा ॥
त्रयोदशी ॥ त्रयोदशी प्रकर्त्तव्या द्वादशीसहिता विभो ॥ भूतविद्धा न कर्तव्या शुक्ला कृ
ष्णा परा स्मृता ॥ चतुर्दशी ॥ पौर्णिमासहिता कार्या शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा
प्रकर्तव्या परविद्धा प्रशस्यते ॥ कश्चिद्विशेषो न विष्टे ॥ मधोः श्रावणमासस्य शु
क्लापि हि चतुर्दशी ॥ पूर्वविद्धैव कर्त्तव्या नान्या शुक्ला कदाचन ॥ २० ॥ शुक्लापि रात्रियु
क्ता स्याच्चैत्र श्रावणमासयोः ॥ कृष्णा सदापि पूर्वैव यदि स्यात्सापरात्रिकी ॥ पूर्णिमा ॥
भूतविद्धा न कर्तव्या पूर्णिमासी कदाचन ॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमं ॥ पूर्वविद्धै
व सावित्रीव्रते पंचदश्यां तिथिः ॥ नाड्योष्टादश भूतस्य यदि चेत्स्युः परेहनि ॥ तथा च चिंता
मणौ ॥ द्वितीया त्रिमुहूर्त्तेन नवमी याममात्रतः ॥ दशमी घटिकार्द्धेन दूषयेदुत्तरां ति १६९

थिं ॥ नागो द्वादशनाडीभिः सूर्यश्चैव तु सप्तभिः ॥ भूतोष्टादशनाडीभिर्दूषयंत्युत्तरो
तिथिं ॥ पाभिश्च घटिकाभिर्या उक्तास्तास्तिथयस्त्विमा ॥ पक्षयोरुभयोश्चैव दूष
यंत्युत्तरां तिथिं ॥ २१ ॥ उक्तास्तु घटिका यत्र वर्त्तते तिथयश्च या ॥ ता एव तिथयः को
पीस्नानदानव्रतादिषु ॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रतेषु च ॥ एकादशीं वि
ना सर्वाः शुक्ले कृष्णे समाः स्मृताः ॥ मुहूर्तोनं दिवा नक्तं प्रवदंति मनीषिणः ॥ नक्ष
त्रदर्शनान्नक्तमहं मन्ये गणाधिप ॥ प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ॥
तिथौ सत्यां न यो नक्तं सदैवार्के दिने दिवा ॥ पालनो द्विगुणछायामंदीभवति
भास्करे ॥ तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनं ॥ एवं ज्ञात्वा ततो विद्वान्सायाह्ने
तु भुजिक्रियां ॥ कुर्यान्नक्तव्रती नक्तं फलं भवति निश्चितं ॥ नक्षत्रदर्शनान्न
क्तं गृहस्थस्य बुधैः स्मृतं ॥ यतेर्दिनाष्टमे भागे तस्य रात्रौ निषेधतः ॥ २२ ॥ उद
ये तूपवासस्य नक्तस्यास्तमये तिथिः ॥ मध्याह्ने दृश्यते यावत्सैकभक्तैः प्रगृह्य
ते ॥ इति सामान्यतिथिनिर्णयः ॥ तत्र तावन्मासप्रयुक्ततिथयो निर्णीयते ॥

१७० पूर्वमेव संवत्सरप्रतिपदा निर्णीयते ॥ अथ गौरीतृतीया स्कंदे ॥ चैत्रशुक्लतृतीयायां गौ
रीतावत्प्रपूजयेत् ॥ यावन्मासा भवेन्नित्यं नारी पतिव्रता सदा ॥ ३६ ॥ ज्योतिः ॥ चतु
र्थीसहिता या तु सा तृतीया फलप्रदा ॥ अवैधव्यकरा स्त्रीणां पुत्रपौत्रप्रदायिनी ॥ ॥
माधवीये ॥ रंभा तृतीया पूर्वा स्यादुत्तरा स्याद्व्रतोत्तरे ॥ परेह्नि नास्ति चेत्पूर्वविद्धाप्य
स्मृव्रतोत्तरे ॥ मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं चरेत् ॥ शुद्धाधिकायामप्येवं गण
युक्ता प्रशस्यते ॥ अथ रामनवमी ॥ चैत्रशुक्लनवम्यां तु रामस्य पूजनं भवेत् ॥ त
तो मध्याह्नवेलायां संजातो द्विजगद्धितः ॥ ज्योतिः ॥ नवमी चाष्टमीविद्धा त्याज्या राम
परायणैः ॥ उपोषणं नवम्यां तु दशम्यामेव पारणं ॥ ● ॥ श्रीरामजन्मनवमी संपूर्णा स
कला सदा ॥ खंडा चेत्परविद्धैव कर्तव्या तु विशेषतः ॥ द्वयोर्मध्याह्नयुक्ता चेन्नोपोष्या
पूर्वसंयुता ॥ परविद्धैव कर्तव्या मध्याह्नव्यापिनी सदा ॥ ४२ ॥ अथाक्षय्यतृतीया ॥
सा त्रेतायुगादिः ॥ तथाह हेमाद्रौ ॥ ऊर्जे राधे सिते माघे नाड्ये कृष्णे कृतादयः ॥ नवमी तृ
तीया दशमी त्रयोदशी स्यादनुक्रमात् ॥ राधो नाम वैशाखः ॥ स्मृत्यर्थसारे ॥ द्वे च शुक्ले
द्वे च कृष्णे युगादिकवयो विदुः ॥ शुक्ले पूर्वाह्णिके ग्राह्यो कृष्णे चैवापराह्णिके ॥ शुक्ले १७०

पूर्वाह्णिके ग्राह्या इति मध्याह्नात्पूर्वं शुक्लयुगादिश्राद्धमारभेत ॥ कृष्णे मध्याह्नादुपरि ॥ अ
पराह्ण एवेत्यर्थः ॥ अपारंभे कुतुपः श्राद्धे सर्वत्रापि कर्मणि ॥ अपादौ शुक्ले द्वयोश्चांते युगा
घोर सिते तथा ॥ ज्योतिः ॥ वैशाखस्य तृतीयां वै पूर्वविद्धां करोति वै ॥ हव्यं देवा न गृह्णंति कव्यं च
पितरस्तथा ॥ पूर्वविद्धदिने दत्तं पितृणां नोपतिष्ठति ॥ यथाकालेषु यद्दत्तं पितृणामुपतिष्ठ
ति ॥ यथाकाल इति ॥ अपराह्णकाले ॥ तृतीया हि द्वयोः शुक्ला माध्याह्नव्याप्य ॥ माधवे ॥
प्रथमेव तदा कार्या निःफला नु परा स्मृता ॥ मन्वादौ च युगादौ च तथाष्टकासु तथैव च ॥ मध्याह्नव्या
पिनीं कुर्यात्संगवात्यमथापि वा ॥ अनंतभट्टः ॥ मन्वाद्यासु युगाद्यासु सूर्ये तथाष्टकासु चाश्रा
द्धेषु दर्शवत्कुर्यात्तिथ्यादिष्वेवमेव हि ॥ व्यतीपातेषु वै दत्तं युगमन्वंतरादिषु ॥ तत्कालव्या
पिनी कुर्यात्पूर्वां वा यद्यवापरा ॥ ५३ ॥ तत्कालव्यापि श्राद्धे कुतुपाद्य पराह्णव्यापिनीत्यर्थः ॥ अ
स्यामेव तृतीयायां परशुरामो जातः ॥ तेन परशुरामजयंती उच्यते ॥ ब्रह्मपुराणे ॥ वैशाखेमा
सि शुक्लायां तृतीयायां जनार्दनः ॥ ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत् ॥ यत्राद्युत्ला
दयामास रवौ मध्यंदिने सति ॥ प्रोक्ता परशुरामस्य जयंतीति च सूरिभिः ॥ ५६ ॥ भविष्यो
त्तरे ॥ वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुं ॥ नारायणं पूजयेथाः पुष्पधूपविलेपनैः ॥
नारदीये ॥ वैशाखशुक्लपक्षस्य तृतीया रोहिणीयुता ॥ दुर्लभा बुधवारेण सोमेनापि युता

तथा ॥ रोहिणी बुधयुक्तापि पूर्वविद्धाविवर्जिता ॥ न त्याज्या तापि मांधाता तःपुण्यहंति पुराकृ
तं ॥ गौरीविनायकोपेता रोहिणीबुधसंयुता ॥ विनापरोहिणीयोगात्पुण्यकोटिप्रदा सदा ॥
विद्धपूर्वदिने दत्तं यत्किंचित्पूजनं भवेत् ॥ नैव तत्फलतिवैकुंठेः पूजांतदिनसंभवं ॥ अथ
नृसिंहजयंति ॥ शुक्लपक्षे चतुर्दश्यां मासि माधवसंज्ञके ॥ प्रादुर्भूतो नृपंचास्य तस्मात्तां
समुपोषयेत् ॥ अनेनैव समाहुत्य स्नानसोपोष्या चतुर्दशी ॥ पूर्णायुतां तु जो कुर्यात् नृसिंह
स्य चतुष्टये ॥ यः करोति नरो मोहात् कामविद्धा चतुर्दशी ॥ अनापत्कालैत्ये वियुज्ये ततस्मात्तां
परिवर्जयेत् ॥६३॥ चतुर्दशी न वर्तेत सायंकाले दिनद्वये ॥ परे वर्तते सा तु कर्तव्या सा
तथैव तु ॥ स्पृशेत्पर दिने चेत्स्या सायंकाले चतुर्दशी ॥ कर्तव्या सान्यथा पूर्वा × नरसिं
हप्रिया तिथिः ॥ अथ नागपंचमी ॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप ॥ द्वारस्योभ
यतो लेख्या गोमयेन विचक्षणः ॥ पूजयेद्विधिवद्वीरः दधिदूर्वांकुरैः कुशैः ॥ गंधपुष्पोपहा
रैश्च ब्राह्मणानां च तर्पणैः ॥ एतस्यां पूजयंतीह नागान्भक्तिपुरःसराः ॥ न तेषां सर्वतो वी
र भयं भवति कुत्रचित् ॥ मौतिःसारे ॥ षष्ठीयुता सदा कार्या पंचमी नागपूजने ॥ चतुर्थीसहि
ता चैव कर्तव्या न कदाचन ॥ नभसः पंचमी शुक्ला त्रिमुहूर्तयुता परा ॥ एतन्न कव्रते ग्राह्या स्ना
नं चैव हि पूजने ॥ ७०॥ नभसः पंचमी यत्र संगवं त्वनुवर्तते ॥ तां पासायं सा तिथिः प्रोक्ता स्नान १७१

दानव्रतार्चने ॥ षष्ठीयुतायां पंचम्यां श्रावणस्य सिते यदा ॥ पूजयेत्स नागान्सर्वान् भयान्य
पस्यादिभिः ॥ स्नातानि धांतु पूर्वाह्णे पंचम्यां नभसस्थिते ॥ वागपतः पूजयेत्सर्पान्न
चैतस्य भयं भवेत् ॥ घृतादिकेनैव पंचम्यां स्नापयित्वा महोरगान् ॥ सर्वपापवि
निर्मुक्तः सर्वान्कामान्समश्नुते ॥ कचिद्देशे शुक्लचतुर्थ्यामपि नागान्पू
जयंति ॥ सा पंचमीयुतैव कार्या ॥ उक्तं च चतुर्थ्यां सेवोपोष्या तरेदिने ॥
फणिनः पूजयेत्तत्र प्रसीदंति फणेश्वराः ॥ चतुर्थीसहिता कार्या पंच
मी कार्तिके सिते ॥ मध्याह्ने पूजयेत्सर्पान् गंधपुष्पाक्षतादिभिः ॥७६॥
युगमध्यं दिने यत्र तत्रोपोष्य फणीश्वरान् ॥ क्षीरेणाप्याय पंचम्यां पा
रयेत्प्रयतो नरः ॥ एतत्कार्तिकशुक्लचतुर्थ्यां नागपूजाविषयं ॥ अथ ज
न्माष्टमी ॥ अष्टम्यां श्रावणे मासि कृष्णपक्षे नराधिप ॥ अर्धरात्रे जगन्ना
थो देवक्यामवतारयत् ॥ जन्माष्टमी जयंतीति सेव प्रोक्ता महर्षिभिः ॥ उपो
ष्या कलियुगे श्वनरैः प्रदीपकल्मषे ॥ अथ न्यपक्षे ॥ श्रावणस्य तु मासस्य कृष्णा

१७२ ष्टम्यां नराधिप ॥ रोहिणी यदि लभ्येत जयंती नाम सा तिथिः ॥ ८० ॥ अर्धरात्रे तु
रोहिण्यां यदा कृष्णाष्टमी भवेत् ॥ तस्यामभ्यर्चितः शौरीर्हंति पापं त्रिजन्मनः ॥
पैः कृता श्रावणे मासि ह्यष्टमी रोहिणीयुता ॥ किं पुनर्बुधवारेण सोमेनापि वि
शेषतः ॥ तथा च ॥ जयंती बुधवारेण सोमवारेण वा पुनः ॥ जन्यते देवयोगे
न तामुपोष्य महाफलं ॥ अष्टम्यां रोहिणीयोगो मध्यरात्रे दिनद्वये ॥ तदोत्त
रैव कर्तव्या नैव पूर्वा कदाचन ॥ स्कांदे ॥ उदये चाष्टमी किंचिन्नवमी सक
ला यदि ॥ भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ॥ अपि वर्षशतेनापि
जन्यते वा न वा विनो ॥ स्नानार्चनजपदानस्नानतत्रादमं भवेत् ॥ ८१ ॥ म
ध्यरात्रे तु योगोऽयं कदाचिन्न भवेद्यदि ॥ जन्माष्टम्यां च विद्वद्भिः समुपोष्या
सदा बुधैः ॥ अर्धरात्रे भवेच्चाथ समारभ्योदयं रवेः ॥ अष्टमी यदि वर्तेत न
सैवोपोष्या सदा बुधैः ॥ दिनद्वयेऽर्धरात्रे तु वर्तते यदि चाष्टमी ॥ परविद्धैव
कर्तव्या पूर्वविद्धां परित्यजेत् ॥ अष्टमी मध्यरात्रे तु यदि न स्याद्दिनद्वये ॥ १७२

पूर्वविद्धैव कर्तव्या परविद्धां परित्यजेत् ॥ ८० ॥ अथ पारणाविधिः ॥ जन्माष्टमी रो
हिणी च शिवरात्रिस्तथैव च ॥ पूर्वविद्धैव कर्तव्या तिथिभांते च पारणं ॥ जयं
ती शिवरात्रिश्च कार्ये भद्राजयान्विते ॥ कृत्वोपवासं तिथ्यंते तदा कुर्याच्च पार
णं ॥ तिथ्यर्क्षयोर्यदा छेदो नक्षत्रांतमथापि वा ॥ अर्धरात्रे तथा कुर्यात्पार
णं त्वपरेऽहनि ॥ श्रौतकर्मविहीनाश्च कुर्युस्ते पारणं निशि ॥ निषिद्धं स्याद्य
ते रात्रोऽपरतः पारणं भवेत् ॥ एतत्संन्यासिविषयं दिवैव पारणं कुर्यु ॥
गृहस्थाः पतयोऽपि च ॥ मोहात्कुर्वंति ये रात्रौ जनंते सुःफलं च ते ॥ पारणं तिथि
भांते च कुर्यात्कस्य संक्षये ॥ अतोऽन्यथा पारणया व्रतभंगमवाप्नुयात् ॥ ८९ ॥
याः काश्चित्तिथयः प्रोक्ताः पुण्यनक्षत्रयोगतः ॥ ऋक्षांते पारणं कुर्याद्विना श्रा
वणरोहिणी ॥ तिथ्यंते चैव भांते च पारणं यत्र चोदितं ॥ तिथ्यर्क्षे रात्रिपर्य
ते स्यातां चेत्पारणं दिवा दिवा ॥ यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पार
णं तिथिर्यमित्रयाद्दर्वाक् तिथिभांते च पारणं ॥ २०० ॥ अथ गणेशच

तुर्थी ॥ भविष्योत्तरे ॥ मासि भाद्रपदे शुक्ले चतुर्थ्यामर्चयेन्नृप ॥ मृन्मयेन गणेश
स्वरूपं कृत्वा विधानतः ॥ नित्यकर्म समाप्यादौ कल्पोक्तविधिना ततः ॥ गंधपु
ष्पाक्षताभिश्चैव मध्याह्ने देवमर्चयेत् ॥ तथा च तत्कल्पे ॥ एकविंशद्दूर्गकवि
जुबदरीधत्तूरकेसर [illegible] पत्रा मार्कं हतो शाचकरवीरश्मातककीकु
ठुनी ॥ कांता दाडिमदेवदारुवेश्मी सिंधुवारं तथा राती गंडजपत्रिका हरस्कु
तस्याराधने सिद्धिदः ॥ प्रातः शुक्लतिलैः स्नात्वा सा मध्याह्ने देवमर्चयेत् ॥ स्व
शक्त्या गणनाथस्य सौवर्णीं रौप्यमेव च ॥ ३ ॥ चतुर्थी गणनाथस्य परविद्धा प्रश
स्यते। जयायुक्ता न कर्तव्या सर्वदा शुभकांक्षिभिः ॥ गणनाथचतुर्थी चेन्मध्याह्न
व्यापिनी यदि ॥ जयायुक्ता न कर्तव्या कर्तव्या परसंयुता ॥ प्रहरद्वयपर्य
ते चतुर्थी वर्तते यदि ॥ परविद्धैव कर्तव्या पूर्वविद्धां परित्यजेत् ॥ चतुर्थी ग
णनाथस्य संगवात्परेहनि ॥ यदि न स्यात्तदा पूर्वा कर्तव्या शुभकां
क्षिभिः ॥ संगवात्मध्याह्न इत्यर्थः ॥ अथ प्रसंगतो विनायकव्रतमपि ७३

कथ्यते ॥ मासं शुचिं समारभ्य यावद्वर्षं भवेन्नृप ॥ विनायकव्रतं कुर्याच्चतुर्थ्योप
दयोर्द्वयोः ॥ विनायकव्रते ग्राह्या तृतीयासहिता यदा ॥ चतुर्थी त्वन्यदेवस्य व्र
ते ग्राह्या परान्विता ॥ बृहस्पतिः ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनि ॥ १० ॥ मातृविद्धा प्रशस्तास्या
चतुर्थी सर्वदा शुभा ॥ मध्याह्नव्यापिनी न स्यान्नागविद्धा प्रशस्यते ॥ प्रसंगतः सं
कष्टचतुर्थ्यपि कथ्यते ॥ पुराणे ॥ शृणु राजन्प्रवक्ष्यामि मंत्रैरागमसंभवैः ॥
कृष्णपक्षे चतुर्थ्यां वै निशि चंद्रोदये नृप ॥ पौषधीनिःशुक्लतिलैर्दिवा स्ना
या प्रसन्नधीः ॥ कार्यसंकल्पमनसा ध्यात्वा देवं गणेश्वरं ॥ नित्यकर्म समा
प्यादौ निशि चंद्रोदये नृप ॥ तत्र पीठं गणेशस्य पूजयेत्कुसुमादिभिः ॥ विधू
दये यदा न स्याच्चतुर्थी संकष्टव्रते ॥ तृतीया संप्रदीता कार्या सर्वदा शुभ
कांक्षिभिः ॥ चंद्रोदये यदा न स्याद्यदि वापि दिनद्वये ॥ प्रदोषव्यापिनी ग्रा
ह्या चतुर्थी संकष्टव्रते ॥ २६ ॥ दिनद्वयेपि वर्तेत चतुर्थी या विधूदये ॥ परे

व्रतिभिः कार्या गणनाथपरायणैः ॥ स्वयमीदृग्धं समारभ्य चतुर्थी यत्र वर्तते ॥
चंद्रस्योदयपर्यंतं सा भवेत्सर्वकामदा ॥ ॥अथ ऋषिपंचमी भविष्योत्तरे ॥
मासि भाद्रपदे शुक्ले पंचम्यां पूजयेन्मुनीन् ॥ प्रातर्नद्यादिषु स्नात्वा कश्य
पाद्यांश्च सप्त वै ॥ पंचमी सैव कर्तव्या षष्ठीयुक्ता च भारत ॥ ऋषयो ह्यत्र मुनि
भिः प्रोक्ता सर्वपापप्रणाशिनी ॥ २ ॥ मुहूर्तं द्वितयं वापि पंचमी यदि वा भवे
त् ॥ ऋषीणां पूजनं चैव कर्तव्यं व्रतिभिः परैः ॥ चतुर्थीसंयुतायां च पंचम्यां
मुनिपूजनं ॥ व्रतिभिर्न च कर्तव्या यदि चेन्निःफलं भवेत् ॥ ॥अथ दूर्वाष्टमी ॥
लिंगपुराणे ॥ शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् ॥ दूर्वाख्याष्टमी ज्ञेया
नोत्तरा सा विधीयते ॥ प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां च भारत ॥ दूर्वां भ
क्त्याऽर्चयेन्नित्यं ज्येष्ठां मूलं च वर्जयेत् ॥ या न पूजयेद्दूर्वां तां मोहादिह
यथाविधि ॥ त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ॥ तस्मात्संपूजनी
या सा प्रतिवर्षं विधूजनैः ॥ सुखसंतानजननी भर्तृसौख्यप्रदा सदा ॥

॥ मासि भाद्रपदे शुक्ले या भवेदष्टमी नृप ॥ दूर्वाष्टमीति विख्याता पूर्वविद्धा प्रशस्य
ते ॥ मुहूर्ते रोहिणी कृम्यां पूर्णा वा यदि वा परा ॥ ज्येष्ठाष्टमीति सा कार्या ज्येष्ठामूलं
च वर्जयेत् ॥ दूर्वाव्रतं किल त्वाष्टम्यामेव कार्यः ॥ ॥अथ ज्येष्ठाष्टमी ॥ कालादर्शे ॥ भा
द्रे शुक्लाष्टमी ज्येष्ठानक्षत्रेण समन्विता ॥ महती कीर्तिता तस्यां ज्येष्ठां देवीं प्र
पूजयेत् ॥ लिंगपुराणे ॥ कन्यार्के याष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ॥ ॥अलक्
ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत् ॥ ३ ॥ तत्र कश्चिद्विशेषः स्कांदे ॥ तत्राष्टम्यां
यदा भानोः वारे ज्येष्ठर्क्षमेव च ॥ नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिका ॥
मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुतां ॥ तस्मिन्नेव दिने कुर्यात् ज्येष्ठायाः परि
पूजनं ॥ मात्स्ये ॥ प्रत्यादिकं तथा युक्तं यज्ज्येष्ठादेवताव्रतं ॥ नीलज्येष्ठाख्यव्र
तं यच्च विहितं केवलोडुनि ॥ ३३ ॥ ज्योतिः ॥ मैत्रविद्धा सदा कार्या ज्येष्ठा कामप्र
दायिनी ॥ मूलविद्धा न कर्तव्या ज्येष्ठा कामविनाशिनी ॥ मूलविद्धाकृता ज्येष्ठा
पुत्रा दुर्योधनेन हि ॥ ॥प्रायुः क्षीणगताः सर्वे तस्मात्तां परिवर्जयेत् ॥ गार्गः ॥ ॥

॥ऽ॥र्द्धं वा गाव तेनाज्येष्ठदिने यस्मिन् समाप्यते ॥ मूलविद्धा निषिद्धा
सा तदूर्ध्वं चेच्छुभप्रदा ॥ स्क ॥ माधवीये ॥ यस्मिन् दिने नवे ज्येष्ठा मध्याह्ना
दूर्ध्वमप्यतु ॥ तस्मिन्नहनि पूज्या सा न्यूना चेत्पूर्ववासरे ॥ इति ज्येष्ठा दे
वी व्रत ॥ ऽ॥ अथ श्रवणद्वादशी ॥ सैव वामन जयंती तु च्यते ॥ कल्पे ॥ नभ
स्येशुक्लपक्षे तु द्वादश्यां श्रवणे तु नि ॥ वर्जेस्कं वंधनं कर्तुं मध्याह्ने वाम
नस्त्वभूत् ॥ जयंती वामनाख्या सा सेवोपोष्या नरोत्तमैः ॥ सर्वपापहरा
मंनी सर्वकामप्रदायिनी ॥ एकादश्यां भवेद्योगो द्वादश्यां श्रवणस्य च ॥
पूर्वाह्ने वापि मध्याह्ने सातीव महती स्मृता ॥ ४ ॥ पुराणसमुच्चये ॥ ॥
द्वादशी श्रवणर्क्षं च स्पृशेदेकादशी यदि ॥ स एव वैष्णवो योगो विष्णु
शृंखलसंज्ञकः ॥ तस्मिन्नेवोपवासेन नरः प्रक्षीणकल्मषः ॥ प्राप्नो
त्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभां ॥ ऽ॥ अथ केवलश्रवणद्वादशी ॥ ॥
माधवीये ॥ शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ॥ तयोरे

वोपवासस्तत्र योदश्यां तु पारणं ॥ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ॥
नचात्र विधिलोपस्यादुभयोर्देवतं हरिः ॥ ऽ॥ पासमाप्ते व्रते पूर्वेण कुर्या
द्व्रतांतरं ॥ एकदेवत मुद्दिश्य कर्तव्यं नान्यथा क्वचित् ॥ द्वादश्यां तु भवेद्योगः
श्रवणस्य दिवैव हि ॥ तदोपवासः कर्तव्यो वैष्णवैः सर्वदापि च ॥ ऽ॥ नारदी
ये ॥ हेमाद्रौ ॥ स्कांदे तु ॥ उत्तराषाढसंमिश्रा श्रोणा मध्याह्नगापि वा ॥ ऽ॥ पासूरी
चैव तारास्या हंति पुण्यपुराकृतं ॥ उदयव्यापिनी ग्राह्या श्रोणा द्वादशी संयुता ॥
विष्णुर्क्षसंयुता सा नोपोष्या मुनिभिः ॥ बृहन्नारदीये ॥ ४५ ॥ उदयव्या
पिनी कुर्याच्छ्रवणा द्वादशी तदा ॥ ऽ॥ पाचार्याः ॥ केचिदिच्छंति केचिन्नेच्छंति चापरे ॥
कुर्ते तत्रये वापि संगवांत मध्याह्ने वा ॥ श्रवणद्वादशी चैव संगवे च भवत्वि
ते ॥ श्रवणद्वादशी सा त्वाउपोष्या विष्णुतत्परैः ॥ कालनिर्णये ॥ उत्तराविति
श्रितः श्रोणा नैवोपोष्या व्रतानवेत् ॥ नापि मध्याह्नगो न्यूना संचताह्निभवेद्य

दि॥ स्मृत्यर्थसारे॥ उत्तरावेधरहितः श्रवणद्वादशीयुतः॥ व्याप्नोति

दि॥ स्मृत्यर्थसारे॥ उत्तरावेधरहितः श्रवणद्वादशीयुतः॥ व्याप्नोति यदि मध्या
ह्नं कुर्यात्तस्यामुपोषणं॥ काव्यादर्शे॥ अभिजिन्नक्तिसंयुक्तः श्रोणद्वयदि
वा न वेत॥ सूर्योदये यदा सोपि नोपोष्या विष्णुतत्परैः॥ अभिजिन्नक्तिसंयुक्ता श्रवणद्वा
दशी तिथिः॥ सूर्योदये यदा सा तु नोपोष्या विष्णुतत्परैः॥ अथानंतचतुर्दशी॥ पौराणी॥
मासि भाद्रपदे शुक्ल चतुर्दश्यां द्विजोत्तमः॥ अनंतं पूजयेन्नित्यं दानं दद्याच्च शक्तितः॥
तत्कल्पे॥ शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे शुभे॥ तस्यानुष्ठानमात्रेण सर्वपापैः प्रमु
च्यते॥ प०॥ जयायुक्ता न कर्त्तव्या ह्यनंतस्य चतुर्दशी॥ पूर्णयुक्ता कर्त्तव्या सर्वदा शु
क्लितिथिः॥ स्कांदे॥ जयायोगेन यः कुर्यादित्तायां पूजनं हरेः॥ वर्षवृंजाफलं तस्यवा
फले यायगच्छति॥ विश्वरूपे॥ मध्याह्नव्यापिनी या च भाद्रे शुक्लचतुर्दशी॥ सेवानं
तव्रते ग्राह्या पूर्णयुक्ता विशेषतः॥ मध्याह्नव्यापिनीति मध्याह्नादर्वाक्समापनी
येत्यर्थः॥ स्कांदे॥ उदये त्रिमुहूर्तापि ग्राह्यानंतव्रते तिथिः॥ परविद्धैव कर्त्तव्या पूर्व
विद्धा न कर्हिचित्॥ अतो मुहूर्त्तमात्रापि पूर्णिमायां चतुर्दशी॥ तस्यामनंतचीनं

कुर्याद्दानं तत्सविशेषतः ॥ ॥अथ बृहद्गौरीतृतीया ॥ भाद्रासिततृतीयायां विधूदये सति
तैका ॥ सुस्नाता चाशतो नारी बृहद्गौरीं समर्चयेत् ॥ बृहद्गौरीव्रते ग्राह्या तृतीया द्वि
तीयान्विता ॥ चतुर्थीसहिता कार्या तृतीयान्यव्रतेषु च ॥ चंद्रोदये यदा न सा तृतीयाय
द्विचेत्परा ॥ पूर्वविद्धा तदा कार्या यदि स्याद्दर्शने विधोः ॥ दिनद्वयेपि चेन्न स्यात्तृतीया
चेंदुदर्शने ॥ परविद्धैव कर्त्तव्या पूर्वविद्धां परित्यजेत् ॥ चंद्रोदये तृतीया चेद्दिनद्वयेपि व
र्त्तते ॥ तदा पूर्वां परित्यज्य कर्त्तव्या परसंयुता ॥ ६१ ॥ ॥अथ कपिलाषष्ठी ॥ भाद्रमासस्यासि
ते पक्षे भानौ चैव करस्थिते ॥ पाते कुजे च रोहिण्यां सा षष्ठी कपिला मता ॥ दिवै
व योगः शस्तोयं सूर्यपर्वशताधिकः ॥ योगस्याद्यदि चेद्रात्रौ चंद्रषष्ठीति सा स्मृता ॥
६२ ॥ इति श्रीनारायणभट्टविरचिते धर्मप्रवृत्तौ चैत्रादिषण्मासतिथिनिर्णयः ॥
॥अथाश्विनप्रतिपन्निर्णीयते ॥ विश्वरूपनिबंधे ॥ कलशस्थापनं कुर्यान्नंदायामा
श्विने सिते ॥ पूजयेद्भक्तिभावेन चंडिकां भक्तिवत्सलां ॥ मत्स्यपुराणे ॥ प्रतिप
द्याश्विने कार्यं नवरात्रं क्रमात्ततः ॥ कुहूयुक्ता सदा त्याज्या नारायेच्च कुलमतः ॥
न च दर्शकलाप्राप्तिः प्रतिपच्चंडिकार्चने ॥ उदये द्विमुहूर्त्तापि ग्राह्या चैव परेहनि ॥ १७७

॥अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम ॥ मुहूर्त्तमिश्रकर्त्तव्या द्वितीयासंयुता सदा ॥
वर्जनीया प्रयत्नेन ह्यमायुक्ता तु पार्थिव ॥ द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वदा शुभा
भा ॥ ॥अमायुक्ता न कर्त्तव्या कर्त्तव्या परसंयुता ॥ स्वल्पामपि प्रतिग्राह्या चित्रावैध
तिवर्जिता ॥ चित्रावैधृतियोगस्तु नवेद्यामत्रयं यदि ॥ प्रातरेव तदा कार्या नवरा
त्रं सदा बुधैः ॥ द्वितीयदिने प्रतिपन्मुहूर्त्तद्वयं त्रयं वा स्याच्चित्रावैधृतिश्च याम
त्रयं यदि न्वे तदा प्रतिपद्येव प्रातः कर्त्तव्यं नवमायां ॥ नारायेच्च कुर्यात इति दे
वप्रवणात् ॥ ७० ॥ तथा च वैधृतिश्च तथा चित्रा समग्रा प्रतिपद्यदि ॥ प्रभाते प्रति
पन्नास्ति तदा कार्यं तथैव तु ॥ चित्रावैधृतियुक्ता चेत्प्रतिपद्द्वितीयान्विता ॥ तत्रैव
पूजनं देव्याः कर्त्तव्यं शुभकांक्षिभिः ॥ तुल्या चेत्प्रतिपच्चित्रावैधृतिश्चापि वा य
दि कलशस्थापनं कुर्यात्प्रतिपद्येव वै दिवा ॥ स्वल्पा च वैधृतिश्चित्रा प्रतिपच्चा
धिका यदि ॥ कलशस्थापनं कुर्याद्विहाय चैत्रां च वैधृतिं ॥ रवेरस्तमयाद्वा
क् विधिरेष उदाहृतः ॥ नो चेद्दिवैव कुर्वीत कलशस्थापनं बुधैः ॥ प्रतिपत्
स्वल्पमल्पा च यदि न स्यात्परेहनि ॥ ॥अमायुक्ता तदा कार्या त्पक्षा षोडशाना

ड्रिका॥ घटिकाःषोडशाःस्याज्याःपादाःप्रतिपदस्त्रयाः॥ कलशस्थापनं कुर्याद
उजायते ध्रुवं॥ पूर्वतो विद्यमानं तु नवरात्रस्य पूजनं॥ नंदायामेव कर्तव्यं
न चान्यत्र कदाचन॥ नास्ति पूजा कुलेयस्य शक्तेः शारदिकस्य चित्॥ कर्तुनी
तत्निकी पूजा उद्यतो नाश्नि[illegible]मानर॥ ८॥ चित्रां वैधृतियुक्तां च दर्शयुक्तामं
पि त्यजेत्॥ शुद्धिने पूजनं देव्याः कुर्यान्न तत्र पूजकः॥ कुर्यात्समाप्तिष्टम्यां
प्रतिपद्वर्धते यदि॥ हीयते मायुतायां वै नवरात्रं न नवेत्तदा॥ इत्याश्विनप्र
तिपन्निर्णयः॥ अथाश्विननवरात्रविधिः॥ प्रारब्धं सूतकं चेत्स्यान्नवरात्रं
कथं न वेत्॥ विश्वरूपे॥ आश्विनस्यासिते पक्षे प्रारब्धे नवरात्रिके॥
यदि स्यात्सूतकं तत्र क्रियाः कार्याः कथं बुधैः॥ सूतकं वर्त्तमानं च तत्रोत्पन्नं
यदा नवेत्॥ देवीपूजा प्रकर्तव्या मंत्रैर्यज्ञविधानतः॥ सूतके पूजनं प्रोक्तं दा
नं चैव विशेषतः॥ देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते॥ प्रारंभात्प्राक्
समारब्धं यदि चेत्सूतकं नवेत्॥ [illegible]डिकाप्तजनं तत्र कथं स्यादिति संश

यः॥ कारयितव्यमन्येन देव्याः पूजादिकं च यत्॥ न त्यजेत्पूजनं देव्याः कारयेद
ग्निहोत्रवत्॥ अथ विधिरभिधीयते॥ दुर्गार्चने॥ प्रातरभ्यजनं दायां कृत्वा स्व
स्त्याहवाचनं॥ संविज्ञो वेदसंपन्नान् कृत्वा देवीं प्रपूजयेत्॥ संविकल्पस्तो ततो
दद्यादितु क्ता सा दक्षिफलं॥ मयाकर्मणि पुष्पक्तां ते तत्तु क्ता नवमेकृतो॥
स्तोत्रं देव्यास्तथास्त कं दुर्गाख्यं मंत्रमेवच॥ सूक्तं वाथ श्रियो मंत्रं मसुंज
या स्वयमेव च॥ २॥ अपादित्यादिग्रहाणां च गणेशादेस्तथा जयः॥ यजे
मं अत्रान्यथा शक्त्या कारये[illegible]पवाद्विजे॥ कर्तव्यः कारयितव्यो जपेन्मंत्रा
दिकाश्च वै॥ स्वेनैव ब्राह्मणैर्वापि वैकैकः कोटिरुच्यते॥ त्रिकालं पूजयेद्दे
वीं जपस्तोत्रपरायणः॥ कुमारीश्च तथा विप्रान्भोजयेत्प्रतिवासरं॥ ३॥
एकैकं पूजयेत्कन्यामेकावृत्त्या तथैव च॥ द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं च या॥
एकवर्षा तु या कन्या पूजार्थं तां परित्यजेत्॥ गंधपुष्पफलादीनां प्रीतिस्तस्या
निवेद्यते॥ द्विवर्षकन्यामारभ्य दशाब्दवर्षविधिक्रमात्॥ पूजयेत्सर्वकार्येषु

१७५ तथा विष्णुतमार्गतः ॥६॥ एवमावाहनासनैः पाद्यैः वस्त्रगंधाद्युतादिभिः ॥ धूपदीप
फलैश्चैव तांबूलैः प्रतिवासरं ॥ यावन्नोदाससमारभ्य नवमी महती नवेत् ॥ ताव
देव हि कर्त्तव्या जपपूजादिभिः क्रमात् ॥ इति नवरात्रविधिः ॥ अथ नवमी
सूर्योदयनिर्णयः ॥ अश्वयुक्शुक्लनवमी ह्यष्टमी मूलसंयुता ॥ सा महानवमी तस्यां
जगन्मातरमर्चयेत् ॥ तथा च स्मृतिचंद्रिकायां ॥ शुक्लाष्टम्याश्विने मासि या
मूलर्क्षसंयुता ॥ सा महानवमी प्रोक्ता सापि चात्यंतदुर्लभा ॥ नवम्या
वर्तते ग्राह्या पूर्वतः परतोपि वा ॥ यथा प्रतिपदादीस्यान्नवदुर्गार्चने दि ॥
विधिना नवदुर्गाश्च क्रमात् प्रतिपदादिषु ॥ तिथिर्भावर्तनाद्यासु नवम्यां ता
सुपूजयेत् ॥ तिथिप्रयुक्ता पूजा वा तिथि यावर्त्तते नाम्ह हि ॥ सा च पूर्वा तिथिः प्रोक्ता
समंतात् पूर्ववासरे ॥ एवं तिनेद्वये तत्रातिथिरेका न वेद्यदि ॥ सा तिथिः परतो ग्रा
ह्या पूर्वेह्न्यस्तवानवा ॥ नवम्यां तु जपं होमं समाप्य विधिवद्बलिं ॥ अन्यथा कु
रुते यस्तु पुत्रदारधनक्षयः ॥ सूर्योदये परं रिक्ता पूर्णा स्याद्परा यदि ॥ बलि
दानं प्रकर्त्तव्यं तत्र दशः श्रीनाथः ॥१६॥ षष्ठ्यामुदिते सूर्ये दिनाते नवमी १७५

नवेत् ॥ तत्रातेबलिदाने च किंचिन्मात्रापि लभ्यते ॥ दुर्गार्णवे ॥ आश्विनस्यासिते
पक्षे नवमी याष्टमीयुता ॥ सा ग्राह्या पूजने देव्या होमे ग्राह्यापरान्विता ॥ नवम्यां
पूर्वविद्धायां होमं यः कुरुते यदि ॥ वित्तापत्यकलत्रादि नाशयेत् कुलं यतः ॥ सू
र्योदये यदा न स्यान्नवमी चापरेहनि ॥ तदाष्टम्यां युता कार्या नवमी नरतर्षभ ॥
॥ संगवे यदि वर्त्तेत नवमी चापरेहनि ॥ होमं तत्र प्रकुर्वीत बलिदानादिकं च
यत् ॥ तथा चार्णवे ॥ मुहूर्त्तादनुवर्तेत नवमी यदि चेत्परा ॥ प्रारभ्य पररात्रे तु
होमं तत्र समापयेत् ॥ कुंकुमाक्तेन वान्येन बलिं दद्याद्विचक्षणः ॥ पूर्वोक्ता
दिकं सर्वं सुतत्तन्मंत्रेणैवैक्रमात् ॥ ब्राह्मणान्पूजयेत्तत्र वस्त्रालंकारभूष
णैः ॥ स्वलिन्या दक्षिणां दद्याच्छ्रेयः संपादयेत्ततः ॥ संपूज्य देवतां सम्यक् कु
मारीश्च सुवासिनी ॥ पूजयेद्गंधपुष्पैश्च वस्त्रालंकारकंचुकैः ॥ श्रेयः फलं स
मासाद्य देव्याः पुरतः स्थितः ॥ कृतं दत्तं च यद्देव्यैः तत्सर्वं विनिवेदयेत् ॥२६॥
यजमानं सपत्नीकं सुतनातसमन्वितं ॥ कलशस्योदकेनैव माजर्येत्च्युतपल्ल
वैः ॥ ब्राह्मणाः पातिर्षिंचेयुर्वेदमंत्रैर्यथाविधि ॥ कुमारी ब्राह्मणांश्चैव भोजयेत्सु

वासिनी॥ दीनांध कृपणा दीक्षन्तुं जीयात्सह वंधुभिः॥ इत्थं यः कुरुते मर्त्यः पूजां
प्रतिवत्सरं॥ यं यं कामयते कामा देवी तस्मै प्रयच्छती॥ तस्मात्सर्वप्रयत्नेन पूजनी
या महर्षिभिः॥ ३२॥ इति श्री नारायण धर्म नवरात्र प्रकरणं॥ अथ विजयाद
शमी॥ आश्विने दशमी शुक्ला श्रवणेन समन्विता॥ विजया दशमी प्रोक्ता स
वैवात्यंत दुर्लभा॥ ज्योतिःसारे॥ आश्विनस्यासिते पक्षे दशम्यां तारको
दये॥ स कालो विजयो ज्ञेयः सर्वकामार्थसिद्धये॥ ईषत्संध्यामति
क्रांतः किंचिदुद्भिन्नतारकः॥ विजयो नाम कालोयं सर्वकामार्थसाधकः॥
२३॥ आश्विनस्यासिते पक्षे दशम्यां सर्वरात्रिषु॥ सायंकालेस्तु नाया
त्रा दिवा वा विजया दशे॥ एकादशो विजयो मुहूर्तः॥ तथा च स्मृत्यंतरे॥
दशम्यां तु नरैः सम्यक् पूजनीयापराजिता॥ ऐशानीं दिशमाश्रित्य अ
पराह्ने प्रयत्नतः॥ सायंकाले यदा न स्याद्दशमी चापरेहनि॥ नवमी
संयुता कार्या सर्वदा जयकांक्षिभिः॥ नवमीशेषसंयुक्ता दशम्यां विज

योत्सवं॥ कुरु राम महाबाहो त्युक्तं वसिष्ठेन महात्मना॥ नवमीयुतायां दशम्यां
प्रस्थानं कार्यं॥ ज्योतिः॥ या पूर्णा नवमीयुक्ता तस्यां पूज्यापराजिता॥ क्षेमार्थं विज
यार्थं च प्रयाणं विधिना नरैः॥ आश्विने शुक्लपक्षे तु दशम्यां प्रजयेन्नरः॥ एका
दश्यां न कुर्वीत पूजनं चापराजितं॥ स्कांदे॥ दशमीमसमुल्लंघ्य प्रस्थाने कु
रुते नरः॥ तस्य संवत्सरं राज्येन कोपि विजयो भवेत्॥ दशमीमभ्यर्च्य नवे
शं यात्रा निर्विघ्नसिद्धये॥ वारुश्चेतालावचेद्दिकु प्रस्थानमाचरेत्॥ प्रस्था
नविषय एवोक्तं॥ उत्सवादिकं परविद्धायामेव कार्यं॥ तदुक्तं पुराणसमुच्च
ये॥ इत्यस्य दशमी शुक्ला पूर्वविद्धा परित्यजेत्॥ श्रवणेनापि संयुक्ता राज्ञां
पट्टाभिषेचने॥ तथा च स्कांदे॥ एकादश्यायुतायां तु दशम्यामुत्सवादिकं॥
शुक्लायामाश्विने मासि कुरुते भरतर्षभ॥ सूर्योदये यदा राजन्दृश्यते द
शमी तिथिः॥ आश्विने मासि शुक्ला तु विजया तां विदुर्बुधाः॥ मार्तंडस्योदये पु
ण्या वर्तते दशमी तिथिः॥ आश्विने शुक्लपक्षे तु सा नवे जयदा नृणां॥ ४६॥ नि

षिदर्थे च कर्त्तव्यं तैलाभ्यंजनमादरात्॥ अथाप्यनामपि कर्त्तव्यं तैलस्नानं नदीज
लैः॥ इति श्रीधर्म० विजयादशमीनिर्णयः॥ अथ दीपमालि ॥ भविष्योत्तरे॥
अथाश्विनस्यासिते पक्षे चतुर्दश्यामरुणोदये॥ स्नातव्यं तिलतैलेन नने ने
नैरकभीरुभिः॥ विधूदये यदा नस्यादिषासितचतुर्दशी॥ जयान्विताया
रिक्तायां नरः स्नायाद्विधूदये॥ त्रयोदशीयुतायां च चतुर्दश्यामिषासि
ते॥ विधूदये नरः स्नायान्नरकं नैव पश्यति॥५०॥ विधूदये चतुर्दश्या
मेवं यदि चतुर्दशी॥ नारकीति च सा प्रोक्ता चाश्विनस्यासिते बुधैः॥ स्ना
तव्यं तिलतैलेन नारक्यां वै नरोत्तमैः॥ मुमुक्षुभिः सकामैश्च सर्वैरपि म
हामुने॥ इंदुक्षयेपि संक्रांतौ वारे पाते दिनक्षये॥ तत्राभ्यंगमदोषाय प्रा
तः पापापनुत्तये॥५१॥ अपामार्गमथो मध्ये शिखायां कुर्याद्यमतर्पणं॥ नरका
रय प्रदातव्यो दीपः संपूज्य देवताः॥ ईशासितचतुर्दश्यां मिंडुक्षयतिथा
वपि॥ कुजादौ स्वातिसंयुक्ता तदा दीपावली भवेत्॥ तैले लक्ष्मीर्जलेगं १८९

गा दीपावल्यां तथा वसेत्॥ अथामायामाश्विने मासि पितृकर्म विधाय च॥ दी
पदानं ततः कुर्यात्प्रदोषे च ततोल्मुकं॥ नारीजनं द्वितीयेह्नि प्रातःकाले
विधियते॥ तत्रैव विधिना कार्यं सुरस्त्रीणां च पूजनं॥ प्रतिपत्परवि
द्धायात्याज्या सा पूजने गवां॥ नारीजनोत्सवाभ्यंगदर्शविद्धां परित्यजेत्॥
दर्शविद्धा गृहीतव्या प्रतिपत्पूजने गवां॥ परविद्धा प्रशस्तास्याद्दभ्यंगादि
महोत्सवे॥ नंदायामुदये भ्यंगे कृत्वा नीराजनं ततः॥ सायंकालेपि कर्त्तव्या
स्त्रीभिर्मंगलमालिका॥ ६०॥ मुहूर्त्तं वर्त्तते दर्शो मांगल्यं तद्दिने भवेत्॥ वि
त्तापत्यकलत्रादि तत्सर्वं नश्यते ध्रुवं॥ अथ चेत्प्रतिपत्स्वल्पा भवेद्यदि
परेहनि॥ द्वितीयायां तदा कार्या सायं मंगलमालिका॥ मुहूर्त्तमपि वर्त्तेत प्र
तिपत् कार्त्तिके तथा॥ उत्सवादिषु कृत्येषु कर्त्तव्या शुभकांक्षिभिः॥ प्रतिपत्
स्वल्पमात्रापि यस्मिन्दिने स्यात्परेहनि॥ पूर्वविद्धा तदा कार्या सीतपक्षे च का
र्त्तिके॥ यस्मिन्नेव दिने स्वातौ तस्मिन्नेव दिने कुवे॥ स्वातिप्रयुक्तमभ्यंगं

कर्त्तव्यं शुभकांक्षिभिः ॥ स्वात्यादौ मंगलं स्नानं कर्त्तव्यं मंगलप्रदं ॥ मध्येतु
मध्यफलदं मंते स्यादशुभं सदा ॥ ६६ ॥ अभ्यंगं येन कुर्वंति यदि स्वातिनि
मित्तकं ॥ नमांगल्यं भवेत्तेषां यावत्स्याद्वत्सरं ध्रुवं ॥ दीपावलीति संज्ञा
स्यं भूतादित्रिदिनं क्रमात् ॥ द्विजातिभ्यो भवेद्दत्तं सर्वं तत्राक्षयं भवे
त् ॥ तथाच भारते ॥ याहर्षेण च भावेन तिष्टं तस्यां युधिष्टरः ॥ हर्षदैन्यादि
रूपेण तद्वर्षप्रतिभाति हि ॥ अथ स्कंदषष्टी ॥ उपोष्य पंचमी शुक्लां मार्गशी
र्षे नराधिप ॥ जयंतीति हि येषष्ठ्यां शिवलोकं व्रजंति ते ॥ ७० ॥ स्कंदोपवासे
स्वीकार्या पंचमीपरसंयुता ॥ चतुर्थी संयुता याच कर्त्तव्या न कदाचन ॥
मार्गशीर्षसिते पक्षे कर्त्तव्या स्कंदपूजने ॥ त्रिमुहूर्त्ताय दाषष्टी परासैवा
न्यथा पुरा ॥ स्कंदषष्टी तु कर्त्तव्या पंचम्या सहिता बुधैः ॥ उपवासे पुराप्रो
क्ता परा स्कंदस्य पूजने ॥ सप्तम्या सहितायां तु षष्ठ्यां स्कंदस्य पूजने ॥ पा
रणं तत्र कर्त्तव्यं ब्राह्मणैः सह बंधुभिः ॥ तथाच स्कंदे ॥ मार्गशीर्षेतु

याशुक्ला तु षष्ठ्यंक सिततारकाः ॥ चंपाख्या स्कंदषष्टी च स्यादुत्तरा पापनाशि
नी ॥ ७६ ॥ अथ भाद्रशुक्लषष्ठ्यां तु स्कंदं काश्चित्प्रपूजयेत् ॥ अथ रथसप्तमी ॥
माघमासे सिते पक्षे सप्तम्यां मीस्याद्रथस्य तु ॥ तत्र स्नानं च दानं च तत्सर्व
मक्षयं भवेत् ॥ सप्तमी माघमासस्य शुक्ला याष्टमी संयुता ॥ मुहूर्त्तमपि कर्त्तव्या
स्नान दान व्रतादिषु ॥ माघस्य शुक्लपक्षे तु सप्तमी यात्रिलोचना ॥ जयंती नाम सा
प्रोक्ता सर्वपापहरा तिथिः ॥ स्मृतिचंद्रिकायां ॥ सूर्यग्रहण तुल्या तु शुक्ला मा
घस्य सप्तमी ॥ अरुणोदयवेलायां तत्र स्नानं महाफलं ॥ तथाच स्कांदे ॥
रविवारेण युक्तायां सप्तम्यामरुणोदये ॥ पुण्यक्षेत्रे सिते माघे भास्करं यस्तु
पूजयेत् ॥ नरोगान्नभयं तस्य नास्य मृत्युर्नचापदः ॥ सर्वान्कामानवाप्नो
ति सूर्यलोकं सगच्छति ॥ अथ शिवरात्रिप्रसूयते पौराणे ॥ कृष्णपक्षे
भवेद्यानु माघमासे चतुर्दशी ॥ शिवरात्रिरिति प्रोक्ता महापातकनाशि ति २
नी ॥ यद्यर्धरात्रपर्यंतं न वे छिव चतुर्दशी ॥ त्रयोदश्यायुताकार्या निशेः

शिवपरायणैः। तथा च स्कांदे॥ नवेश्यदि त्रयोदश्यां भूतव्याप्ता महानिशि॥ शि
वरात्रिव्रतं तत्र कुर्याज्जागरणं निशि॥ ९॥ दिनद्वये पूर्वरात्रेर्वर्ततेचेच्चतुर्दशी॥
परैव सा प्रकर्तव्या न च पूर्वा कदाचन॥ दिनद्वये यदा न स्यान्मध्यरात्रे चतुर्दशी॥
तदा पूर्वां परित्यज्य कर्तव्या सा नरैः परा॥ इति शिवरात्रिविधिः॥ अथ मासशिव
रात्रिः॥ प्रतिमासेपि कर्तव्या कृष्णपक्षे चतुर्दशी॥ प्रदोषव्यापिनी चैव पूर्वा वा
यदि वा परा॥ शिवपुराणे॥ प्रदोषव्यापिनी ग्राह्या शिवरात्रिः शिवः प्रियैः॥ रात्रौ जा
गरणं यस्मात्तस्मात्तां समुपोषयेत्॥ ५॥ त्रयोदश्यास्तगे सूर्ये चतसृष्वेव ना
डिषु॥ भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत्॥ प्रदोषव्यापिनी ग्राह्या मासि
की चा चतुर्दशी॥ शिवरात्रिव्रते पूर्वा कर्तव्या सा परा स्य तु॥ अथ प्रदोषलक्ष
णं॥ ज्योतिः॥ त्रिमुहूर्तं प्रदोषस्याद्रवावस्तंगते सति॥ महानिशा निशीथं च मध्य
स्थं घटिकाद्वयं॥ अथ होलिका॥ भविष्योत्तरे॥ तपस्ये पौर्णिमास्यां तु रजन्यां
होलिकोत्सवः॥ कर्तव्या न दिवा विष्टौ रिक्तायां प्रतिपद्यपि॥ नारदः॥ प्रतिपद्भू

इति पूर्णासंधिर्यद्यपराह्ने स्याद्यागः प्रातः परेहनि॥ कुर्वाणः प्रतिपद्धोमं कर्तुर्येपि
न दुष्यति॥ अपराह्नाधवा रात्रौ यदि पर्व समाप्यते॥ उपोष्या तत्र पूर्वेद्युस्तदहर्याग इ
ष्यते॥ उपोष्येति अन्वाधानं कार्यमित्यर्थः॥ माधवीये॥ षोडशाहन्यतिक्रान्ते मध्या
पंचदशेहनि॥ चतुर्दशजपेन्नेष्टि पापसप्तदशेहनि॥ इति स्थालीपाकः॥ अथ
अमावास्या॥ तत्रेदं सूत्रं॥ अमावास्यायामपराह्ने पिंडपितृयज्ञो दक्षिणाग्रेरे
काल्मुकमिति॥ पूर्वाह्नो देवानां मध्यंदिनो मनुष्याणां अपराह्णः पितॄणामिति॥
ऽपाहिताग्नेर्विषय एव भागत्रयमुक्तं॥ तथा च स्मृतिः॥ दर्शश्रोक्तास्त्रयो भागाः साहि
ताग्नेस्तु सर्वदा॥ पिंडान्वाहार्यकं कुर्यादित्येवं मनुरब्रवीत्॥ तथा च कालनिर्ण
ये॥ दर्शश्राद्धविधिस्त्रिधा शिवदिनांत्यांशोपराह्नेचरेन्नित्यं यद्युभयेद्युरेष
विहितः॥ सर्वापराह्णस्थितिः॥ दर्शोपि द्व्यहगोपराह्णजनवयुक् चेत्स्यात्तदाद्यः
द्वयेवक्षयेवृद्धेतु प्रथमेह्नि बह्वृचगणैर्ग्राह्यास्तथाध्वर्युभिः॥ १२॥ चंद्रोदयेस्तमय
चेत्समेतदुदितं साग्नेर्निरग्निर्द्विजस्त्रीशूद्राः कुर्युपेस्थितेवितनुयुर्दर्शस्थि
तं पार्वणं॥ द्वैधे त्वर्थकतुपस्समग्रमपि वा योन्वेत्य सा विष्यते। दर्शश्राद्धदिने

तनशास्कृयाच्चितारोलिकादिवा ॥ संवत्सरं च तत्राब्दंपुरं इतिचसाधुतं ॥ कालवि
वेके ॥ ग्रहरवयात्परतः फाल्गुनीकुलनवेतिथिः ॥ नडामुखपरित्यज्य का
यी हो लामनीषिभिः ॥ चतुर्दशीं ग्रहरवयत्र याद्दधे वापूर्णिमासस्या तद्विरो
धो । भविष्योत्तरे ॥ सार्धयामत्रयं वास्याद्द्वितीयदिवसे यदा । प्रतिपद्वर्ध
माना हितदा सा तौलिका स्मृता ॥ अथ स्थालीपाकः ॥ कारिका ॥ ग्रहप्रवे
शात्तौ माघापौर्णिमास्यां गमिष्यते ॥ तस्यां तां चारभेते निर्णीतिकारेण भाषितं ॥
सद्यः कालो नवेद्यत्रापौर्णिमासस्तु पार्वणः ॥ स्थालीपाकस्तु कर्तव्य
स्तत्रैवश्रुतिनोदनात् ॥ २१०० सद्यःकालवर्जनाणं ॥ स्मृतिनाम ॥ सं
धिश्चे संगवाद्दूर्ध्वं प्राक्चेदावर्तनाद्रवेः ॥ सा पौर्णिमासी विज्ञेया सद्यः कालो
नवेतिथिः ॥ वृद्धौ हीये कथं तिथेः परस्याघटिकास्तु या ॥ स्युर्न्यूना सन्धेर्वाप्यधि
कास्तु तासां ॥ अथो वियोज्योऽतथाप्रयोज्यंद्वासे प्रथमे दिने तु तत् ॥ पर्वणो यश्च
तुर्थांशः पाद्याः प्रतिपदि दास्त्रयः ॥ यागकालः ॥ स विज्ञेयो प्रातस्तुक्तो मनीषिभिः ॥

द्वयेपिकुतपं नान्वेत्यसावादितः ॥ अपनाहिताग्न्यादिपंचधाविभागोपि न दृश्यते ॥ तत्र स्मृ
तिः ॥ प्रत्याब्दिके तथा दर्शे पिंचधा दिनसः स्मृतः ॥ द्विजानामेव सर्वेषामिति प्राहुर्मनीषि
णः ॥ कालादर्शे ॥ दर्शे यत्रापराह्णस्पर्शाति सद्दिवसः श्राद्धकालं दवोपि यत्रानस्यो
पदासो यदि नवति समः ॥ हीयमाणे तु पूर्वः स्याद्वृद्धौ साम्ये प्पनग्ने युनाति ह्वस्त यो
श्चश्च एवाहिताग्नेः ॥ पूर्वेन तापराह्णस्पर्शातिच कुतुपस्पर्शो तो यं विधी स्याद ॥
ह ॥ हारितः ॥ अपराह्णं पितॄणां तु यापराह्णानुगामिनी ॥ साग्राह्या पितृकृत्येषु न पू
१ भु वाह्णानुयायिनी ॥ श्रुंतविद्धाममावास्यामोहाद्दग्ना न तो पिवा ॥ श्राद्धकर्मण्येकु
र्युस्तेतमायुः प्रहीयते ॥ प्रतिपद्यप्यमावास्या नापराह्णगता नवेत ॥ भूतविद्धैव सा
ग्राह्या पितृकर्माणि सर्वदा ॥ भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापिवा ॥
पितृकर्माणि विद्वद्भिः ग्राह्या सेवापराह्णिकी ॥ २ ॥ इति अमावास्यानिर्ण
यः ॥ अथ प्रत्याब्दिकनिर्णयः ॥ तत्र स्मृतिः ॥ रवेरुदयमारभ्य सायं यास्पृशते
तिथिः ॥ सैव प्रत्याब्दिके ग्राह्या पूर्वा स्यादन्यथा विधिः ॥ तिथिर्यो द्दियमारभ्य

सायाह्ने यदि चेत्स्पृशेत् ॥ अत्परेद्युरेकैका चेति ग्राह्येति सूरश्रेष्ठ ॥ तथा च स्कांदे हिमा
॥से द्रौ ॥ सायंतन्यपतत्र येनस्तृतातिथिः सैवाधिके मासि केशा ह्यासौ ह्यपराह्णयार्य
दितदा तत्राधिमासात्ततः तुल्यासाङ्गव्यापराह्णसमये पूर्वा न चेत द्वयोः ॥ पू
र्वैवात्रिमुहूर्त्तमस्तसमये नो चेत्परो बोधिता ॥ अपरत्र ॥ उभयत्रापराह्णश्चेत्
भवेद्यत्राधिको ततः ॥ तुल्यावेद्भुभयत्रापि पूर्वानो चेत्परेव तु ॥ कुतुपाद्या
मुहूर्तान्स्त्रीन्यदा चरति भास्करः ॥ स कालः कुतुपस्तत्र पितॄणां दत्तमक्षयं ॥
त्रारभ्य कुतुपे श्राद्धं कुर्याद्रौहिणं बुधः ॥ विधिज्ञो विधिमास्थाय रौहिणं
तु न लंघयेत् ॥ २६ ॥ इत्यादिकनिर्णयः ॥ अथ महोदयनिर्णयः ॥ भविष्योत्तरे ॥
अमार्कश्रवणे पाते युक्ता चेत्पुष्यमाघयोः ॥ अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः स
मः ॥ दिनैव योगः शस्तोयं उषःकालेपि वा यदि ॥ नैव रात्रौ तु कर्त्तव्यं नरैर्धर्मपि
रायणैः ॥ स्कांदे ॥ अर्धोदये तु संप्राप्ते सर्वं गंगासमं जलं ॥ शुद्धात्मानो द्विजाः
सर्वे भवेयुर्ब्रह्मसंयुताः ॥ यत्किंचित्क्रियते दानं तद्दानं मेरुसन्निभं ॥ पितृमुद्दि १८५

श्य यद्दत्तं गयाश्राद्धसमं भवेत् ॥ चतुःषष्टिपलं ताम्रं मयं तत्र कारयेत् ॥
चत्वारिंशत्पलं वापि चतुर्विंशतिरेव वा ॥ निधाय पायसं तत्र पलमा
ष्टदलं लिखेत् ॥ अथ तस्य कर्णिकायां तु कर्षमात्रं सुवर्णकं ॥ २२ ॥ तदभावे त
दर्धं वा तदर्धं वापि कारयेत् ॥ कृत्वा तु तंडुलैः शुद्धैः पद्ममष्टदलं शुभं ॥ अथ मं
त्रे स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकं ॥ तेषां प्रीतिकरार्थाय श्वेतमाल्यैः सुशो
भनैः ॥ वस्त्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत् ॥ विप्राय वेदविदुषे श्रो
त्रियाय कुटुंबिने ॥ दानमंत्रः सुवर्णपायसामंत्रं यस्माद्दत्तं त्रयीमयं ॥
अपावयोस्तारणं यस्मात्तज्जह्मणाद्विजोत्तमः ॥ समुद्रमेखलां पृथ्वीं सम्यग्दत्वा स
यत्फलं ॥ तत्फलं लभते मर्त्यः कलाद्यां ममंत्रके ॥ इत्यर्धोदयः ॥ अथैकाद
शी ॥ भविष्योत्तरे ॥ आदित्योदयवेधस्तु स्मार्त्तानां कथितो बुधैः ॥ अरु
णोदयवेधस्तु स्मार्त्तानां कथितोपरैः ॥ सूर्योदयसमारभ्य परतः सूर्यद
र्शनं ॥ एकादशी भवेद्यातु संपूर्णा सा स्मृता बुधैः ॥ संपूर्णैकादशी यत्र प्र

भातेपुनरेवसा॥ सवैरिवोत्तराकार्यापरतो द्वादशीयदि॥ तदापूर्वेदिनं
त्याज्यंस्मार्त्तैर्ग्राह्यंपरंदिनं मितिकेचित्॥ भविष्योत्तरे॥ संपूर्णैकादशीयत्र
प्रभातेपुनरेवसा॥ लुप्यतेद्वादशीतस्मिन्नुपवासः कथंभवेत्॥ उपोष्ये
द्वेतिथीतस्मात्स्मार्त्तैरपिमुमुक्षिभिः॥ पारणंतुत्रयोदश्यांकेचिदाहुर्म
नीषिणः॥ ५२॥ व्याघ्रः॥ अथाहनिसंपूर्णायस्यादेकादशीयदि॥ द्वादशीच
यदातातदृश्यतेपुनरेवसा॥ त्रयोदश्यांक्रियन्त्स्मार्त्ताद्वादशीनंवेध न १
दि॥ पूर्वंग्राह्याग्रहस्थैस्तकयतिभिश्चोत्तरासदा॥ इतिकेचिदुक्तं॥ अपत्रा
पिविशेषंरोमाह॥ व्याघ्रः॥ संपूर्णैकादशीयानत्परतोपिविवर्धते॥ स्मा
र्त्तैरुपोष्यापूर्वैवद्वादशीपरतोपिचेत्॥ तथाचगालवः॥ संपूर्णैकाद
शीयत्रप्रभातेपुनरेवसा॥ द्वादशीपरतोपिस्यात्पूर्वामुपवसेद्गृही॥
गोभिलः॥ एकादशीव्रतंश्रेष्ठंषष्टीनाड्यात्मकंचयत्॥ स्मार्त्तैस्तदेवक १८६

र्त्तव्यंवृद्धौचाप्याहगोभिलः॥ पुनः॥ एकादश्यांद्वादश्यांवावृद्धैसत्यांषष्टिना
ड्यात्मकं॥ एकादशीव्रतंस्मार्त्तैरेवकर्त्तव्यमित्यर्थः॥ तथाचजाबालिः॥ ए
कादशीयदाषष्टीनाडिकास्यात्परेवसा॥ स्मार्त्तैःकार्यासदापूर्वाद्वादशीप
रतोपिचेत्॥ स्कंदे॥ संपूर्णैकादशीवृद्धिमुपेयाद्वादशीपुनः॥ दृश्यतेपिहि
पूर्वैवस्मार्त्तैःकार्यानचापरैः॥ गालवः॥ संपूर्णैकादशीकिंचिद्वादशीचपरे
त्यपि॥ स्मार्त्तैःपूर्वासपत्नीकैःकार्येतिभिरुत्तरा॥ तथाचव्याघ्रः॥ एकादशी थि १
द्वादशीचउभयंवर्धतेयदि॥ अपविद्धैकादशीकार्यागृहस्थैर्यतिभिःपरे॥ इति
सिद्धांतः॥ अथविद्धैकादशीकृत्वायान्नवेत्पुत्रवान्गृही॥ द्वादश्यांपारयेद्विवा
हरिवासरसंज्ञितं॥ ५१॥ अथविद्धैकादशीकर्त्तव्येतिकालनिर्णयः॥ द
शमीशेषसंयुक्तांह्युपोष्यैकादशींतदा॥ यदानस्यात्त्रयोदश्यांकलावाद्वाद
शीयदि॥ नचेदेकादशींपूर्वंद्वादशीपरतस्थितं॥ उपोष्यादशमीविद्धायदि
द्धेत्परमंपदं॥ गालवः॥ एकादश्युदयेकिंचित्परेद्वादशीनचेत्॥ युद्धाशुद्ध

१८७

मपि स्मार्त्तैः कर्त्तव्या दशमीयुता ॥ तथाचार्य्यैः ॥ एकादशी यदा वापि द्वादशी लुप्य
तेथवा ॥ दशम्यां संयुता कार्या महापातकनाशिनी ॥ ६ ॥ एकान्नेप्येतसक
ला द्वादशी भवेत् ॥ उपोष्या दशमी विद्धा ऋषिरुद्दालको ब्रवीत् ॥ पाद्मे ॥ द्वाद
श्याः प्रथमे पादो हरिवासरसंज्ञकः ॥ तदन्ते पारणं कुर्यादन्यथा दोषभाग्भवेत् ॥
॥ अथ वैष्णवैकादशी ॥ नारदीये ॥ उदयात्प्राग्यथा नाथ चतस्रो घटिकाः स्मृ
ताः ॥ अरुणोदयविद्धैव सा तां नोपवसेदिति ॥ अरुणोदयवेलायां दश
मी यदि दृश्यते ॥ सा विद्धैकादशी तत्र पापमूलमुपोषणे ॥ अरुणोदयकाले
तु दशमी नहि दृश्यते ॥ सैन शुद्धा तदा तु या तत्रैवोपवसेदिति ॥ पद्मपुरा
णे ॥ नवमी पञ्चमे कं तु दशमी परतो यदि ॥ उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु
पारणं ॥ ॥ अविद्धैकादशी यत्र संपूर्णा द्वादशी भवेत् ॥ त्रयोदश्यां कियन्मात्रा द्वा
दशी यदि वा भवेत् ॥ उपवासद्वयं कुर्याद्विष्णुभक्तो विशेषतः ॥ विष्णुपूजा १८७

रतैः कार्यं द्वादश्यामेव पारणं ॥ तथा च पद्मे ॥ दशमीवेधहीना चेत्परतो द्वादशीय
२८ दि ॥ उपवासद्वयं कुर्याद्विष्णुभक्तः परायणः ॥ एकादशीमुपोष्यापि द्वादशीं समुपो
षयेत् ॥ न तत्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥ ७ ॥ यदा न वेदती वाल्पा द्वा
दशी पारणादिने ॥ उषःकाले द्वयं कार्यं प्रातर्मध्याह्नमेव च ॥ अल्पायामपवि
द्धेऽद्वादश्यामरुणोदये ॥ स्नानार्चनक्रियाः सर्वाः दानहोमादिकाश्चये ॥
एतस्मात्कारणे विप्रः ऋत्पूर्षे स्नानमाचरेत् ॥ पितृतर्पणसंयुक्ता द्वादशी
स्यात्कला यदि ॥ यदा स्याद्द्वादशी स्वल्पा ह्यपकर्षो भुजेः तदा ॥ यदा स्वल्पा द्वा
दशी स्यादपकर्षो भुजे भवत् ॥ प्रातर्मध्याह्निकस्यापि तत्र स्यादपकर्षणं ॥
पंचपंच उषाकालः सप्तपंचारुणोदयः ॥ षष्ट पञ्चा भवेत्प्रातः शेषः सूर्यो
दयो भवेत् ॥ इत्येकादशी ॥ ॥ अथोपवासशक्तविषये ॥ उपवासे त्वशक्तानां
नारीतरुणजीविनं ॥ एकभक्तादिकं कार्यमिहा बौधायनो मुनिः ॥ ११ ॥ एकभक्ते
न नक्तेन जीर्णवृद्धातुराश्चहि ॥ नातिक्रमेयुर्वा दश्यामुपवासव्रते न च ॥ अस्मा

२ स्क

मर्थे शरीरस्य व्रतभंगो न जायते ॥ संप्राप्ते संकटे कार्यं द्वादश्यां मंत्रपूर्वकं ॥
अपाद्धि स्कं पारणकं कुर्यात्पुनर्भुंजन्न दुष्यति ॥ पत्नी पुत्रोथवा भ्राता कुर्याच्छिष्यो
थवा व्रतं ॥ एषामभावे एवान्यत्र ब्राह्मणं विनियोजयेत् ॥ अथाष्टौ महा
द्वादश्यो निर्णीयते ॥ तत्र तिथिप्रयुक्ताश्चत्वारः नक्षत्रप्रयुक्ताश्चेति ॥ पु
राणे च तत्र तिथियुक्ताश्च द्वादश्यः परिकीर्तिताः ॥ उन्मीलनी वंजुली
त्रिस्पृशा पक्षवर्धिनी ॥ तत्र महाद्वादशीति मुनिभिः पापनाशिनी ॥ पुनर्व
सुयुता याश्च श्रवणेन समन्विता ॥ पुष्यान्विता च महती रोहिणी द्वादशी
युता ॥ ८३ ॥ तथा च चंद्रिकायां ॥ शुद्धं वृद्धिमुपैति चेत्परदिनं ॥ नद्वासनोन्मी
लिनी नद्वे वाप्यधिका न हर्यहरियं वंजुल्यभिष्टासतां ॥ नंदादित्य जया
येति महती स्यात्त्रिःस्पृशा द्वादशी दृश्ये पर्वणि निर्गतिस्यात्पक्षवर्धन्यपि ॥
अपादित्ये न जयायुते न विजयापुष्येण पापहारोहिण्या च जयंतिका सुचत
स्पृशा दोहिनादर्न भवेत् ॥ पूर्णं यौन यथाधिकं क हरिनाषिको तुनां १८८

तन्मुजरा नाधिकं समं वयोस्त हि वः प्राकू न वेत्तु ॥ पश्चाद्व्रतं ॥ हि तावैधव
मस्तसवमितमेष्टु देसुन दातिषे स्तकावौ गपुंच दाखंडन इहायेतित्र
तं पारणं ॥ अप्यष्टिन्यपि कातिथियदि मतो भांतेन वृद्धौ तिथेरं तःपार
णं कं भवेदिति महाद्वादशी निर्णयः ॥ अपस्यार्थः ॥ दशमी वेधरहितो काद
शी पर दिने किंचन्मात्रा दृश्यते तेन द्वादशी सोन्मीलिनी नाम महाद्वादशी ॥ १ ॥
द्वादशी मात्रवृद्धौ वंजुली ॥ २ ॥ एकादशी द्वादशी त्रयोदशी योगे त्रिःस्पृशा ॥ ३ ॥
षष्टी घटिका न्यूना पूर्णिमा मावास्या वा परदिने तिथिमात्रा वर्धते सा पक्ष
वर्धिनी ॥ ४ ॥ पुनर्वसु योगे जया ॥ ५ ॥ श्रवण योगे विजया ॥ ६ ॥ पुष्य योगे पा
पनाशिनी ॥ ७ ॥ रोहिणी योगे जयंती ॥ ८ ॥ एतासु नक्षत्रप्रयुक्तासु चत
सृषु द्वादशी ॥ ९ ॥ दिने सूर्योदयमारभ्य नक्षत्रेण भवितव्यं ॥ नप्राक्
२ का सौ सवद्विपर्योलोचनया नक्षत्रन्यूनत्वासा स्याधिक्यं पुरोहिणी श्रव
णे चेत्षष्टी घटिको न्यूनापरदिने न वर्धते न तदा तदा नक्षत्रमध्येण

वपारणं॥ यदा नक्षत्रवृद्धेः सूर्योदयात्प्राक्‌ भवंतानि नक्षत्राणि साम्यम
धिकं वा भजंते॥ तदा सूर्योदयादूर्ध्वं पर्येव नक्षत्रेण भवितव्यमिति नियमः॥
श्रवणातिरिक्तेषु नक्षत्रेषु द्वादश्याः अस्तमपर्यंतः॥ ततो भवितव्ये श्रवणे तु॥
ऽपरस्तात्प्राक्‌ऽपपि द्वादशी समाप्तौ तदहरेवोपवासः॥ पारणदिने नक्षत्र
तिथ्योरनुवृत्तौ यदि तिथेरधिकं नक्षत्रं तर्हि तिथिमध्य एव पारणं॥ द्वाद
शीलंघनस्य रात्रौ निषिद्धत्वात् तिथ्याधिक्ये तु नक्षत्रांतएव पारणं॥ न प्राकृत
ताश्चाष्टौ द्वादश्यो नित्यं वैष्णवानां॥ वैष्णवाः को इत्याह॥ यद्दीक्षाविधिसंप्रा
संसमंत्रद्वादशाक्षरं॥ ऽपृष्टाक्षरमथाष्टं वा यंमंत्रं समुपासते॥ ३२·३॥ ज्ञे
यास्ते वैष्णवा लोके विष्णोर्चनरताः सदा॥ तेषामेवोपवासस्यान्महाष्टौकाद
शीव्रतं॥ पतंति नरके घोरे यावदाहूतसंप्लवं॥ वैष्णवव्यतिरिक्तानामुपवा
सः कृताकृतः॥ ऽपष्टौ द्वादश्यो नामैव धर्मः॥ इति नरसिंहपरिचर्या॥ ऽपष्टौ
नान्यव्रतघ्नानि ह्यापो मूलं घृतं पयः॥ हविर्ब्राह्मणकामाय गुरोर्वचं १८९

नमौषधं॥ ५॥ ऽपक्षारलवणं सर्वं तद्विशेषान्नविसेविनः॥ ऽपवनीतलशायनाः
प्रिया संगविवर्जितः॥ तिलमुद्गादृते सेव्यं सस्यं गोधूमकोद्रवाः॥ चणकं देव
धान्यं च एव क्षारगणाः स्मृताः॥ कांस्यं मांसं मसूरांश्च चणकं कोरदूषकान्॥
शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रियं॥ विनोदकेन यद्धान्यं यातवेदसि
पच्यते॥ तत्सर्वं फलवद्ग्राह्यमिति वेदविदो विदुः॥ गालवः॥ एकादश्यां तु
शुक्लायां न किंचिदपि न चोत्त॥ कृष्णायां न त्वये किंचिदाश्नीयादिति केचन॥
तथा च स एवाह॥ गृहस्थो नैव संक्रांतौ वासितैकादशीसिते। तथा चैकादशी
श्राद्धे पुत्री नोपवसेद्गृही॥ इत्येकादशी॥ ऽपथ पुण्यतिथि॥ ऽपमावास्या तु सोमे
न सप्तमी भानुनायुता॥ चतुर्थी भौमवारेण बुधवारेण चाष्टमी॥ चतस्र
स्तिथयस्त्वेताः सूर्यग्रहणसन्निभाः॥ स्नानं दानं तथा श्रा[illegible]द्धं सर्वं तत्रा
क्षयं भवेत्॥ तिथिवारस्य योगोयं यथा काले भवेद्यति॥ प्रभाते चायमध्या
ह्नेपुण्यकालः सनान्यथा॥ ३२९६॥ ऽपथ पर्वार्क॥ यथाषष्टी व्यतीपातो भानु

१९०
वारे भवेद्यदि ॥ पद्मकं नाम तत्प्रोक्तं ॥ अयनाच्च चतुर्गुणं ॥ अन्यत्र ॥ षष्ठी सप्तमी सं
योगो वारश्चेद्दंष्ट्रमालिनः ॥ योगो यं पद्मको नाम सहस्रार्कग्रहैः समः ॥ अ
थ चंपाषष्ठी ॥ विशाखा नानुवारेण वैधृत्या च समन्विता ॥ नभस्ये शुक्लषष्ठी
५वे या सा चंपेति निगद्यते ॥ कपिलाषष्ठी तु पूर्वमेवोक्ता ॥ अथ बुधाष्टमी ॥ यदा
यदा सिताष्टम्यां बुधवारे भवेद्यदि ॥ नवेत्तत्र दत्तं सर्वं स्नानदानादिकं च यत् ॥
संध्याकाले च रात्रौ तु प्रसुप्ते च जनार्दने ॥ बुधाष्टमी न कर्तव्या हंति पुण्यं पु
राकृतं ॥ इति व्रतप्रारंभः विषयं ॥ प्रेतपक्षे त्रयोदश्यां मघास्विंदुकरे र
विः ॥ यदा तदा गजच्छाया दत्तं तत्राक्षयं भवेत् ॥ तिथ्युक्तं यद्व्रतं चैव तिथ्यामेव
विधीयते ॥ नक्षत्रं विहितं यच्च कर्तव्यं केवलोडुनि ॥ भविष्योत्तरे ॥ न दोषः कु
नक्षत्रेसा जयोगः स्यात्प्रातिवार्षिके ॥ तिथिप्रयुक्तं [illegible] नक्षत्रं विहितं वापि कुत्रचित् ॥ २३ ॥
अथ संक्रांतिः ॥ संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ॥ तस्य योगादध
श्चोर्ध्वं त्रिंशन्नाड्यः प्रकीर्तिताः ॥ अर्वाक् षोडश नाड्यस्तु परतश्चैव षोडश ॥
पुण्यकालेर्कसंक्रांते स्नानदानादिकर्मसु ॥ आदित्यपुराणे ॥ शतमिंदुक्षये १९०

ये दानं सूर्यग्रहणेऽनंतकं ॥ षडशीत्यां सहस्रं तु विष्णुपद्यां तथैव च ॥ २६ ॥ विषुवे चा
युतं प्रोक्तं कोटिर्दक्षिणायने ॥ शतकोटिगुणं प्रोक्तं जायते तूत्तरायणे ॥ मृगक
र्कटसंक्रांती द्वे उदग्दक्षिणायने ॥ अथ चैव तुलामेषौ विषुवे तौ प्रकीर्तितौ ॥ अ
लिः सिंहो वृषः कुंभो विष्णुपद्यः प्रकीर्तिताः ॥ मीनकन्याधनुर्युग्मं स्मृतास्ताः षड
शीतयः ॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणायने ॥ त्रिंशत्कर्कटके नाड्यो
मकरे विंशतिः परे ॥ २७ ॥ माधवीये ॥ त्रिंशत्कर्कटसंक्रांतौ पूर्वतः पुण्यनाडि
काः ॥ मकरे तूत्तरा पुण्याश्चत्वारिंशति नाडिकाः ॥ विषुवयोस्तु पुण्यास्तु नो
ग्रस्तमयतो दश ॥ षडशीत्यां व्यतीतायां नाड्यः पंचदश स्मृताः ॥ याया पुण्य
तमा नाड्यस्तास्ताः पुण्यतमाः स्मृताः ॥ संक्रांतीनां च सर्वासां नाड्यः सन्निहि
ताश्च याः ॥ २८ ॥ तास्ताः पुण्यतमाः प्रोक्ता मुक्त्वा मकरकर्कटौ ॥ मकरे तूत्तराः स
र्वाः नाड्यः पुण्यतमाः स्मृताः ॥ कर्के पुण्यतमाः सर्वाः नाड्यः पूर्वं महर्षिभिः ॥ अहः संक्रम
णे पुण्यमहः कृत्स्नं प्रकीर्तितं ॥ रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः ॥

ऽर्धरात्राद्धस्तु स्मिन्मध्याह्ने सोपरि क्रिया॥ ऊर्ध्वं संक्रमणे चोर्ध्वमुद
याम्नहरद्वयं॥ पूर्वे चेदर्धरात्रे तु यदा संक्रमते रविः॥ तदादिनद्वयं पुण्यं
मुक्त्वा मकरकर्कटौ॥ यदास्तसमये वा यां मकरं याति भास्करः॥ प्रदोषे चार्ध
रात्रे वा स्नानं दानं परेहनि॥ ऽर्धरात्रे तदाहूर्ध्वं संक्रांतौ दक्षिणायने॥ पूर्वमे
व दिनं ग्राह्यं यावन्नोदयते रविः॥ मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालि
नः॥ ३२४॥ प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः॥ रवेरस्तमयात्पूर्वं म
करं याति भास्करः॥ स्नानदानादिकं कुर्यान्निरात्रादपि न दुष्यति॥ तथा च मनुः॥
राहुदर्शनसंक्रांतिर्विवाहात्ययवृद्धिषु॥ स्नानदानादिकं कुर्यान्निशि काम्य
व्रतेषु च॥ संक्रांताविति सर्वसाधारणे तेनोक्त्वा सोपि कश्चिद्देशाचारः॥
तत्रत्यैरेव शिष्टाचर्यते॥ न तु सर्वत्र शिष्टाचारः॥ तथा च स्मृत्यंतरे॥ स्नान
दानादिकं चैव रात्रौ कुर्वंति के चन॥ के चिद्रात्रौ न कुर्वीत स्नानदानादिकं चवै १८९
यत्॥ तथा लस्कुमंतु॥ रात्रौ स्नानं न कुर्वंति दानं चैव विशेषितः॥ नैमित्तिकं

च कुर्वीत स्नानं दानं च रात्रिषु॥ यत्पष्ठे वाथ वा मासे भवितव्यानि यानि
चित्॥ उपवासव्रतादीनि इत्यान्याकुर्मनीषिणः॥ प्रतिमासं तु संक्रांतिर्भ
वत्येव तस्मात्संक्रांतेर्न निमित्तत्वं॥ संक्रांतिं विना ग्रहणे दाहादिनि नैमित्तिका
नि॥ ५॥ मांडव्यः॥ ग्रहणोद्वाहसंक्रांतियात्रादिमरणं पुत्रजन्मनिमित्तीकम
ति श्रावुरात्राव पिन दुष्यति॥ ऽपथ्य नियमः॥ यदि स्यात्कर्कटसंक्रांतिः प्रभा
ते वाथवा निशि॥ पूर्ववच्च दिने कुर्यान्मभातस्योपरि क्रिया॥ ३२५१॥ रात्रौ
मकरसंक्रांतिर्यदि स्यादपरेहनि॥ कुर्यादावर्तनादर्वाक् स्नानदाना
दिकं चयत्॥ कार्मुकं च परित्यज्य ऊर्ध्वं संक्रमते रविः॥ प्रदोषे वार्धरा ७८
त्रे वा स्नानं दानं परेहनि॥ संक्रांत्याधरनक्षत्रादात्मनक्षत्रगणप
ते॥ त्रिकं षट्कं त्रिकं षट्कं त्रिकं षट्कं पुनः पुनः॥ पंथा भोगो व्यथाव
स्त्रहानिश्च विपुलं धनं॥ इति संक्रांतिः॥ ऽथ मलमासः॥ स्मृत्यंतरे॥

यस्मिन्मासि न संक्रांतिर्द्वयमेव वा ॥ मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश ॥
ज्योतिःशास्त्रे ॥ यत्संक्रांतिमासोधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्षयाख्यः
कदाचित् ॥ क्षयः कार्त्तिकादित्रये नान्यथा स्यात्तदा वर्षमध्येधिमासद्वयं
च ॥ देवकार्याणि सर्वाणि प्रतिष्ठादीनि यानि च ॥ मलमासे न कार्याणि व्रतबं
धादिकानि च ॥ यच्चाधानादिकर्माणि प्राशनांतानि यानि च ॥ मलमा
सेपि कार्याणि गार्ग्यस्य वचनं यथा ॥ ५९ ॥ पाराशरः ॥ गर्भे वार्द्धुषिके भृत्ये
प्रेतकर्माणि सिके ॥ सपिंडिकरणे नित्ये नाधिमासं विवर्जयेत् ॥ नारायणः ॥
॥ पाद्यादिषोडशश्राद्ध सपिंडीकरणं तथा ॥ मलमासे न तत्कुर्याद्दिन्यमासमृ
तस्य तु ॥ शाकलः ॥ यद्यधिके मरणं चाद्यमुत्र यं चाप्यते यदि ॥ तत्रकुर्याद्दाद्यमे
कं शुद्धसंवानदादिकं ॥ पाचार्यः ॥ पारत्तिर्यामिप्यासानां द्वादशाहे सपिंडनं ॥
न तथावर्त्तते द्वाद्यमलेखावर्त्तिरिष्यते ॥ ६० ॥ चेतम्मुद्दिरपयश्राद्धं षोडशं स्यान्म
लिम्लुचे ॥ मासत्रयेपि तत्कार्यं वृद्धे केचित्सपिंडनं ॥ मरणं मलमासस्य दाद्या

दिकमनुक्रमात् ॥ ॥ शुद्धमा[illegible]वेद्यं च तत्रैव श्राद्धपिंडनं ॥ प्रथमाब्दिकं संग्रहे ॥
मलिम्लुचे मासि मृतस्य पुंसः त्रयोदशो तु प्रथमाब्दिकं स्यात् ॥ म
ध्येऽपि मासेपि च तन्मृताहमं तेधिके वा दश एव मासि ॥ ६२ ॥ यदाब्दिकं प्र
थमं यच्च मलमासमृतस्य च ॥ कुर्यात्त्रयोदशे मासि व्याघ्रस्य वचनं
यथा ॥ पुंसश्चैवाधिके मासि मृतस्य प्रथमाब्दिकं ॥ मध्येधिकेपि तद्व
स्यात्कुर्यान्मासि त्रयोदशे ॥ मृतमासो भवेदाद्यो वर्षे चेदधिधिको
यदि ॥ कुर्यान्मलिम्लुचे द्वादशे प्रथमाब्दिकं ॥ द्वादशे मासि द्वादशमा
से सतीत्यर्थः ॥ संवर्त्तः ॥ यदाब्दिकं प्रथमं यस्यात्तत्कुर्वीत मलि[illegible]म्लु
चे ॥ शुद्धमासे न तत्कार्यमित्येवं मनुरब्रवीत् ॥ यत्संक्रांते द्विकं तं
प्रमाब्दिकं प्रथमं द्विजैः ॥ अत्य[illegible] शुद्धमासे ऽकर्त्तव्यमिति केचन ॥ मल
मासमृतानां तु मृताहं तत्र नोत्तरे ॥ यन्येषामुत्तरं कुर्यात्प्रथमेत्वधिके

करेत् ॥ शुद्धमासमृतानां तु मले स्यादाब्दिकांतरं ॥ वर्षे वर्षे तु यच्छ्राद्धं माता
पित्रोर्मृतेहनि ॥ मलमासे न कर्त्तव्यं गार्ग्यस्य वचनं यथा ॥ वर्षे वर्षे तु यच्छ्रा
पित्रोर्मृतेहनि ॥ मलमासे न कर्त्तव्यं व्याघ्रस्य वचनं यथा ॥ ७१ ॥ पत्रेक
द्धं मृताहे च मलिम्लुचे ॥ कुर्यात्तत्र प्रमीतानां नान्येषां तु कदाचन ॥ ७१ ॥ पत्रेक
श्च विशेषः ॥ मातुः संग्रहे ॥ द्वौ मासावेकनामानामेकस्मिन्वत्सरे यदि ॥ तत्त
रे देवकार्याणि पितृकार्याणि चोत्तरयोः ॥ ७२ ॥ पिंडहीनमसंक्रांतौ संक्रांतौ पिं
डसंयुतं ॥ श्राद्धद्वयं प्रकुर्वीत मासयो रुभयोरपि ॥ मृताहे मलमासोपि
नवं घ्यं दिवसं नये त्वां कुर्वी ॥ कुर्याच्छ्राद्धमपिंडं तु सदैवामिति केचन ॥ प्र
त्यब्दमधिकेस्यापि द्व्यं पिंडविवर्जितं ॥ पिंडार्घ्यसहितं शुद्धे कुर्यादित्याह
कार्ष्णपः ॥ कालादर्शे ॥ नवं घ्यं दिवसं कुर्यान्मृताहे न मलिम्लुचे ॥ एकम
प्याशय द्विमम्निति वेद विदो विदुः ॥ गालवः ॥ यस्मिन्यदाधिके वर्षे मासस्य
च्छिदिनां त्यकः ॥ तत्र चैवाधिकः शुद्धो मासद्वयमुदीरितं ॥ एक एव यदा मा
सः संक्रांतिद्वयसंयुतः ॥ मासद्वयगतं श्राद्धं तस्मिन्नेव प्रशस्यते ॥ इति मल १९६

मासनिर्णयः ॥ अथ शुक्रास्तः ॥ वृत्तरत्ने ॥ बालः शुक्रो दिवसदशकं पंचकं चैव वृद्धः पश्चा
दक्रांत्रितयमुदितः प्रच्चमे ष्यं क्रमेण ॥ जीवो वृद्धः शिशुरपि सदा पक्षमन्ये त्रिशुक्रतीव
द्वौ प्रोक्तो दिवसदशकं चापरे सप्तरात्रात् ॥ चौलोपनयने चैव विवाहोद्या
पनादिकं ॥ द्वारं गृहारंभं महारुद्रं तथैव च ॥ ८० ॥ देवतानां प्रतिष्ठां च गोदा
नं स्नातकं च यत् ॥ व्रतप्रारंभणं चैव न च वधूः प्रवेशनं ॥ वास्तुकर्म महायज्ञ
मुपाकरणमेव च ॥ विलंबितं प्रेतकार्यमहादानादिकं च यत् ॥ बाले वाथ
दिवा वृद्धे शुक्रो वाप्यस्तगो गुरौ ॥ मलमासे पि चैतानि वर्जयेद्देवदर्श
नं ॥ ज्योतिः ॥ वामे शुक्रे नवोढाया सुखहानिश्च दक्षिणे ॥ धनधान्यं च
पृष्ठे स्वे सर्वनाशः पुरस्थिते ॥ न च बालवती नारी [redacted] नवोढा चैव गर्भिणी ॥
न गच्छेत्सहमेकं तु सन्मुखे भार्गवे सति ॥ ८१ ॥ पितृवेश्मगता नारी सूयते तत्र
सा यदि ॥ निवर्गच्छेद्गृहं नर्तुः सा भर्त्रा सन्मुखे भृगौ ॥ एकग्रामे पुरे वापि दुर्भि
क्षे राज्यविप्लवे ॥ उद्वाहे तीर्थयात्रायां प्रतिशुक्रो न विद्यते ॥ काश्यपेषु वसिष्ठे

षुस्त्वमर्के गिरसेषु च ॥ नरगजेवास्यैषु प्रतिष्ठुको न विद्यते ॥ गोदाव
र्यांगयायां च [illegible] श्रीशैले ग्रहणद्वये ॥ अयने विषुवे चैव मासे मीने [illegible]
तेषु च ॥ उत्सवेषु च सर्वेषु सीमंतव्रतकर्मसु ॥ सुरासुरजयो श्रेष्ठ वमो
कादौ षोन विद्यते ॥ ८ ॥ नित्ययाने गृहे जीर्णे प्राशने तेषु कर्मसु ॥ वधूप्र
वेशमांगल्ये नमौंज्यं गुरुभृगुकयो ॥ पापे धिमासे चायने सुरारेः भृगुके
ज्ययो रस्तगवाल वृद्धौ ॥ उत्पातयोग ग्रह गंड शांति समान दग्ध ग्रहस्य
कर्म ॥ वापीकूपतडागयागगमनं क्षौरं प्रतिष्ठाव्रतं विद्यामंदिरकर्मवेध
न महादानवरं सेवनं ॥ तीर्थस्नानजपाभिषेकनिधनं मंत्रादिदेवार्चनं ॥
दूरे ऐवजिजीविषुः परिहरेद्भृगुके ज्यमौढ्ये न किं ॥ अथ षाढे च मले पौषे गु
रावस्तगते न गो ॥ अथ धानादिक्रियासत्पशांतिश्चापि विधीयते ॥ इति भृगुक्रा
तो ॥ अथ सिंहस्य माहात्म्यं ॥ ब्रह्मांडपुराणे ॥ सिंहराशिगते यस्मिन्दिने
सुरगुरुर्भवेत् ॥ तस्मिंस्तु गौतमीस्नानं कोटिजन्माघनाशनं ॥ ५ ॥ पुष्करा १९४

दीनि तीर्थानि त्रैलोक्यस्थानि यानि च ॥ वसंति वर्षमेकं हि गौतम्यां वर्षगे रवौ ॥ अथ
वर्ज्यमाह ॥ कालनिर्णये ॥ शांतिकं पौष्टिकं यात्राप्रतिष्ठोद्वाहपूर्वकं ॥ न कुर्यात्स
र्वमांगल्यं सिंहस्थे च बृहस्पतौ ॥ शांतिकं सिंहस्थात्पूर्वमाप्तमेव तं न कर्तव्यं गो
तम्यां विनान्ययात्रा न कर्तव्या ॥ तथा च ॥ इष्टापूर्तं च चौलादिसंस्कारान्वास्तुकर्म
च ॥ अन्यानि शुभकार्याणि न कुर्यात्सिंहगे गुरौ ॥ ३३ ॥ अथ कर्तव्यमाह ॥ ग
र्भाधानादिकाः सर्वाः प्राशनांताः क्रियाश्च याः ॥ कर्तव्याः सर्वदेशेषु सिंहस्थे च बृ
हस्पतौ ॥ वासिष्ठः कल्पे ॥ गोदावर्युत्तरे भागे भागीरथ्याश्च पश्चिमे ॥ विवाहो
दिन कुर्वीत सिंहस्थे च बृहस्पतौ ॥ वरस्तोनातिकाल्वाभ्यां दुर्भिक्षौ देशविप्ल
वे ॥ गौतम्या दक्षिणे भागे विवाहः शुभदो मतः ॥ ज्योतिः ॥ सिंहस्थेपि मघासंस्थं गुरुं प्र
यत्नेन वर्जयेत् ॥ अन्यत्र सिंहभागे तु विवाहादि विधीयते ॥ सिंहराशिगते जी
वे गौतम्याश्च दक्षिणे ॥ व्रतचौलविवाहादि कुर्यादिति मनीषयः ॥ प्रत्यादि दे क्रि
यमाणं त्वकुलधर्मादिकं च यत् ॥ सर्वदेशेपि कर्तव्यमित्याहुः सिंहगे गुरौ ॥
अथ प्रसंगात्क्षौरं कथ्यते ॥ गुर्विण्यामपि भार्यायां विवाहे चाप्यवाहते ॥ सपिता

१९५ पिवपेत्केन्द्रगारगो तस्म्यां सिंहगे गुरौ॥ कार्ये संपिता चौरं व्याघ्रस्य वचनं यथा॥
धर्मपत्नीं च गर्भिण्यां मांगल्यं चापि वा कृते॥ वपनं प्राहुराचार्याः गो त[illegible] सिं
हगे गुरौ॥ अन्यच्च॥ यावत्स्यात्प्रथमं पत्न्या ह्याररुग गर्भसंभवं॥ चौरमि
८वे ष्टं नैत्तत्र गोतम्यां सिंहगे गुरौ॥ ३३१०॥ इति सिंहस्थनिर्णयः॥ अथ ग्रहण
निर्णयः॥ सिद्धांते॥ अमाः प्रतिपदोः संधिः सूर्यस्य ग्रहणं भवेत्॥ प्रतिपत्पूर्णि
मास्याश्च संधौ स्याद्राहुणं विधोः॥ दिवा चंद्रग्रहं रात्रौ सूर्यपर्व पुण्यदं॥
संधिस्थं पुण्यदं ज्ञेयं पर्वदर्शनगोचरं॥ मेघछन्ने ग्रहे स्यान्नप्रेतिका
रो न विद्यते॥ इति यत्कीर्तितं लोके निर्मूलत्वादुपेक्षितं॥ यथा वृत्ता
दिति छिन्न स्नानाद्यं क्रियते ग्रहे॥ मेघैराच्छादिते तद्वत्स्नानादौ नैक
बाधनं॥ १३॥ स्पर्शे मुक्तिनिमित्तं हि स्नानं च गणिकागते॥ कालेकु
र्वीत सूर्येंदो मेघछायादितो रपि॥ यावन्मुक्तं रवेर्बिंबं विधोर्वापि
न दृश्यते॥ तावन्नः क्रियते स्नानं मोक्तिकं मनुरब्रवीत्॥ ग्रस्तोदि १९५

ते ग्रहग्रस्तं दृष्ट्वा स्नानं समाचरेत्॥ ग्रस्तास्ते मौक्तिकं स्नानं मुक्तं
दृष्ट्वा रविविधुं॥ दर्शस्नानं तथा श्राद्धं कृत्वा संतर्पयेत्पितृन्॥ १५॥
जपहोमादिकं कुर्याद्दानं दद्याद्विजोत्तमः॥ सू० सूर्यग्रहे तु नाश्नीयात्पू
र्वं यामचतुष्टयं॥ चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरान्विता॥ राहुणा के
तुना वास्तं ग्रस्तो याति दिवाकरः॥ संगवात्पूर्वमश्नीयान्बालवृद्धातुरान्वि
ता॥ राहुणा केतुना वास्तं ग्रस्तो याति दिवाकरः॥ संगवात्पूर्वमश्नीयाद्रा
हणे चंद्रसूर्ययोः॥ ग्रस्तास्तन्यदिवा भानुरस्तं याति ग्रहेण तु॥ २०॥ सर्वे
प्येवोपवासं तु कुर्युरेवं वदंति हि॥ ग्रहणे सूतकी नापि स्नानं कार्यं॥ त
त्र स्मृतिः॥ स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके॥ श्रौते कर्मणि तत्का
लः स्नातः शुद्धिमवाप्नुयात्॥ परो॰ च जायते नृणां ग्रहणे चंद्रसूर्ययोः॥
स्नात्वा दानादिकं कुर्यात्प्रवदंति मनीषिणः॥ सर्वेषामेव वर्णानां सूतकं
राहुदर्शने॥ स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत्॥ २२॥ सू

१९६ तकेमृतकेचैवनदोषो [illegible] दौर्बो राहुदर्शने॥ तावद्देव भवेच्छुद्धिर्याव
न्मुक्तिर्नदृश्यते॥ नसूतकादिदोषोत्र होमदानजपादिषु॥ ग्रहस्नानमु
दकाप्यतीर्थादुष्टतवारिणा॥ ॥अन्नपक्वमिह त्याज्यं स्नानं सर्वसमं ग्रहे॥
वारितक्रादिनाजादि तिलैर्दर्भैर्नदुष्यति॥ ॥पारनालं पयस्तक्रं दधिस्ने
हादियाचितं॥ मणिकस्योदकं चैव न दुष्यो राहुदर्शने॥ ॥अथ ग्रह
णदिने विधवाउपवासः॥ ॥अर्धरात्रं भवेद्दर्वा क्व चंद्रस्य ग्रहणं यदि॥
॥अपुत्रा विधवा कुर्यादुपवासं स्त्रियल्लतः॥ ॥अथ ग्रहणदिने श्राद्धं॥ ग्रहणं
तु द्वितीये क्रिरजौ दोषाकुपंचमे॥ त्रयोदशे क्रिमरणं जाते एकादशेऽहनि॥
२॥ सूर्यस्येव ग्रस्तास्त द्वितीयदिने श्राद्धं कर्त्तव्यं॥ सूर्यग्रहे नास्नीया
दितियावन्मुक्तं रवेर्बिंबमिति वचनद्वयस्यापूर्वपश्चाद्दिनएव भोज
नं प्रति निषिध्यत इति॥ पुत्रहीनायजस्वलाचेत्तु श्राद्धं पंचमे क्रि कुर्यात्॥
पित्रोर्मृतयोकास्तु [illegible] श्राद्धं त्रयोदशाहे स्यादपवाद्यः सपिंडीकरणकर्त्तास १९६

चापित्रयोदशाहे कुर्यात्॥ ॥अन्येस्तु एकादशे क्रिःजातसूतके सर्वेरप्येकादशे
क्रि एव॥ व्याघ्रः॥ यदिस्यादाद्दिकं प्राप्तं सूतके मृतके पिवा॥ सूतकानंतरं कुर्या
च्छ्राद्धमेकादशेऽहनि॥ २६॥ ग्रस्तास्ते यदि वैस्तये श्राद्धं कुर्यात्परेऽहनि॥ तस्मिन्नेव
दिने कुर्याद्ग्रस्तास्तो न भवेद्यदि॥ तथा च मनुः॥ संध्यारात्रौ न कर्त्तव्यं श्राद्धं खलु
विचक्षणैः॥ दयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनं॥ श्राद्धमिति प्रत्याब्दिकं॥ त
स्मृतिः थाचसंग्रहः॥ ॥अस्तं ग्रस्तो रविर्याति प्रत्यब्दं स्यात्परेऽहनि॥ न याति यदि वै ग्रस्ता
स्तस्मिन्नेव दिने भवेत्॥ ग्रस्तोरविर्यदामुक्तः भागे वास्तमयाद्रवेः॥ प्रत्यब्दं हि
दिने तास्मिन्रात्रावपि न दुष्यति॥ ॥ग्रस्तोदयो भवेद्दिवा श्राद्धं न कार
येत्॥ रात्रावपि तदा कुर्यात्प्रत्यब्दं मनुरब्रवीत्॥ श्राद्धकालेषु सर्वेषु श्राद्धं कुर्या
द्दिवैव हि॥ कचिद्रात्रौ न कुर्वीत ग्रहणे पुत्रजन्मनि॥ प्रत्याब्दिके प्रसादाद्वा श्रा
द्धं कलाविधानतः॥ ॥अथ नित्यकर्माधिकारः॥ स्मृतिभास्करे॥ कथं स्युर्नित्य
कर्माणि ग्रस्तास्तमितयोर्द्वयोः॥ स्नानं संध्यादिकं कुर्याद्यथाकालेतुनैत्यकं॥

१८७

अस्तास्तयोर्यदा मुक्तिं याव दृश्या न दृश्यते॥ अस्तास्ताद्धि च कुर्यामं हित्वा स्नाना
दिकं चरेत्॥ अस्तोदये प्ययमेव त्रिषट् दशा योपगतं नराणां शुभप्रदं॥ स्या
[illegible] ग्रहणे रविंदो॥ द्विसप्तनंदेषु गतेषु मध्ये शेषाश्च राशेः पवला भवंति॥ अथ
ग्रहणमाहात्म्यं॥ सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः॥ सर्वं भूमिसमं दानं
ग्रहणे चंद्रसूर्ययोः॥ ४६॥ इति ग्रहणनिर्णयः॥ अथ तीर्थविधिर्लिख्यते॥ गोनि
युक्तेन याते न तीर्थयात्रां करोति यः॥ स याति नरके घोरे या[illegible]व [illegible] रोमसंख्य
या॥ मुंडनं चोपवासं च सर्वतीर्थेष्वयं विधिः॥ वर्जयित्वा कुरुक्षेत्रे विशालां
विरजं गयां॥ गंगायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि॥ आधाने यज्ञकाले च
क्षौरं षट्सु विधीयते॥ गंगे व वंध्य श्च गोकर्णे निवृत्तिः श्रीगिरिस्तथा॥ विरूपा
क्षस्तथा काशी क्षेत्रं भास्करसंज्ञितं॥ ५०॥ गंगाशब्देन गोदारीष्वपि महानदीषु ज्ञेयं॥
सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वला॥ तासु स्नानं न कुर्वीत वर्जयित्वा समु
द्रगाः॥ तीर्थे विवाहे यात्रायां संग्रामे देवतालये॥ ग्रामदाहप्रवासे च स्पृष्टास्पृष्टं १८७

न दुष्यति॥ चित्तमंतर्गतं दुष्टं न तीर्थफलमश्नुते॥ शतधापि जलैर्धौतं सुराभांडमिवा
शुचिः॥ दानमिज्या तपः शौचं तीर्थसेवा श्रुतं तथा॥ सर्वाण्येतानि तीर्थानि यदि भावो
हि निर्मलः॥ तस्मान्न वेषु तीर्थेषु मानुषेषु च सर्वशः॥ उभयेष्वपि यः स्नाति स याति
परमां गतिं॥ अदुष्टहृदुपाचारः संतुष्टो येन केन चित्॥ अहंकारविमुक्त
श्च स याति परमां गतिं॥ ५८॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः॥
हेतुनिष्ठश्च पंचैते नास्युस्ते तीर्थभागिनः॥ तीर्थं प्राप्य प्रसंगेन स्नानं तीर्थे समा
चरेत्॥ स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु॥ षोडशांशं स लभते यः परा
र्थेन गच्छति॥ अर्धं तीर्थफलं तस्य प्रसंगेनाधिगच्छति॥ कुशप्रतिकृतिं कृत्वा ती
र्थवारिणि मज्जयेत्॥ मज्जयेच्च यमुद्दिश्य सोऽष्टभागं लभेत वै॥ ६०॥ पितृन्स
र्व तीर्थेषु समुद्दिश्य च मातरं॥ यः स्नाति परमां सिद्धिं पितॄणां स प्रगच्छति॥ तीर्थ
प्राप्ततो विप्रो सवासा जलमाविशेत्॥ अपाणौ ल[illegible] द्विजेन्यश्च दत्वार्घ्यं तथा च
दक्षिणां॥ वापयेत् श्मश्रु केशांश्च नखान्यपि निकृंतयेत्॥ प्रायश्चित्तं यथाशा
स्त्रं कुर्यात्पापानुत्तये॥ स्नात्वा श्मश्रुणि केशांश्च लोमान्यपि च वापयेत्॥ क्रमे

१९९ एणपाणिपादानां नखान्यपि निकृंतयेत् ॥ श्मश्रुकेशांश्च लोमानि नखान्यपि निकृंतये
त् ॥ कुक्षिरोमशिखावर्ज्यमेवं स्यान्मुंडनक्रिया ॥ शिरोगतानि पापानि यांति मुंड
नेतो यतः ॥ ऽप्रकारयत्वा वपनं प्रायश्चित्तं विनिर्दिशेत् ॥ ६६ ॥ राजा वा राजपुत्रो वा
ब्राह्मणो यदि वा भवेत् ॥ केशान् संरक्षणार्थाय द्विगुणं व्रतमाचरेत् ॥ ततः स्नानं प्रकु
र्वीत मृत्तिकागोमयादिभिः ॥ भस्मना च ततः कुर्यान्निजकायस्य शोधनं ॥ प्रायश्चि
त्तं समासाद्य द्वाजो मिथुनं ततः ॥ कृत्वा श्राद्धं हिरण्येन ह्युपवासो भवेद् यथ ॥ पा
रिजाते ॥ स्नात्वा नदीषु सर्वासु पितृदेवांश्च तर्पयेत् ॥ तत्र तत्र यथावित्तं कुर्याच्छ्रा
द्धादिकं यथा ॥ ८० ॥ नपरिक्षेद्विजान् तीर्थे विंन्नार्थी भाजए वच ॥ सक्तुभिः पिंडदा
नं च चरुणा पायसेन च ॥ कर्तव्यान्तषिभिर्विष्टं पिण्याकेन गुडेन वा ॥ श्राद्धं तत्र
तु कर्तव्यं नैव विघ्नं समाचरेत् ॥ ऽपकालेप्यथवाकाले तीर्थे श्राद्धं सदा नरैः ॥ प्रा
प्तैरेव सदा कार्यं कर्तव्यं पितृतर्पणं ॥ ऽपघ्र्यमावाहनं चैव द्विजांगुष्ठनिवेद
नं ॥ विकरं तृप्तिप्रश्नश्च तीर्थे पंच विवर्जयेत् ॥ पितृवर्गे तथा मातृवर्गे मातामा
हस्य च ॥ पत्न्यादेर्वर्ग वर्गस्य नामान्युच्चारयेत्क्रमात् ॥ संकल्पे विधिरेषस्यात्त १९८

था चैवानुवादने ॥ तीर्थे महालये चैव ह्यर्चनं स्यात्पृथक्पृथक् ॥ ७५ ॥ देवानादौ समभ्य
र्च्य पितृवर्गमथार्चयेत् ॥ मातृवर्गं ततो मातामहादेश्च यथाक्रमं ॥ पितृवर्गं मातृवर्गं
वर्गं मातामहस्य च ॥ ऽपर्चयीतालुका रूप्पान् चैयेदिति केचन ॥ ऽपथान्यपद्यतः शौ
नकः ॥ देवानभ्यर्च्य पित्रादिवर्गं वर्गं समर्चयेत् ॥ काले चैवापवैकस्मिन्सर्वान
भ्यर्चयेत् पितृन् ॥ एको द्दिष्टविधानेन एकं वर्गं चमर्चयेत् ॥ तीर्थे मघा महालये चैव
हिता द्वादशदैवतं ॥ यद्येको भिन्नसंबंधो वर्तते चेद्वयोरपि ॥ तत्रस्थानेन युंजी
यात् तीर्थादौ चैव तर्पणे ॥ वृद्धशौनकः ॥ तीर्थश्राद्धे गयाश्राद्धे तर्पणे च महालये ॥ सं
तर्पयेत्पितृव्यान् सर्वान् विधिनापितृजानपि ॥ विधोयत्र कृते तीर्थे वपनमासाभ्यंत
रे यदि ॥ प्रसंगाच्चेत्पुनः प्राप्तो न कुर्यान्मुंडनादिकं ॥ ८२ ॥ कृत्वा विधिं यथोक्तं तु गृ
हमागत्य वै यदि ॥ गच्छेन्मासत्रयादर्वाक् न कुर्यात्तैर्थिकं चयत् ॥ कृत्वा तीर्थविधिं
चाथ व्रजेत्तीर्थान्तरं प्रति ॥ काजनेमं न चेत् क्षेत्र सर्वस्यात्तत्र तैर्थिकं ॥ विधिरेष पुरा
ण शेरुक्तस्यात्तीर्थगामिनां ॥ द्विजानामेव सर्वेषां न कुतत्तीर्थवासिनां ॥ गंगायां मर
णे पित्रोर्नत्सकर क्षेत्र एव च ॥ निषिद्ध तिथिवाराणां न दोषः क्षौरकर्मणि ॥ ८६ ॥ न जी
वत्पितृकः कुर्यात्तीर्थदेशमुपोषणं ॥ वपनं तीर्थकं यच्च प्रायश्चित्ताधिकं तथा ॥

१९९

स्नानादानं प्रकुर्वीत यथा वित्तानुसारतः॥ सर्वतीर्थमयं धर्मः स्यात्कृतीनां तु कस्य तु॥ अशक्तश्चेत्पितायस्य यं तु तीर्थं न शक्यते॥ सजीवपितृकः कुर्यात्येतत्कं पितुराज्ञया॥ प्रसंगात् क्षौरकर्मापि कथ्यते॥ कर्के धनुषि कुंभे च कन्यायां कार्मुके रवौ॥ क्षौरकर्म न कुर्वीत व्यासस्य वचनं यथा॥ ९॥ तीर्थे यज्ञे च गोदाने मृताहात्पूर्ववासरे॥ पित्रोर्मरणकाले च दोषस्तत्र न विद्यते॥ तथा चार्षवे॥ शान्यर्कभौमरिक्तासु षष्ठ्यष्टम्योश्च पर्वसु॥ श्राद्धाहे च व्रते चैव सूतके निशि संध्ययोः॥ कर्के धनुषि कन्यायां कुंभे चैवास्थिते गुरौ॥ न वपेत्स्मश्रुकेशांश्च प्राकृर्वे देविदो विदुः॥ इति तीर्थविधिः॥ अथाभ्यंगविधिरुच्यते॥ स्कान्दे चैव मांगल्ये वासरे श्राद्धाहे सूर्यवासरे शुक्रे बुधमंदयोः॥ तैलाभ्यंगं नरः कुर्याद्विवाहादिमहोत्सवे॥ श्राद्धाहे च व्रते चैव सूर्ये भौमे च पर्वसु॥ रिक्तानंदाष्टमीषष्ठीष्वभ्यंगं परिवर्जयेत्॥ कौशिकः॥ प्रत्यब्दे युगमन्वादौ प्रेतपक्षेष्टकासु च॥ अभ्यंगे मैथुनं क्षौरं न कार्यं श्राद्धकृन्निः॥ निषिद्धे दिवसे वारे रात्रौ च व्याधितस्य च॥ द्व्यंतरयुतं तैलं न दुष्यति कदाचन॥ नारकायां च कृष्णायां विवाहादिमहोत्सवे॥ तथा संवत्सरस्यादौ सूतकांते शिरोरुजि॥ श्रावणे बलिराज्ये च वसंतस्योदये तथा॥ तैलाभ्यंगो न दुष्येत् संक्रां १९९

२००

तिग्रहणादिषु॥ तैलाभ्यंगं बुधैः प्रोक्तं मंगलस्नानमुच्यते॥ मांगल्येषु च कर्तव्यं सर्वदा शुभकांक्षिभिः॥ सर्वग्रंथेषु यत्प्रोक्तं सारं सारसमुद्धृतं॥ नारायणेन तत्सर्वं लिखितं हितकाम्यया॥ २५००॥ इति नारायणभट्टविरचितायां धर्मप्रवृत्तौ स्याल्लीपाकादि मंगलोक्तं प्रकरणं समाप्त॥ शुभमस्तु॥ ॥ ॥

संवत् १८०९ वर्षे आषाढशुदि ९ बुधवासरे अद्येह श्री पमदावाद वास्तव्यं पवजवपुर निवासि उदीच्य सहस्रज्ञातीय द्वेश्री पद्मनाभ सुत सदाशिव सुत शिवशंकर तत्सुत द्विजवर्य रेणुशायज्जिवनेन॥ लिखितोयं ग्रंथः॥ परोपकारार्थं॥ श्रीरस्तु॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ॥

नष्टे दृष्टे पूर्णमासि च व्यतीपातश्च वैधृते॥ संक्रांति पंचमी ज्ञेया पंचपर्वाणि पार्थिव॥ १॥ पंचतीर्थानि विप्रस्य करे तिष्ठंति दक्षिणे॥ ब्राह्मं दैवं तथा पित्र्यं मनुष्यमग्निमेव च॥ २॥ ब्राह्मं तु करमूले च अग्रे च देवतीर्थयोः। दक्षिणे पित्र्यं मध्ये अग्निवामे मनुष्यमेव च॥ ३॥ देवतीर्थं च रेदाने ब्राह्ममाचमनं स्मृतं॥ तर्पणं पितृमानुष्ये अग्नितीर्थं प्रतिग्रह॥ ४॥ गृहं वै पश्चिमे द्वारे तथैवोत्तरमेव च। विवाहे वेदिका कार्या गृहे निर्गम दक्षिणे॥ ५॥ ऊर्ध्वा त्वाकृदक्षिणे द्वारे शुभदं ऐसाधकोत्तम॥ वेदीकां च वसो द्वारां गृहे निर्गम वामतः॥ ६॥ २००

द्वौ अंगुलमात्रेण अंतरे पिंडं दीयते। स्वर्गं नाक्रमस्यात् श्राद्धं पुनः श्राद्धमर्हति॥१॥
॥सर्वोपरि तिलत्रिषु स्थाने पितॄणां पादशौचने॥ रथ्यासा॥ रोहणे चैव रोलकालविरा
॥षतः॥१॥ अन्यत्र पुण्यकाले च पत्नी दक्षिणतः स्मृता॥ ॥सव्येपा॥ पार्गंतरमंत्र।
॥सव्येपति तिलत्रिषु स्थाने श्राशनां तात्र शौकयोः॥ ४ रथ्या स्पारां०॥२॥ एकविंशात्
॥ऊर्ध्वं विवाहे दशवासराः॥ विषदूचो जो पनयने नांदीश्राद्धं विधीयते॥१॥ पार्वणा नाव
पक्षे कालांतराभावे॥ श्राद्धेचाभावोपवाद उक्तो विष्णुना॥ पनारब्धाविशुद्धयर्थं कुष्मां
डे जुहुयाद्घृतं॥ गायत्र्यां चगव्याशीः ततः शुध्यति सूतकी॥ सूत्त की ति जनना शौच॥२

॥इतिश्री धर्मशास्त्रनिबंधे॥
॥नारायणभट्टकृत धर्मप्रवृत्ति॥
॥त्तिसमाप्तः॥ शुभमस्तु शिव॥
होमे देवार्चने होहे पाके च परिवेषणे॥ भोजनं वर्जयेदेकं तामेग
वांन्न कुष्यति॥१॥ मांजारमूखकस्पर्शे पिंडे चछिद्रकीकृते॥ पुनः श्राद्धं प्रकुर्वीत एक
पाके नतच्छ्रृणात्॥१॥ परान्नं पायसं तैलं कं ३ मासमांस्तथैव च॥ इग्धमन्नं
तथा क्षारं वैश्वदेवे तु वर्जयेत्॥१॥